DHARMAKUTAM
SUNDARAKANDAM



Thanjavur Sarasvati Mahal Series No. 29

॥ धर्माकूतम् ॥

(सुन्दरकाण्डः)

श्रीत्र्यम्बकरायमखिविरचितम्

DHARMAKUTAM

(SUNDARA KANDA)

By

TRYAMBAKA MAKHIN

Critically Edited with Introduction
By

T. CHANDRASEKHARAN, M.A., LT.,
Curator Retd.
Government Oriental Manuscripts Library, Madras.

THANJAVUR MAHARAJA SERFOJI'S

**SARASVATI MAHAL LIBRARY
AND RESEARCH CENTRE**

THANJAVUR

2016 **Price: Rs.270-00**

BIBLIOGRAPHICAL DATA

Title of the Book	: Dharmakutam - Sundarakanda
Edited	: T. Chandrasekharan, M.A.,L.T.,
Publisher	: Director, Sarasvati Mahal Library & Research Centre, Thanjavur.
Publication	: 29
Language	: Sanskrit
Edition	: Second Edition
Date of Publication	: 2016
Paper used	: T.NP.L. 18.6 kgs.
Size of the Book	: 21 x 14 c.m.
Printing Type used	: 16 pt.
Number of pages	: 554
No. of copies	: 500
Printer	: Sarasvati Mahal Library Press
Binding	: Cardboard
Subject	: Kavya
Price	: Rs.270-00

வெளியீட்டாளர் முகவுரை

தஞ்சாவூர் மகாராஜா சரபோஜியின் சரசுவதி மகால் நூலகம் தமிழ், சம்ஸ்க்ருதம், தெலுங்கு மற்றும் மராட்டி மொழிகளில் நாற்பதாயிரத்திற்கும் மேற்பட்ட சுவடிகளைப் பாதுகாத்து வருகின்றது. மேலும் இவற்றில் வெளிவராத அரிய சுவடிகளை மொழிப்பண்டிதர்கள், துறை வல்லுநர்கள் மற்றும் சிறப்புக்கேண்மைப் பதிப்பாசிரியர்களை நியமித்து அவர்களைக்கொண்டு நூல்களாக பதிப்பித்து வெளியிட்டு வருகின்றது. அவ்வரிசையில் **தர்மாகூதம்-சுந்தரகாண்டம்** என்னும் இந்நூல் தற்பொழுது இரண்டாம் பதிப்பாக வெளியிடப்படுகிறது.

தஞ்சை மராட்டிய மன்னர்களாகிய சாஹஜி (1684-1711), சரபோஜி (1711-1728) இவ்விருவரிடமும் மந்திரியாக இருந்த பண்டிதர் திரயம்பகமகி என்பவரால் எழுதப்பட்ட ஸ்ரீமத் ராமாயண வ்யாக்யானமாகிய தர்மாகூதம் என்ற நூலின் சுந்தரகாண்டப்பகுதியே இந்நூலாகும். இராமாயணத்திலுள்ள தர்மசம்பந்தமான சர்ச்சைகளை விளக்குவதால் இந்நூலுக்கு தர்மாகூதம் என்ற பெயரை வைத்துள்ளார் இந்நூலாசிரியர். இம்மையிலும் மறுமையிலும் உயர்வைக்கொடுக்கும் ஒழுக்க முறைகளும், இவ்வுலக கர்மாக்கள் யாவும் இந்நூலில் விளக்கப்பட்டுள்ளன. நமது வாழ்க்கைக்கு தேவையான கலைகளும் விஞ்ஞானம் முதலிய சாஸ்திரங்களும் இந்நூலில் விவரிக்கப்படுகின்றன. சுந்தர காண்டம் என்ற சொற்றொடருக்கு அழகிய காண்டம் என்று பொருளாவதால் இவருடைய

விரிவுரையில் அலங்கார சாஸ்த்திரத்தை நன்றாக விளக்கியுள்ளார்.

இந்நூலின் பதிப்புப் பணியைச் சிறப்பாகச் செய்துள்ள பதிப்பாசிரியர் திரு. T. சந்திரசேகரன் அவர்களுக்கு என் பாராட்டுகள்.

இந்நூல் வெளிவரத் தேவையான நிதியுதவி நல்கிய அரசுக்கு என் மனமார்ந்த நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இந்நூல் நன்கு வெளிவர ஆவன செய்துள்ள சரசுவதி மகால் நூலக நிருவாக அலுவலர் திருமதி அ. பூங்கோதை, M.A., அவர்களுக்கும், நூலகர் முனைவர் எஸ். சுதர்ஷன். M.A., B.Lit., M.L.I.S. Ph.D., அவர்களுக்கும் மற்றும் நூலகப் பணியாளர் களுக்கும் எனது பாராட்டுதல்களைத் தெரிவித்துக் கொள்கிறேன்.

இந்நூல் இலக்கிய ஆர்வலர்களுக்கும், ஆராய்ச்சி மாணவர்களுக்கும் மிகவும் பயன்தரும்.

தஞ்சாவூர்
24.06.2016

டாக்டர் என். சுப்பையன், இ.ஆ.ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

வேண்டுகோள்

கருணையுள்ளங்கொண்ட நம் முன்னோர்கள் அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும் பனை ஓலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவை பல்வேறு இடங்களில் முடங்கி உள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகாலுக்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவை மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன் மூலம், சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப்புகழை, பெருமைசால் சரசுவதி மகால் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயர் இடம்பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே, நாம் பெற்ற பேறு பெறுக இவ்வையகம் என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடமுள்ள சுவடிகளைச் சரசுவதி மகாலுக்குத் தந்துதவ வேண்டுகிறேன்.

தஞ்சாவூர்

மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்
சரசுவதி மகால் நூலகம்.

INTRODUCTION

It is well known that the Ramayanam was composed by the venerable sage Valmiki describing in 24,000 verses the life history of Sri Ramachandra. This majestic poem has been commented upon by a number of scholars mainly for the purpose of explaining the words and ideas, making clear what has been suggested, reconciling the apparently contradictory statements and interpreting the Kavya as extolling Siva or Vishnu. But till now no one has attempted to explain the work from the standpoint of Dharma. To satisfy this long-felt need, at the instance of the scholarly king Sarabhoji of Tanjore, Tryambaka Makhi wrote the commentary called Dharmakutam, selecting only a few important verses of the Ramayana. The author himself says :

'रामस्यास्य चरित्रवर्णनपरं रामायणाख्यं महा-
काव्यं यत्प्रथमः कविर्व्यरचयत्पुण्यं पुमर्थप्रदम् ।
तस्यैतस्य चिरन्तनास्वपि महाव्याख्यास्वनुद्भावितं
भावं कंचिदसूचयाद्विमलधीः श्रीत्र्यम्बकाख्यो मखी ॥ '1

'प्राचीनैः कविभिर्न धर्मपरता रामायणस्येरिता
सेयं सम्प्रति वर्ण्यतामिति मुहुः सम्प्रेरितेनादरात् ।

---

1. Tanjore Descriptive Catalogue, Page 6683 verse 4

विद्वद्भिस्तदनुग्रहेण शरभक्ष्माभृत्कटाक्षेण च
व्याख्या त्र्यम्बकयज्वना विरचिता विस्पष्टधर्माशया ॥ '2

It may be argued that the Ramayana is intended only to describe the achievements of Sri Ramachandra, and it is far fetched to weave the ideas of Dharma into the work. But when various statements in the Ramayana itself are carefully examined, it will not be difficult to come to the conclusion that the Ramayana is intended mainly to illustrate the practice of Dharma as observed by Sri Ramachandra.

' धर्मज्ञश्च कृतज्ञश्च ' 3 ' रक्षिता स्वस्य धर्मस्य ' 4 ' रामो विग्रहवान्धर्मः ' 5 ' यस्मिन्न चलते धर्मो यो धर्मान्नातिवर्तते । ' 6 ' चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति । ' 7 ' विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम् । ' 8 ' धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि । ' 9 ' लोकानां त्वं परो धर्मः ' 10 etc,

Sri Krishna proclaims in the Bhagavadgita

' यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

2. *Ibid* Verse 7
3. Ramayana (M. L. J. Press Edition) I—i—2
4. *Ibid* I—i—14
5. *Ibid* III—xxxvii—13
6. *Ibid* VI—xxviii—19
7. *Ibid* I—i—96
8. *Ibid* II—xix—20
9. *Ibid* VI—xci—73
10. *Ibid* VI—cxx—15

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ' 11

From this, does it not become clear that Vishnu's Avatara as Sri Rama is for the establishment of Dharma by the removal of the wicked and the protection of the good? We all know that what was observed by Rama is Dharma and Adharma is what was practised by Ravana and that Rama is himself a Dharmatma and acting as a guide for others to follow the path of Dharma.

The Ramayana is regarded as a restatement of the Veda itself and is also intended to amplify the ideas of the Veda through illustrations.

'वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ।' 12

'पुण्यं वेदैश्च संमितम् ।' 13

'वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ।' 14

Veda is the root cause of Dharma and it is itself rooted in Dharma.

'वेदोऽखिलो धर्ममूलम् ।' 15

'वेदो धर्ममूलम् ।' 16

---

11. Bhagavad Gita—IV—7 & 8
12. Ramayana—Page 4, Verse 12
13. *Ibid* I—i—98
14. *Ibid* I—iv—6
15. Manu Smriti (Nirnayasagar Edition) II—6
16. Gautama Dharma Sutra (Mysore Edition) I—1

The same idea is given by Sri Jaimini in the Mimamsa Sutras

'चोदनालक्षणोऽर्थो धर्मः ।' 17

'तस्य ज्ञानमुपदेशः ।' 18

Hence it can be stated without any fear of contradiction that the main purpose of the Ramayana is to give a clear exposition of the Dharma.

The nature of Dharma itself is given differently by different authorities.

'चोदनालक्षणोऽर्थो धर्मः ।' "अलौकिकश्रेयस्साधनं धर्मः," 19 etc.

But all these different statements lay emphasis upon Dharma being the cause of the attainment of Moksha.

What are the Pramanas for Dharma? They are 4 in number. The Vedas, the Law codes, the Practice and Mental satisfaction.

'वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥' 20

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥' 21

---

17. Purva Mimamsa Sutra I—i—2
18. *Ibid* I—i—5
19. *Ibid* I—i—2
20. Manu Smriti II—12
21. *Ibid* II—6

'वेदो धर्ममूलं' 'तद्विदां च स्मृतिशीले।' 22

'धर्मज्ञसमयः प्रमाणम्' 'वेदाश्च।' 23

Of these four Pramanas, the Veda does not derive its authority from any other source i.e., it is auto-authoritative.

'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।' 24

'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।' 25

['अर्थो हि नैकः कृतयोऽप्यनन्ता
नैका स्मृतिर्यद्वचनं प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां
तस्माच्छ्रुतिर्नः परमं प्रमाणम्॥']

The next in order of authority is Smriti whose authority is based upon the Veda. When there is contradiction between two statements in the Smriti, then both must be regarded as authoritative and the contradictory statements should be regarded as giving an option to the people

'श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ।' 26

'तुल्यबलविरोधे विकल्पः।' 27

---

22. Gautama Dharma Sutra (Mysore Edn. I-1 & 2
23. Apastamba Dharma Sutra (Mysore Edition) I—i—2 & 3
24. Manu Smriti II—13
25. Bhagavad Gita XVI—24
26. Manu Smriti II—14
27. Gautama Dharma Sutra I—6

But when there is contradiction between Sruti and Smriti, the former will prevail as it is अपौरुषेय

'श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा ॥' 28

'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ।' 29

'विप्रतिषेधे श्रुतिलक्षणं बलीयः ।' 30

The Dharmas as expounded in the Vedas, appear to be different in different places and much is made about this apparent lack of uniformity to refute the authoritative nature of the Vedas. The following are some of the instances about which there is no hard and fast rule. Eating in the company of a woman or a person who is not a Upanita or what is left after being eaten by others, marriage alliance with the children of uncle, the sale of wool, the drink of liquor, the profession of a soldier, eating fish, travel over the seas etc., are regarded as Dharma by some and as Adharma by others. Again there is discrepancy in the duration of the performance of certain religious acts, Brahmacharya, penance etc, ranging from 10 years to a few days. Similarly there is difference in respect of the Adhikaris, Avastha, Varna and Ashramam. But it must be understood that the ancient seers have given their own interpretation of the Dharma as found in the Vedas to suit to the various climes, times, persons

---

28. Kullukabhatta's commentary on Manusmriti II–13
29. Purva Mimamsa Sutra I—iii—3
30. **Apastamba Dharma Sutra I—xxx—9**

conditions, castes and professions. The poet Kalidasa has said 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' 31

['अर्थोऽपि नैकः श्रुतयोऽप्यनन्ता
नैका च शाखा किमिह प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महर्षयो येन गताः स पन्थाः ॥']

Hence the difference must be understood not as a fundamental discrepancy in the teachings of the Vedas but as different adaptations suited for various purposes as suggested by the ancient sages.

The next in the order of authority is सदाचार or good conduct. This idea is stated clearly in the following verse :

['अर्थोऽपि नैकः स्मृतयोऽप्यनन्ता
नैको मुनिर्यस्य मतं प्रमाणम ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥']

This is two fold : आचार and शील
'आचारः कम्बलवल्कलाद्याचाररूपः'
'शीलं ब्रह्मण्यतादिरूपम'

'ब्रह्मण्यतादि च ब्रह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं मित्रता प्रियवादित्वं कृतज्ञता

---

31. Raghuvamsa II—2

शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलम् ।' 32

Achara and Sila are regarded as one and the same by some as evidenced by the following Sutra of Gautama:

'वेदो धर्ममूलम् । तद्विदां च स्मृतिशीले ।' 33

When there is conflict between Smriti and Achara, Smriti alone should be followed :

'स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत् ।
तथैव लौकिकाचारं स्मृतिबाधात्परित्यजेत् ॥ ' 34

Lastly comes one's own Mental Satisfaction. In the absence of clear directions in Sruti, Smriti and Achara, one's own mind must guide a person in the course of action.

'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।' 35

['अर्थोऽपि नैकः श्रुतो विभिन्ना
नैको हि सन् यस्य कृतिः प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहाया-
मार्या मतिर्यत्र गता स पन्थाः ॥ ']

Because Bodhayana has said 'उपदिष्टो धर्मः प्रतिवेदम् ।' 36

---

32. Manu Smriti, Page, 30, Kulluka Bhatta's commentary on II—6
33. Gautama Dharmasutra I—I & 2
34. Katyayana
35. Sakuntalam (Kales' Edition) I—20
36. Bodhayana Dharma Sutra, I—i—i

iv

'स्मार्तो द्वितीयः।' 37 'तृतीयः शिष्टागमः।' 38 it should not be regarded that आत्मतुष्टि is not authoritative ; the word शिष्टागम ' includes' आत्मतुष्टि also,

In as much as Dharma has been propounded by the Vedas, Smritis and Itihasas, where is the necessity for a Kavya like the Ramayana to repeat the same ? On the other hand, it has been ordained 'काव्यालापांश्च वर्जयेत्' and hence the Kavya which comes under the rule of prohibition cannot be expected to teach Dharma. To meet this objection, the following reply is given : It has been established by all the Alankarikas that the prohibition 'काव्यालापांश्च वर्जयेत्' applies only to the literature written by poets of very low order and to the works in which the hero or heroine is a base person. They have gone even to the extent of saying

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये... ॥' 39

The Mahakavyas written by great poets are regarded as explaining the scope of the four-fold पुरुषार्थs by narrating the life history of the ideal heroes and the heroines. Nay, the Kavyas are given the status equal to that of Smriti. Kumarila Bhatta has quoted from Kalidasa even as he has quoted from any other Smriti in support of his views.

---

37. *Ibid* I—i—3
38. *Ibid* I—i—4
39. Kavyaprakasa (Nirnayasagar Edition) I—2

'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः !' 40

The repetition of the ideas contained in the Vedas does not in any way minimise the authority of the Kavyas. The Vedas command a person to do or not to do things.

'सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।' 41

The Puranas advise a person to do a thing explaining the *pros* and *cons* of such actions even as a friend will do ; but the Kavyas persuade a person in an attractive manner 'like the beloved' to do the same thing.

'यद्वेदात्प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरं
यच्चार्थप्रवणात्पुराणवचनादिष्टं सुहृत्संमितात्।
कान्तासंमितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे ॥' 42

Mammata has said

'कान्तासंमिततयोपदेशयुजे' 43

Following this last method to expound Dharma and Adharma, the sage Valmiki has written the poem Ramayana, in which the characters of Sri Rama, Sita and others are intended to illustrate the practice of

---

40. Sakuntalam I—20
41. Taittiriya Upanishat (Anandashrama Edition) Page 32
42. Prataparudriyam (Balamanorama Edition) Page 4 Verse 8
43. Kavyaprakasa I—2

Dharma and the characters of Ravana, Kumbhakarna and others are intended to give a picture of Adharma and its fruits. He learnt the story through the divine sage Narada and by the grace of Brahma he has given a clear idea of Dharma and Adharma as taught in the Vedas and illustrated them by the life history of Sri Rama, Sita and Ravana. Hence the poem is known by three names –Ramayanam, Sitacharitam 'सीतायाश्चरितं महत्' 44 Dasasirovadham 'दशशिरसश्च वधं निशामयध्वम्' 45.

One may raise the objection that Dharma alone should be taught in the Kavyas which follow the Sruti and Smriti and Adharma should not be taught in them. But the teachings of Sruti and Smriti are not confined to Dharma alone. Adharma also is referred to in them as one that has to be avoided. Hence in the text 'अथातो धर्मजिज्ञासा।' 46 'अथातो ब्रह्मजिज्ञासा।' 47 'वेदो धर्ममूलम्।' 48 'वेदोऽखिलो धर्ममूलम्।' 49 *Akara* is regarded eliptical and Veda is held equally as an authority on Adharma and Abrahma, and this is in keeping with the teachings of the Vedas. If Dharma alone forms the key-note of the Vedas, then all the text of the Vedas should be only in the form of Vidhi or injunctions and they should not assume the form of Nishedhas by which

---

44. Ramayana I—iv—7
45. *Ibid* I—ii—43
46. Purva Mimamsa Sutra I—i—1
47. Brahma Sutra I—i—1
48. Gautama Dharma Sutra 1—1
49. Manu Smriti II—6

the practice of Adharma is eschewed. Sri Sankara Bhagavatpada has therefore said

"शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यम, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' इति सूत्रिता। अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय" 50

Badarayana in his Sutra 'अशुद्धमिति चेन्न शब्दात्।' 51 has stated that though the deeds ordained by the Veda are Asuddhas on account of the torture of animals they are not so, as the criterion to decide it is whether it has been ordained by the Vedas in the form of Sabda i.e., whether a Nishedha Sruti exists in support of it, and not the human mind which is not competent to judge what is Dharma and Adharma In this connection, the following observations of the Bhashyakara may be quoted with advantage :

'शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य । अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने करणम्, अतीन्द्रियत्वात्तयोः, अनियतदेशकालनिमित्तत्वाच्च । यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते, स एव देशकालनिमित्तान्तरेषु अधर्मो भवति। तेन शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति।' 52

Hence just as Dharma is taught in Vedas to be observed, Adharma also is taught to be avoided.

---

50. Brahma Sutra (Nirnaya Sagar Editon) Page 70, Sankara's Commentary on I—i—4
51. *Ibid* III—i—25
52. *Ibid* Page 620, Sankara's Commentary on III—i—25

Dharma is two fold : **प्रवृत्तिलक्षण** based on activity and **निवृत्तिलक्षण** based on renunciation. In the commentary of Bhagavadgita Sri Sankara Bhagavatpada says

'स भगवान् सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुर्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम् । ततोऽन्यांश्च सनकसनन्दनादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास । द्विविधो हि वेदोक्तो धर्मः ; प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च' 53

The Dharma based on action as ordained in the Karmakanda of the Vedas helps one to reap fruits in the other world and this is conveyed to us both as Vidhi and Nishedha. Smrti itself says that we should conquer this world by giving birth to a son, the world of Pitrs by our actions, and the world of Gods by learning.

'पुत्रेणैवायं लोको जय्यः । कर्मणा पितृलोकः । विद्यया देवलोकः ।'54

The Nivrttilaksana Dharma is taught in the Jnanakanda which ordains us to avoid all passions and practise austerity. Though there is this difference between the teachings of the Purva Kanda and Uttara Kanda of the Vedas, it should be understood that the purport of the Vedas is renunciation on account of the following Srutis :

---

53. Bhagavad Gita Bhashya of Sankara,
(Sri Vani Vilas Edition) Page 1

54. Brihadaranyakopanishat (Anandashrama Edn.)
Page 230 & 231, I—v—16

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण
ब्रवीम्योमित्येतत् ॥' 55

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ।' 56

Some regard that Valmiki's aim is to teach Pravritti-laksana Dharma in the Ramayana and that the Nivrtti-lakshana Dharma is taught only in the Yoga Vasishtha. But this view is not quite correct as the Alankarikas attribute Chaturvargaphalas to the Mahakavya and Moksha which is the fruit of Nivrttilakshana Dharma forms one of the Chaturvargaphalas. Hence the story of Rama and others in the Ramayana is intended to teach Dharma and Adharma in an easy but effective manner.

The work "DHARMAKUTA" now published explains clearly this intention of the poet, namely, to explain the various aspects of Dharma and Adharma with suitable illustrations. The author himself says

'अभिप्रायं धर्मे विशदयति वाल्मीकिवचसा-
मिदं प्रेक्षावन्तः सरसमभिनन्दन्तु दयया ॥' 57

All the verses in the Ramayana are not commented upon in this work. Only such of the verses as have

55. Kathopanishat (Anandashrama Edn.) I—ii—15
56. Brihadaranyakopanishat, Page 685, IV-iv-22
57. Dharmakutam (Sri Vani Vilas Edn. Vol. I, Page 11, Verse 38

some bearing on Dharma and Adharma are selected for explanation and amplification. Even here the meaning is not given for every word, nor is the story elaborated. The author has taken great pains to show what aspects of Dharma or Adharma are intended to be taught and supports his view by profuse quotations from authoritative texts like Sruti, Smriti, Itihasa, Purana etc.,

The author of this work is Tryambaka Makhi. He is an erudite scholar. Even from early years he is known to have been performing Agnihotra and other Yajnas as ordained in the Vedas in which he was a versatile scholar.

'तस्यानुजन्मा तरुणाग्निहोत्री
तस्यैव वात्सल्यवतः प्रभावात् ।
समुल्लसल्लौकिकवैदिकश्रीः
समीरितस्त्र्यम्बकनामधेयः ॥' 58

'अभिप्रायं धर्मे विशदयति वाल्मीकिवचसा-
मिदं प्रेक्षावन्तः सरसमभिनन्दन्तु दयया ॥' 59

He was the brother of the famous Narasimhayajva

'ज्येष्ठस्तयोर्जन्मगुणोन्नतिभ्यां
प्रियः प्रकृत्या पितुरोजसा च ।
अभूदसामान्यचरित्रयोगा-
दन्वर्थनामा नरसिंहयज्वा ॥' 60

58. *Ibid* Page 9, Verse 32
59. *Ibid* Page 11, Verse 38
60. *Ibid* Page 8, Verse 28

'प्रसादवानादृतबन्धुवर्गः

स्थिरस्वभावः स्थितिमानभिज्ञः ।

अगर्हिताचारशुभान्तरङ्गो

निबर्हिताभ्यन्तरशत्रुवर्गः ॥' 61

'सत्येन जिह्वां प्रशमेन चेतो

मुखं प्रसादेन दृशौ दयाभिः ।

दानेन हस्तौ च तपोभिरङ्गा-

न्यब्जासनो यस्य चिरादकार्षीत् ॥' 62

'तस्यानुजन्मा तरुणाग्निहोत्री' 63

This Narasimhayajva was the minister of Tanjore King Ekoji.

'यस्य स्वपुत्रादपि शाहभूपा-

दरज्यत प्रत्यहमेकभूपः ।

यश्च स्वतातादपि तत्र रक्तो

धुरं तदीयामवहन्नियुक्तः ॥' 64

He is also known to have written the Champu Kavya Tripuravijaya.

Narasimha and Tryambaka were sons of Gangadharadhvari and Krishnambika. Gangadharadhvari was the renowned minister of Ekoji. He was also well versed

61. *Ibid* Page 9, Verse 30
62. *Ibid* Page 9, Verse 31
63. *Ibid* Page 9, Verse 32
64. *Ibid* Pages 8 & 9, Verse 29

in all the Sastras. He was the son of Babajiyajva of Bharadvajagotra.

'तस्यैकोजिमहीपतेः सुचरितो मन्त्री दिगन्तश्रुतः
शक्रस्येव बृहस्पतिः शुभमतिः सर्वज्ञचूडामणिः ।
भारद्वाजकुलाब्धिशीतकिरणो बाबाजियज्वात्मजो
मन्त्रस्तम्भितदुष्टभूपभुजगो गङ्गाधराख्योऽध्वरी ॥' 65

'श्रीगङ्गाधरमन्त्रिणोऽपि तनयौ कृष्णाम्बिकागर्भजौ ।' 66

Our author Tryambaka Makhi was brought up with affection by King Ekoji and his consort Dipamba. Even from his boyhood he was initiated in all the branches of learning. Ekoji appointed him minister of his son Sahaji; and he continued as minister of Saraboji, the brother and successor of Sahaji also.

'एकोजिप्रभुणा गुणान्तरविदा देव्या च दीपाम्बया
बाल्ये यः परिगृह्य वत्सलतया संवर्धितः सादरम ।
बुद्धीरप्युपदिश्य शाहजिमहीनेतुः स्वसूनोः स्थिरे
सोऽयं मन्त्रिपदे त्रियम्बकमखी स्वातन्त्र्यमासादितः ॥'67

'भ्राता शाहमहीपतेः शरभजी राजाथ शास्ति क्षितिम् ।' 68

'सोऽयं ज्येष्ठपुरस्क्रियोपचरितं यं मन्त्रिवर्यं दया-
नावा प्रार्णमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।' 69

---

65. *Ibid* Page 5, Verse 15
66. *Ibid* Page 8, Verse 27
67. *Ibid* Page 10, Verse 33
68. *Ibid* Page 10, Verse 34
69. *Ibid* Pages 10 & 11, Verse 36

He was living at Swamimalai near Kumbhakonam in the Tanjore District on the banks of the river Kaveri.

'वृत्तिं चाकृत यस्य सह्यगिरिजाकूलेऽनुकूले श्रुति-
स्मृत्युक्ताखिलनित्यकर्मसु वसुत्यागाय भोगाय च ॥' 70

यः कौमारिलतन्त्रतः समतनोत्कर्मस्थितिं पावनीं
ब्रह्मोपादिशदादिशोकधुतये यो नारदाय स्फुटम् ।
तं स्कन्दं परिचर्य साधु परया भक्त्या तदाप्तुं मह-
त्कर्मब्रह्मफलं सुधीः कलयते यः स्वामिशैले स्थितिम् ॥' 71

Tryambakamakhi himself says that he was brought up by the king Ekoji from his childhood and was by him made the minister of king Sahaji and then continued to be the minister of Saraboji.

'एकोजिप्रभुणा गुणान्तरविदा देव्या च दीपाम्बया
बाल्ये यः परिगृह्य वत्सलतया संवर्धितः सादरम् ।
बुद्धीरप्युपदिश्य शाहजिमहीनेतुः स्वसूनोः स्थिरे
सोऽयं मन्त्रिपदे त्रियम्बकमखी स्वातन्त्र्यमासादितः ॥' 72

सोऽयं ज्येष्ठपुरस्क्रियोपचरितं यं मन्त्रिवर्यं दया-
नावा प्रार्णमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।
वृत्तिं चाकृत यस्य सह्यगिरिजाकूलेऽनुकूले श्रुति-
स्मृत्युक्ताखिलनित्यकर्मसु वसुत्यागाय भोगाय च ॥' 73

---

70. *Ibid* Page 11, Verse 36
71. *Ibid* Page 11, Verse 37
72. *Ibid* Page 10, Verse 33,
73. *Ibid* Pages 10 & 11, Verse 36

The date of Ekoji is 1676 to 1683 and that of Sahaji is 1684 to 1710 while the date of Saraboji is 1711 to 1728. As Tryambaka Makhi was a contemporary of all these three, it will be reasonable to presume that the date of Tryambaka Makhi is 1665 to 1750 A. D. He himself says that he completed the work in the Salivahana year 1641 corresponding to the year Vikari in the month of Asvayuja, first day of Suklapaksha, Saturday and the Svathi constellation. This date corresponds to 3rd October 1719.

'शालीवाहनके सहस्रपरतः षट्के शतानां मते
चत्वारिंशत उत्तरे च शरदामब्दे विकार्याह्वये ।
मासेऽप्याश्वयुजे सितादिमतिथौ स्वातौ स्थिरे वासरे
धर्माकूतमिदं त्रियम्बकमखी सम्पूर्णतां नीतवान् ॥ 74

The present edition is based upon a single manuscript bearing D. No. 9384 in the Sanskrit collections of manu-cripts deposited in the T. M. S S. M. Library, Tanjore. The first two Kandas were already printed and published by the late revered T. K. Balasubrahmanya Iyer at his Sri Vani Vilas Press, Srirangam in three volumes even as early as 1916. After a lapse of nearly 35 years the other Kandas were thought of for printing. Thanks to the magnanimous grant of the Government of Madras to the Tanjore Maharaja Serfoji's Sarasvathi Mahal Library, Tanjore, it has now become possible to take Sundara Kanda for printing, and it is hoped that the other Kandas

74. Tanjore Descriptive Catalogue, Page 6685

also will be taken up immediately and completed as early as possible.

An index of the verses that are commented upon in this work, a detailed list of contents, a list of topics which are dealt with at length and an index of works and authors quoted have been added to facilitate easy reference. My thanks are due to Sri V. R. Kalyanasundara Sastrigal, Sahityavisarada, Sahitya Siromani and Vedanta Siromani, Pandit of the Government Oriental Manuscripts Library, Madras, for preparing the above except the detailed list of contents and also for reading the proofs. I also thank Sri S. Gopalan, Honorary Secretary of the Tanjore Maharaja Serjoji's Sarasvati Mahal Library, Tanjore, for getting the detailed list of contents prepared at his Library and for giving me all the facilities at his disposal to edit this work. The Sri Vani Vilas Press, Srirangam, also deserves to be congratulated on the neat and excellent execution of the printing of this work.

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.
10th February, 1951.

T. CHANDRASEKHARAN.

॥ धर्माकूतभूमिका ॥

य: प्रौढरामाभिरतोऽप्यरक्तो
वाचंयमोऽप्यद्भुतवाग्विलासः ।
वल्मीकभूरप्यभुजङ्गसङ्ग-
स्तं भावये सत्कविसार्वभौमम ॥[1]

प्राङ्मुखम्

सुविदितमेवेदं विदितवेदितव्यानां समेषां भारतीयानाम्, यत् भगवता परमर्षिणा श्रीमद्वाल्मीकिना श्रीमतो रामभद्रस्य सुचरितमुपनिबद्धं चतुर्विंशतिसहस्रैः श्लोकैः काव्यात्मना श्रीमद्रामायणमिति; तच्च बहुभिर्व्याख्यातृभिरप्रसिद्धपदार्थकथन—दुरन्वयव्यवहितान्वयान्वयप्रदर्शन— अपरिपूर्णपरिपूर्णताकल्पन— संभवद्विरोधसमाधान— शिवविष्णवादितत्परताप्रतिपादनादिना बहुप्रकारेणोपबृंहितमिति च । तत्र न कैरप्यैदम्पर्येण श्रीमतो रामायणस्य धर्मतत्परता स्फुटीकृतेति तत्स्फुटीकरणार्थमेवायं ग्रन्थकृत् त्र्यम्बकमखी शरभजिक्षितिपालप्रचोदितो ग्रन्थरत्नमिदं धर्माकूतं नाम निर्ममे इति निश्चप्रचम । यत् उक्तं कविनैव—

रामस्यास्य चरित्रवर्णनपरं रामायणाख्यं महा-
काव्यं यत्प्रथमः कविर्व्यरचयत्पुण्यं पुमर्थप्रदम् ।
तस्यैतस्य चिरन्तनास्वपि महाव्याख्यास्वनुद्भावितं
भावं कश्चिदसूचयद्विमलधीः श्रीत्र्यंबकाख्यो मखी ॥ 1a

1. धर्माकूतम् Vol I Page 3 श्लोक. 8.

1. a Tanjore Descriptive catalogue page 6683 श्लोक. 4.

प्राचीनैः कविभिर्न धर्मपरता रामायणस्येरिता
सेयं सम्प्रति वर्ण्यतामिति मुहुस्संप्रेरितेनादरात् ।
विद्वद्भिस्त्वनुग्रहेण शरभक्ष्माभृत्कटाक्षेण च
व्याख्या त्र्यम्बकयज्वना विरचिता विस्पष्टधर्माशया ॥ 2

न चेत्थमत्राशङ्कनीयम्— यद्रामायणे सर्वत्र रामादिचरितस्यैव नानाप्रकारस्य वर्णिततया धर्मतात्पर्यकतैव तावद्रामायणस्यासिद्धेति तस्य तत्तात्पर्यकतास्फुटीकरणं दूरापेतमिति ॥

रामायणं धर्मपरमेव

पश्यन्तु तावद्भवन्तः तत्र तत्र विप्रकीर्णान्यत्रभवतो वाल्मीकेः श्रीरामभद्रमधिकृत्य नानामुखनिबद्धानि 'धर्मज्ञश्च कृतज्ञश्च'[3] 'रक्षिता स्वस्य धर्मस्य'[4] 'रामो विग्रहवान्धर्मः'[5] 'यस्मिन्न चलते धर्मो यो धर्मान्नातिवर्तते'[6] 'चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति'[7] 'विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम्'[8] 'धर्मात्मा सत्यसन्धश्च रामो दाशरथिः'[9] 'लोकानां त्वं परो धर्मः'[10] इत्यादीनि वचनजालानि । किं

2. Ibid 6683 श्लोक. 7.
3. श्रीमद्रामायणम् (Law journal press Edition) I. 1. 2
4. रामायणम् I. I. 14.
5. रामायणम् III. 37. 13.
6. रामायणम् VI. 28. 19.
7. रामायणम्— I. I. 96.
8. रामायणम्— II. 19. 20.
9. रामायणम्— VI. 91. 73.
10. रामायणम्— VI. 120. 15.

नालमिमानि श्रीमतो रामायणस्य धर्मतत्परतायाम् ? ॥

शृणुध्वं चेदं भगवतो यदुनन्दनस्य गीतम्—

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥'[11] इति ॥

न किमाविदितमत्र सर्वेषां विष्णववताराणां दुष्टनिग्रहशिष्टपरिपालनपूर्वकं धर्मसंप्रतिष्ठापकत्वम् ? तन्निराशङ्कं समवधत्त यूयं धर्मज्ञस्य धर्मानुष्ठातुर्धर्मानुष्ठापयितुर्धर्मात्मनश्च श्रीमतो रामचन्द्रस्य चरितोपवर्णनं श्रीमद्रामायणे धर्मतत्त्वावेदनफलमेवेति । अभिमानश्चायमस्माकं भारतीयानां, यत् 'रामवद्वर्तितव्यं स धर्मः । रावणवन्न वर्तितव्यं सोऽधर्मः' इति ॥

किंच, 'वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना'[12] 'पुण्यं वेदैश्च संमितम्'[13] 'वेदोपबृंहणार्थाय तावग्राहयत प्रभुः'[14] इत्यादीनि समैः श्रुतचराण्येव वाक्यानि ॥

वेदो हि नाम 'वेदोऽखिलो धर्ममूलम्'[15] 'वेदो धर्ममूलम्'[16] इत्याद्यार्षेयवचनैर्धर्मप्रतिपादकः शब्दराशिरित्यवगतः ।

11. गीता— IV. 7.&8.
12. रामायणम्— Page. 4.
13. रामायणम्— I. 1. 98.
14. रामायणम्— I. 4. 6.
15. मनुस्मृतिः— 2. 6.
16. गौतमधर्मसूत्रम्— I. 1.

आह च भगवान् जैमिनिरपि भङ्ग्यन्तरेण—‘ चोदनालक्षणोऽर्थो धर्मः ।’[17] ‘ तस्य ज्ञानमुपदेशः ’[18] इति । तत्ताहग्वेदात्मनो वेदसंमितस्य वेदोपबृंहकस्य वा श्रीमद्रामायणस्य धर्मतात्पर्यकतामन्तरा तत्त्वान्यनुपपन्नान्येवेति युक्तमेव तस्य धर्मतात्पर्यप्रतिपादनमैदम्पर्येण ॥

धर्मस्वरूपम्

धर्मश्च नामालौकिकं लौकिकालौकिकश्रेयःसाधनम् । ‘चोदनालक्षणोऽर्थो धर्मः’[19] इति जैमिनिः । ‘ यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः’[20] इति तु आपस्तम्बः । ‘ जगतः स्थितिकारणं । प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुर्यः स धर्मः’[21] इति भगवत्पादाः ॥

धर्मप्रमाणानि

प्रमाणानि चात्र श्रुतिस्मृतिसदाचारात्मतुष्टयः । तदुक्तमभियुक्तैः—

‘ वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ ’[22] इति ।

स्वस्य चात्मनः प्रियं आत्मतुष्टिः । लक्षणं प्रमाणम् ।

---

17. पूर्वमीमांसासूत्रम्— I. 1. 2.
18. पूर्वमीमांसासूत्रम्— I. 1. 5.
19. पूर्वमीमांसासूत्रम्— I. 1. 2.
20. आपस्तम्बधर्मसूत्रम्— I. 20. 7.
21. भगवद्गीतोपोद्घातभाष्यम्
22. मनुस्मृतिः— II. 12.

अत एवान्यत्रोक्तम्—

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥'[23] इति ।

गौतमोऽप्याह—

'वेदो धर्ममूलं, तद्विदां च स्मृतिशीले'[24] इति । शील-मात्मतुष्टेरप्युपलक्षणम् ॥

आपस्तम्बोऽपि—

'धर्मज्ञसमयः प्रमाणम्, वेदाश्च'[25] इति । धर्मज्ञसमयः स्मृतिशीलात्मतुष्टयः ॥

प्रमाणव्यवस्था

तत्र श्रुतिरेव नः स्वतन्त्रं प्रमाणं धर्माधर्मयोः । तदुक्तम्—
'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः'[26] इति ।
'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।'[27] इति च ।

युक्तं चैतत्— यतः

[अर्थो हि नैकः कृतयोऽप्यनन्ता
नैका स्मृतिर्यद्वचनं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां
तस्माच्छ्रुतिर्नः परमं प्रमाणम् ॥]

---

23. मनुस्मृतिः— II. 6.
24. गौतमधर्मसूत्रम्— I. 1. & 2.
25. आपस्तम्बधर्मसूत्रम्— I. 1. 2 & 3.
26. मनुस्मृतिः— II. 13.
27. गीता— XVI. 24.

तदनु स्मृतिः, तदनु सदाचारः, तदनु आत्मतुष्टिः । तत्र श्रुत्योर्विरोधे उभयमपि धर्म एव । तदुक्तम्—

'श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ '28 इति ।

'तुल्यबलविरोधे विकल्पः '29 इति च ॥

श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव गरीयसी, अपौरुषेयत्वात् । अविरोध एव स्मार्तमनुष्ठेयम् । तदुक्तम्—

'श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा ॥'30 इत्यादि ॥

तथा च जैमिनिप्रणीतं सूत्रम्—

'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् '31 इति ।

आपस्तम्बीयं सूत्रमपि—

'विप्रतिषेधे श्रुतिलक्षणं बलीयः '32 इति ॥

तदनु स्मृतिः

अत्रेदं बोध्यम्—वेदेषु हि धर्माः प्रतिबोधिता विवेकिनामसङ्कीर्णा एव भवन्तोऽप्यविवेकिनां विप्रकीर्णा इवाभान्ति । तद्यथा—अनुपनीतेन स्त्रिया च सह भोजनम्, पर्युषितभोजनम्, मातुलपितृष्वस्रादिदुहितृविवाहः इत्येते क्वचिद्धर्मतया परिगण्य-

---

28. मनुस्मृतिः— II. 14.
29. गौतमधर्मसूत्रम्-- I. 6.
30. Kullukabhatta's commentary of Manusmṛti II 13.
31. पूर्वमीमांसासूत्रम् I. 3. 3.
32. आपस्तम्बधर्मसूत्रम् I. 30. 9.

न्ते । अन्यत्राधर्मतया । एवं ऊर्णाविक्रयः, शीधुपानम् , आयुधीयकम् , झषभोजनम् , समुद्रयानम् इत्येते क्वचित् धर्मतया गण्यन्तेऽन्यत्राधर्मतया । एवं कर्मतपोब्रह्मचर्यजपादीनां अनुष्ठाने फलाप्तौ च दशवर्ष - एकहायन - मास - अहोरात्रादिकालभेद उपलभ्यते । तथा अधिकारिभेदेन, अवस्थाभेदेन, वर्णभेदेन, आश्रमभेदेन च धर्मभेद उपलभ्यते । सर्वमिदं यावत्स्मृतिबलादविमृष्टं भवति, तावत्सङ्कीर्णमिव भायाद्विमृष्टे त्वसङ्कीर्णमेव । यतः स्मृतिकाराः परमर्षयोऽपि वेदेषु यादृशो धर्माः प्रतिपादितास्तादृश एव विद्यमाना उच्छिन्नाश्च शाखास्तपोबलेन ज्ञात्वा स्मृत्वा च देशकालाधिकार्यवस्थावर्णाश्रमादिभेदेन व्यवस्थितविषयानुपनिबध्नन्ति स्मृतिषु । अत एव चासां स्मृतीनां प्रामाण्यं पार्ष्णिकमामनन्ति सम्प्रदायविदः । 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत'[33] इति च भगवान्कालिदासः । तदेवम्—

['अर्थोऽपि नैकः श्रुतयोऽप्यनन्ता
नैका च शाखा किमिह प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महर्षयो येन गताः स पन्थाः ॥']

तदनु सदाचारः

एवमपि मन्दमतीनां केषांचिदत्र धर्मसंशयस्तत्र सदाचारस्य प्रामाण्यम् । युक्तं चैतत्— यतः

['अर्थोऽपि नैकः स्मृतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।

33. रघुवंशः— II. 2.

धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥ ']

'आचारः कम्बलवल्कलाद्याचरणरूपः । शीलं ब्रह्मण्यतादिरूपम्' इति कुल्लूकभट्टाः । ब्रह्मण्यतादि च 'ब्रह्मण्यता, देवपितृभक्तता, सौम्यता, अपरोपतापिता, अनसूयता, मृदुता, अपारुष्यम्, मैत्री, प्रियवादित्वं, कृतज्ञता, शरण्यता, कारुण्यम्, प्रशान्तिश्चेति त्रयोदशविधं शीलम्'[34] इत्युक्तलक्षणम् ॥

आचारशीले क्वचिदविशेषेण निर्दिश्येते, यथा गौतमीये—
'वेदो धर्ममूलम् । तद्विदां च स्मृतिशीले'[35] इति ॥

अत्र शीलमितरयोरुपलक्षणम् । क्वचिद्विशेषेण, यथा—
'स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम्'[35a] इति ।
स्मृत्याचारयोर्विरोधे स्मृतिरेव बलीयसी । तदप्युक्तम्—

'स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत् ।
तथैव लौकिकाचारं स्मृतिबाधात्परित्यजेत् ॥' इति ॥36

तदनु आत्मतुष्टिः

महतामप्याचारसंशयो यत्र तत्रात्मतुष्टिः प्रमाणम् । तथोक्तम्—

---

34. Kulluka Bhatta's Commentary of Manusmrti II. 6.
35. गौतमधर्मसूत्रम् 1 I & 2
35. a मनुस्मृतिः -- II. 6.
36. कात्यायनः

'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' 37 इति।

तदपि युक्तमेव— यतः

[अर्थोऽपि नैकः सुकृतो विभिन्ना
नैको हि सन यस्य कृतिः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहाया-
मार्या मतिर्यत्र गता स पन्थाः॥]

न चात्र 'उपदिष्टो धर्मः प्रतिवेदम्'38 'स्मार्तो द्वितीयः'39 'तृतीयः शिष्टागमः'40 इत्येव बोधायनाचार्यैरुक्तत्वादात्मतुष्टेः प्रामाण्यं न सम्भवतीति शङ्कनीयम। शिष्टागमपदेन तदुपलक्षण-सम्भवात्। आत्मतुष्टिश्चेहान्तिमं प्रमाणम्॥

ननु एतादृशस्यापि धर्मस्य वेदेषु, तदर्थानुवादिनीषु स्मृतिषु, तदुभयानुयायिष्वितिहासपुराणादिषु च विस्तरेण प्रतिपादितत्वात्किमिति‍र्हि सामान्यतो नायिकानायकादिवृत्तवर्णनपरे क्वचिदसद्वस्तुनिरूपणपरे, क्वचित्समीचीनवस्तुनोऽसमीचीनत्वप्रति-पादनपरे, क्वचिच्चासमीचीनवस्तुनः समीचीनताकथनपरे, अर्थ-वादबहुले च काव्यात्मके श्रीमद्रामायणे पुनः प्रतिपादनम्। न हि कृतस्यैव पुनः करणमार्या अनुमन्यन्ते। किं च 'काव्या-लापांश्च वर्जयेत' इति प्रतिषिद्धभावस्य काव्यस्य धर्मावेदकत्वमपि न संभवत्येव॥

---

37. शाकुन्तलम् I. 20.
38. बोधायनधर्मसूत्रम्— I. 1. 1.
39. Do I. 1. 3.
40. Do I. 1. 4.

काव्यस्यापि धर्मावेदकता

अत्रोच्यते—'काव्यालापांश्च वर्जयेत्' इति निषेधस्यासत्कविकृतासन्नायिकानायकादिवृत्तवर्णनपरकाव्यादिविषयत्वस्यालङ्कारिकैरेव समर्थिततया द्वितीयोक्तदोषस्यात्रानवकाश एव ।

अत एवोक्तं तैरेव—

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये ...'[41] इत्यादि ॥

परिगृह्यन्ते हि महद्भिर्महाकविप्रणीतानि सन्नायिकानायकादिवृत्तवर्णनमुखेन धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थावेदकानि महाकाव्यानि । पुरुषार्थावेदकत्वादि चोक्तं साधुकाव्यानाम्—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥' इति ॥[41a]

न केवलं परिगृह्यन्ते, स्मृतिसमानतया संमान्यन्ते च । तथाहि—भट्टाचार्याः क्वचित् ,

'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः'[42]
इति कालिदासस्मृतेः' इत्याहुः ॥

प्राथमिकोऽपि दोषो नात्र पदमाधातुमलम् । श्रुतिस्मृतयो हि कर्तव्येष्वर्थेषु पुरुषं प्रभुरिवाज्ञापयन्ति—

---

41. काव्यप्रकाशः — I. 2.
41 a. भामहालङ्कारः 1. 2.
42. शाकुन्तलम् I. 20.

'सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।'[43] इत्यादि ॥

पुराणादयोऽपि तेषु तं सुहृदिव नियुञ्जते । काव्यानि तु तेष्वेवार्थेषु तमेव पुरुषं कान्तावत्सरसतयोपदिश्य प्रयोजयन्ति । तथा ह्युक्तं विद्यानाथेन—

'यद्वेदात्प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरं
यच्चार्थप्रवणात्पुराणवचनादिष्टं सुहृत्संमितात् ।
कान्तासंमितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे ॥'[44] इति ॥

वेदोऽत्र स्मृतेरप्युपलक्षकः ॥

मम्मटभट्टाश्चाहुः—'कान्तासंमिततयोपदेशयुजे'[45] इति । तदेवं भवानेव पर्यालोचयतु, किमिदं कृतस्यैव करणमुताहो अकृतस्य करणमिति ॥

रामायणस्य धर्मवेदकता

तदेवं तत्रभवान् भगवान् महामुनिर्वाल्मीकिरप्युपादेयतया जिहासितव्यतया च धर्ममधर्मं च प्रतिपिपादयिषुः काव्यमार्गमालम्ब्यैव तत्प्रतिपादनमुक्तनयेन समीचीनं मन्यमानस्तत्रापि यस्य वा पुरुषधौरेयस्य यत्संबन्धिनां वा चरितोपवर्णनेन समग्रो धर्मः

43. तैत्तिरीयोपानिषत्— (Anandasrama Edition) Page 32.
44. प्रतापरुद्रीयम् Page 4.
45. काव्यप्रकाशः— I. 2.

सदाचारलक्षणः, तथा यद्विद्विषां चरितोपवर्णनेनाधर्मश्च तद्विपरीतः समग्रो वर्णितः स्यादिति चिन्तयानः परमपुरुषस्य पुण्यश्लोकस्य सर्वधर्मानुष्ठातू रामभद्रस्य, तत्सम्बन्धिनां सीतादीनां, तद्विद्वेषिणां रावणादीनां च चरितं देवर्षिनारदोपदेशाद्ब्रह्मणो वरप्रदानाच्च वेदोपबृंहकत्वेन परमपुरुषार्थसाधकत्वेन च लोकानुग्रहायोपनिबबन्ध श्रीमति रामायणे महाकाव्ये । अत एवास्य नामत्रयं प्रसिद्धम् 'रामायणम्, सीताचरितम्, दशशिरोवधम्' इति । 'पठन्रामायणं नरः'[46] 'सीतायाश्चरितं महत्'[47] 'दशशिरसश्च वधं निशामयध्वम्'[48] इत्याद्यत्रानुसन्धेयम् ॥

ननूक्तनयेन श्रुतिस्मृत्यनुयायिषु काव्यमार्गेषु धर्मः प्रतिपाद्यत इत्येव सङ्गतम् । कथमधर्मोऽपि प्रतिपाद्यत इत्युक्तिरिति चेत्—न केवलं धर्म एव श्रुतिषु स्मृतिषु वावेद्यते । किं तर्हि ? हेयतया अधर्मोऽपीति हि संप्रदायविद आचक्षते । अत एव च ते 'अथातो धर्मजिज्ञासा'[49] 'अथातो ब्रह्मजिज्ञासा'[50] 'वेदो धर्ममूलम्'[51] 'वेदोऽखिलो धर्ममूलम्'[52] इत्यादावकारप्रश्लेषमप्याश्रित्याधर्माब्रह्मादिष्वपि वेद एव प्रमाणमित्यभिप्रयन्ति । युक्तं चैतत् । धर्ममात्रावेदकत्वे हि श्रुतीनां विध्यात्मकतैव स्यान्न प्रतिषे-

---

46. रामायणम् I. 1. 99.
47. Do, I. 4. 7.
48. Do. I. 2. 43.
49 पूर्वमीमांसासूत्रम् I. 1. 1.
50. उत्तरमीमांसासूत्रम् I. 1. 1.
51. गौतमधर्मसूत्रम् I. 1.
52. मनुस्मृतिः II. 6.

धात्मकता । दृश्यते च बहुत्र प्रतिषेधात्मकतापीति नात्र बहु वक्तव्यम् । पश्यतात्र भगवत्पादीयं भाष्यमपि—"शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' इति सूत्रिता । अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय ॥" [53] इति ॥

अत एव भगवान् बादरायणोऽपि शारीरकमीमांसायामाह —'अशुद्धमिति चेन्न शब्दात्' [54] इति । वैदिकानां कर्मणां पशुहिंसादियुक्तत्वेनाशुद्धत्वात्पापानुबन्धितायां प्रसक्तायां हिंसाहिंसाद्यधर्मधर्मनिर्णये शब्दात्मिका श्रुतिरेव नः प्रमाणम्, न पुरुषमतिरिति, कर्माणि न तदनुबन्धीनि चोदितत्वादिति हि तदर्थः । अत्र भगवद्भाष्यकृतो वचनम्—'शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य । अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणम्, अतीन्द्रियत्वात्तयोः । अनियतदेशकालनिमित्तत्वाच्च । यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते, स एव देशकालनिमित्तान्तरेष्वधर्मो भवति । तेन शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति' । [55] इत्यादि । तस्माद्धर्मवदधर्मोऽपि हेयतया श्रुत्यादिष्वावेद्यत एवेति तदनुयायिकाव्यमार्गेष्वप्यधर्मोऽपि हेयतयावेद्यते; अथवावेदनीय एवेत्यविवादम् ॥

धर्मद्वैविध्यम्

धर्मश्चायं द्विप्रकारः । प्रवृत्तिलक्षणो निवृत्तिलक्षणश्चेति ।

---

53. उत्तरमीमांसासूत्रम् I. I. 4. (Nirnayasagar Edition Page 70)
54. Do. III. I. 25. „ Page 620)
55. Do. III. I. 25. „ „ „

तदुक्तं भगवत्पादैर्भगवद्गीताविवरणे—'स भगवान्सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुर्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम् । ततोऽन्यांश्च सनकसनन्दनादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास । द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च '[56] इत्यादि ॥

अयमत्र विभागो बोध्यः— तत्र प्रवृत्तिलक्षणो धर्मो वाङ्मनःकायाचरणीय इहँल्लोकादिब्रह्मलोकान्तफलो विधिप्रतिषेधात्मना पूर्वकाण्डेनावेद्यते । तस्य तत्फलत्वं च 'पुत्रेणैवायं लोको जय्यः, कर्मणा पितृलोकः, विद्यया देवलोकः'[57] इत्यादिषु व्यवस्थापितम् । निवृत्तिलक्षणस्तु धर्मः सर्वेषणापरित्यागपूर्वकः शमदमाद्यनुष्ठानरूप उत्तरकाण्डेनावेद्यते । परमार्थतस्तु साङ्गः सकलो वेदो निवृत्तिलक्षणधर्मपर एव, 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥'[58] 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'[59] इत्यादिश्रुतेरित्यन्यदेतत् ॥

द्विप्रकारोऽप्ययं धर्मो भगवता वाल्मीकिना श्रीमद्रामायण एव सुनिपुणमावेद्यत इति तत्त्वपरिशीलिनां करतलामलकमिति नात्र वितन्यते ॥

---

56. गीताभाष्यम् Introduction
57. बृहदारण्यकोपनिषत् I. 5. 16. (Nirnayasagar Edition Page 230, 231)
58. कठोपनिषत् 1. 2. 15.
59. बृहदारण्यकोपनिषत् IV.4. 22. (Nirnayasagar Edn.P.685

अत्र केचित्परमर्षिणा वाल्मीकिना प्रवृत्तिलक्षण एव धर्म आवेद्यते श्रीमद्रामायणे, निवृत्तिलक्षणः स योगवासिष्ठ एव इत्यभिप्रयन्ति । चतुर्वर्गफलतां महाकाव्यस्यालङ्कारिकैर्निर्णीतां ते न जानन्तीत्यन्यदेतत् । तदेवं स्थितमिदं यद्रामायणे सर्वत्र रामादिचरितस्य नानाप्रकारस्य मुखतो वर्णितत्वेऽपि तस्य धर्मतात्पर्यकतैव नान्यपरतेति, तस्य तत्तात्पर्यकतास्फुटीकरणमपि न दूरापेतमपि तु नेदिष्ठमेवेति ॥

धर्माकूतम्

अयं च धर्माकूतनामा प्रबन्धः श्रीमद्रामायणे कुत्र कुत्र द्विप्रकारोऽपि धर्मः कथं कथमावेदित इति सुनिपुणं विचार्य सोपष्टम्भं निर्धारयतीत्यन्वर्थमेव नाम धरति—' धर्माकूतम् ' इति । एतच्चोक्तं ग्रन्थकृतैव—

'अभिप्रायं धर्मे विशदयति वाल्मीकिवचसा-
मिदं प्रेक्षावन्तः सरसमभिनन्दन्तु दयया ॥ 60

इति । अन्यच्च पूर्वोक्तमत्रानुसन्धेयम् ॥

ग्रन्थगतिः

तत्र चतुर्विंशतिसाहस्रिकायां वाल्मीकिसंहितायां यावन्तः श्लोकाः न तावन्तोऽप्यत्र व्याख्यायन्ते । ये तूक्तद्विप्रकारधर्माधर्मावेदकास्ते परं विव्रियन्ते स्वोद्देशानुसारेण । विव्रियमाणाश्च ते न पूर्वव्याख्याग्रन्थेष्विव प्रतिपदयोजना—प्रसिद्धपदार्थकथन—दुरन्वयव्यवहितान्वयान्वयप्रदर्शनादिना प्रकारेण विव्रियन्ते । किन्तु

60. धर्माकूतम् Vol 1. Page 11. Verse 38

वे कुत्र कुत्र कीदृशो धर्मादीनावेदयन्ति, अखिलकर्तव्यताकर्तव्यतादिप्रकारेणासूचिताश्च ते श्रुतिस्मृतीतिहासपुराणधर्मशास्त्रादिषु कुत्र कुत्र कथङ्कारमावेद्यन्त इति सम्भवदाशङ्कानिराकरणपूर्वकं सुनिपुणं विचार्य निर्धार्यते । अयमेव चात्र व्याख्याप्रकारः ॥

ग्रन्थकृत्

प्रणेता चास्य ग्रन्थरत्नस्य सुगृहीतनामधेयः सकलकलापारावारपारीणः त्र्यम्बकमखी । स चायं तारुण्यात्प्रभृति श्रुतिचोदिताग्निहोत्रादिहवनतत्परो लौकिकेषु वैदिकेषु च व्यवहारेषु परिनिष्ठितश्चासीदिति विज्ञायते । तदुक्तं ग्रन्थकृतैव—

'तस्यानुजन्मा तरुणाग्निहोत्री
तस्यैव वात्सल्यवतः प्रभावात् ।
समुल्लसल्लौकिकवैदिकश्रीः
समीरितस्त्र्यम्बकनामधेयः ॥' 61

'अभिप्रायं धर्मे विशदयति वाल्मीकिवचसा-
मिदं प्रेक्षावन्तः सरसमभिनन्दन्तु दयया ॥' 62

ग्रन्थकृत्सोदरः

किं च, अयं कविवरः सौजन्यादिगुणगणालङ्कृतस्य प्रसादवतः समादृतबन्धुवर्गस्य स्थिरस्वभावस्य स्थितिमतोऽभिज्ञस्याविगर्हिताचारशुभान्तरङ्गस्य निबर्हिताभ्यन्तरशत्रुवर्गस्य सत्यशीलस्य शान्तमनसः प्रसन्नमुखस्य दयादृतदृष्टेर्दानशीलस्य च सुगृहीतनाम्नो

---

61. धर्माकूतम् Vol I, Page. 9. Verse 32
62. Do. I. „ 11. „ 38

नरसिंहयज्वनोऽनुजन्मेति प्रतीयते । तच्चोक्तं ग्रन्थकृतैव—

'ज्येष्ठस्तयोर्जन्मगुणोन्नतिभ्यां
प्रियः प्रकृत्या पितुरोजसा च ।
अभूदसामान्यचरित्रयोगा-
दन्वर्थनामा नरसिंहयज्वा ॥' 63

'प्रसादवानादृतबन्धुवर्गः
स्थिरस्वभावः स्थितिमानभिज्ञः ।
अगर्हिताचारशुभान्तरङ्गो
निबर्हिताभ्यन्तरशत्रुवर्गः ॥' 64

'सत्येन जिह्वां प्रशमेन चेतो
मुखं प्रसादेन दृशौ दयाभिः ।
दानेन हस्तौ च तपोभिरङ्गा-
न्यब्जासनो यस्य चिरादकार्षीत् ॥' 65

'तस्यानुजन्मा तरुणाग्निहोत्री' 66

कवेरग्रजन्मा चायं नरसिंहयज्वा चोलाधिपस्य एकोजिमहीपतेः प्रीतिपात्रं तदमात्यपदं स्वपितृपूर्वाधिष्ठितमलंचकारेति विज्ञायते । तदप्युक्तं ग्रन्थकृता—

'यत्र स्वपुत्रादपि शाहभूपा-
दरज्यत प्रत्यहमेकभूपः ।

63.	धर्माकूतम्	Vol	I	Page	8	Verse	28
64.	Do.		I	,,	9	,,	30
65.	Do.		I	,,	9	,,	31
66.	Do.		I	,,	9	,,	32

यश्च स्वतातादपि तत्र रक्तो
धुरं तदीयामवहन्नियुक्तः ॥' 67

त्रिपुरविजयचम्पूनामकस्य प्रबन्धस्यायमेव च नरसिंहयज्वा प्रणेतेति प्रसिद्धमेतत् ॥

ग्रन्थकृत्पितरौ

इमौ च नरसिंहत्र्यम्बकाभिधानावध्वरिणौ सुचरितस्यैकोजिमहीभुगमात्यस्य दिगन्तविश्रान्तयशसः शुभमतेः सर्वज्ञचूडामणेर्भरद्वाजकुलाब्धिशीतकिरणस्य बावाजियज्वात्मजस्य गङ्गाधराध्वरिणः कृष्णाम्बिकायाः सकाशादुद्भूताविति विदितमस्ति । तदुक्तं ग्रन्थकृतैव--

'तस्यैकोजिमहीपतेः सुचरितो मन्त्री दिगन्तश्रुतः
शक्रस्येव बृहस्पतिः शुभमतिः सर्वज्ञचूडामणिः ।
भारद्वाजकुलाब्धिशीतकिरणो बावाजियज्वात्मजो
मन्त्रस्तम्भितदुष्टभूपभुजगो गङ्गाधराख्योऽध्वरी ॥' 68

'श्रीगङ्गाधरमन्त्रिणोऽपि तनयौ कृष्णाम्बिकागर्भजौ ।' 69

ग्रन्थकृत्पदम्

कविवरोऽयं त्र्यम्बकयज्वा **एकोजिमहीपेन** तत्पट्टमहिष्या **दीपाम्बया** चाबाल्यान्निरतिशयप्रेम्णा संवर्धितः संशिक्षितश्च सन्मार्गेषु, एकोजिप्रभुणा स्वतनूजस्यैव शाहजिनृपेतरमात्यपदं

---

67. धर्माकूतम् Vol I Pages 8, 9 Verse 29
68. Do. I Page 5 ,, 15
69. Do. I ,, 8 ,, 27

प्रथमम, तदनु च शाहजिमहीपेन स्वानुजस्य शरभजिमहीपतेरमात्यपदं चाधिरोपितस्तादीयां धुरमवहदिति निश्चीयते । एतच्चोक्तं ग्रन्थकृतैव—

‘एकोजिप्रभुणा गुणान्तरविदा देव्या च दीपाम्बया
बाल्ये यः परिगृह्य वत्सलतया संवर्धितः सादरम ।
बुद्धीरप्युपदिश्य शाहजिमहीनेतुः स्वसूनोः स्थिरे
सोऽयं मन्त्रिपदे **त्रियम्बकमखी** स्वातन्त्र्यमासादितः ॥’70

‘भ्राता शाहमहीपतेः शरभजी राजाथ शास्ति क्षितिम् ।’ 71

‘सोऽयं ज्येष्ठपुरस्क्रियोपचरितं यं मन्त्रिवर्यं दया-
नावा प्राणमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।’ 72

ग्रन्थकृदावासः

शरभजिनृपसत्कृतः शाहजिनृपसंमानित एकोजिनृपसँल्लालितश्चायं कविधुरीणश्चोलेषु तञ्जापुराभ्यर्णसह्यजाकूले अनुकूले विराजमानं श्रीस्वामिशैलमधिवसन् श्रुतिस्मृतिचोदिताः सत्क्रियाः समाचरन्कर्मब्रह्मतत्त्वाभिलिप्सया तदुभयपरमगुरुं कुमारं स्कन्दं परया भक्त्या परिचरंश्च कालमयापयदिति परिज्ञायते । तच्चोक्तं तेनैव—

‘वृत्तिं चाकृत यस्य सह्यगिरिजाकूलेऽनुकूले श्रुति-
स्मृत्युक्ताखिलनित्यकर्मसु वसुत्यागाय भोगाय च ॥’ 73

70.	धर्माकूतम्	I	Page	10	Verse	33
71.	Do.	I	,,	10	,,	34
72.	Do.	I	,,	10	,,	36
73.	Do.	I	,,	11	,,	36

यः कौमारिलतन्त्रतः समतनोत्कर्मस्थितिं पावनीं
ब्रह्मोपादिशदादिशोकधुतये यो नारदाय स्फुटम् ।
तं स्कन्दं परिचर्य साधु परया भक्त्या तदाप्तुं मह-
त्कर्मब्रह्मफलं सुधीः कलयते यः स्वामिशैले स्थितिम् ॥' 74

ग्रन्थकृत्समयः

ग्रन्थकृदयं त्र्यंबकरायमखी भोसलभूपेन एकोजिना शिशुभाव एव परिगृह्य संवर्धितः प्रथमं स्वतनयस्य शाहजिमहीपस्य मन्त्रिपदे ततः शाहजिना स्वावरजस्य शरभजिमहीपालस्य मन्त्रिपदे च स्थापित इति ग्रन्थकृदुक्त्यैव स्पष्टं विज्ञायते । तदुक्तम्—

'एकोजिप्रभुणा गुणान्तरविदा देव्या च दीपाम्बया
बाल्ये यः परिगृह्य वत्सलतया संवर्धितः सादरम् ।
बुद्धीरप्युपदिश्य शाहजिमहीनेतुः स्वसूनोः स्थिरे
सोऽयं मन्त्रिपदे त्रियम्बकमखी स्वातन्त्र्यमासादितः ॥' 75

सोऽयं ज्येष्ठपुरस्क्रियोपचरितं यं मन्त्रिवर्यं दया-
नावा प्राणमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।
वृत्तिं चाकृत यस्य सह्यगिरिजाकूलेऽनुकूले श्रुति-
स्मृत्युक्ताखिलनित्यकर्मसु वसुत्यागाय भोगाय च ॥' 76

तत्तेषां काल एवास्यापि काल इति निश्चेतुं शक्यते । तेषां च कालः १६७६ तमात्क्रैस्तवाब्दादुपरि १७२८ तमा-

---

74. धर्माकूतम् I Page 11 Verse 37
75. Do. I ,, 10 ,, 33
76. Do. I ,, 10, 11 ,, 36

त्कैस्तवाब्दादर्वागिति विमर्शकानां दृष्टिरिति विज्ञायते ॥

तत्रापि एकोजिनः कालः 1676 – 1683 A. D; शाहजिनः कालः 1684—1710 A. D.; शरभोजिनः कालः 1711—1728 A. D इति विभागः । तदस्य कवेः कालः 1665—1750 A. D इति निश्चेतुं शक्यम् ॥

ग्रन्थसमापनकालः

कविरयं 1641 तमे शालिवाहनशके, विकार्यब्दे, आश्वयुजे मासि, शुक्लप्रतिपदि, स्थिरवासरे स्वातीयुते ग्रन्थमिमं पूरयामासेति तदुक्त्यैव निश्चीयते । यथा—

'शालीवाहनके सहस्रपरतः षट्के शतानां मते
चत्वारिंशत उत्तरे च शरदामब्दे विकार्याह्वये ।
मासेऽप्याश्वयुजे सितादिमतिथौ स्वातौ स्थिरे वासरे
धर्माकूतमिदं त्रियम्बकमखी सम्पूर्णतां नीतवान् ॥ 77

ग्रन्थमातृका

इदानीं संमुद्रितस्यास्य ग्रन्थस्य मातृकाभूतः श्रीकोशश्चोलेषु विराजमाने तञ्जापुरे नायकराजभिः (1450 A. D) समुपक्रामिते, महाराष्ट्रराजभिः (1676—1855) संवर्धिते, तत्राप्यन्तिमेन शरभाजिमहाराजेन सम्प्रतिष्ठापिते, तत एव तन्नाम्नैव प्रथिते (शरभजीमहाराजीयसरस्वतीमालाभिधाने) पुस्तकालये विद्यमानस्तन्निर्वाहकैः प्राकाश्यं नीतासु विवरण-

77. Tanjore Descriptive catalogue Page 6685

पट्टिकासु (Descriptive catalogues) पंचदशतमायां पट्टिकायां (vol 15)-6681 - 6685 पुटेषु 9377—9382 संख्यासु समुपवर्णितो दृश्यते ॥

ग्रन्थस्यास्यायोध्याकाण्डान्तो भागः श्रीरङ्गस्थश्रीवाणीविलासमुद्रणालये सुगृहीतनामधेयैः श्रीयुतैः T. K. बालसुब्रह्मण्यार्यैः भागत्रयात्मना (in 3 vols) पूर्वमेव (1916) मुद्राप्य प्रकाशतां नीतः। अतीताः समाश्चतुस्त्रिंशत् । सुचिरादप्यस्य ग्रन्थरत्नस्य शिष्टो भागः प्राकाश्यं नोपनीत इति महदेवैतद्विषादस्थानं सर्वेषां, विशिष्य चास्माकं भारतीयानाम । न केवलमिदं विषादस्थानं यावन्महदेतद्दौर्भाग्यविलसितमपि ॥

तथापि तु सम्प्रति फलोन्मुखेनास्माकीनसंचितपुण्यलेशेन सुन्दरकाण्डस्य परं व्याख्याभाग इदानीं प्राकाश्यं नीयते विदुषां प्रमोदाय इत्याश्वासकं किंचिदिदमित्यत्यल्पमिदं परितोषास्पदमपि । यत इदं ग्रन्थरत्नं समेषामपि भिन्नरूचीनां समाराधनचणं दरीदृश्यते । तदुक्तं ग्रन्थकृतैव—

'नानाशास्त्रपरिश्रमेण बहुधा यज्ज्ञानमासाद्यते
तज्ज्ञानं समुदञ्चति स्फुटतरं यामेव संश्रृण्वताम् ।
सेयं धर्मपरा मया विरचिता रामायणव्याकृतिः
श्रीरामस्य दयारसार्द्रमनसः संतुष्टये कल्पताम् ॥' 78

'ये धर्मार्थविचारणप्रणयिनो ये नीतिजिज्ञासवो
ये कामागमसंप्रदायरसिका ये मोक्षमार्गोन्मुखाः ।

---

78. Tanjore Descriptive catalogue page 6683

ये वाक्यार्थमिथोविरोधपरिहारोक्तिप्रियंभावुका-
स्ते सर्वे परिशीलयन्तु तदिदं त्रैयम्बकं वाङ्मयम ॥' 79 इति ॥

अत्र च ग्रन्थकृता व्याख्येयत्वेन समुद्धृतानां रामायण-श्लोकार्धानां, तथा तत्र तत्र विस्तारतो विचारितानां विषयाणां, विषयविचारेष्वनुस्मृतानां प्रामाणिकानां प्रमाणग्रन्थानां च संसूचिका काचिदनुक्रमणिका प्रत्येकं योजितेति नात्र ते विस्तीर्यन्ते ॥

कृतज्ञतावेदनम्

ग्रन्थरत्नस्यास्यैवमिदानीं मुद्रापणे धनदानेन साहाय्यमाचरितवतां महाशयानां मद्रपुरराज्याधिकारनिर्वाहकाणाम , पाठसंशोधननानाप्रकारानुक्रमणीनिर्माणादिविषये साहाय्यमाचरितवतां साहित्यविशारद– साहित्यशिरोमणि— वेदान्तशिरोमण्यादिबिरुदभाजां मद्रपुरराजकीयप्राच्यपुस्तकालयपण्डितपदमधितिष्ठतां व. रा. कल्याणसुन्दरशास्त्रिणाम्, तञ्जापुरस्थशरभाजिमहाराजीयसरस्वतिमालभिधानप्राच्यपुस्तकभाण्डागारगौरवकार्यदर्शिनां श्रीयुतगोपालार्याणां, समीचीनतयाविलम्बमेवास्य ग्रन्थस्य प्राकाश्यानयने कृतसमुद्यमानां श्रीरङ्गस्थश्रीवाणीविलासाख्यमुद्रणालयनिर्वाहकाणां च सादरमावेद्यते मया मदीया कृतज्ञतेति शम् ॥

इत्थम्

ति. चन्द्रशेखरः ।

सुन्दरकाण्डधर्माकूते विचारिता मुख्या विषयाः

प्रथमः सर्गः (१—६६)

उपोद्घातः

सुन्दरकाण्डस्य सुन्दरत्वनिरूपणम्	१—२९
सर्वकार्यारम्भे मङ्गलस्य कर्तव्यताप्रतिपादनम्	३०—३२
कार्यसिद्धेर्मङ्गलफलत्वकथनम्	३२—३३
कार्यभेदान्मङ्गलाचरणभेदप्रदर्शनम्	३३
बादरायणजैमिनिभगवत्पादबोधायनापस्तम्बाचार्यादिप्रबन्धानामकृतमङ्गलत्वाशङ्कानिराकरणपूर्वकं कृतमङ्गलत्वव्यवस्थापनम्	३३—३५
आदिमध्यावसानेषु मङ्गलकर्तव्यतायां प्रमाणोदाहरणनिदर्शनम्	३५—३७
पर्वसु समुद्राभिवृद्धिप्रकारप्रदर्शनम्	३७—३८
या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥

हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ।

सा विह्वलाशोकलताप्रताना वनस्थली शोकलताप्रताना ।
जाता लतास्य प्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥

इत्यादौ अनर्थकानां मन्तादिवर्णानां, भिन्नार्थकानां शोकलताप्रतानेति वर्णानां क्रमादावृत्तेः, अनर्थकभिन्नार्थकसार्थकानर्थकान्यतमवर्णावृत्तिरूपः **यमकाख्यः शब्दालङ्कारः** । उक्तं च एतादृशावृत्तेर्यमकत्वम्— 'अनर्थका वा भिन्नार्थाः सार्थकानर्थकाश्च वा । आवर्तन्ते क्रमाद्वर्णा यदा स्याद्यमकं तदा ॥' इति । [1]एवं सर्वेऽपि पादभागावृत्तिनिबन्धनाः [यमका द्रष्टव्याः] । तत्रापि 'सा विह्वला' इत्यत्र द्विधाविभक्तपादान्तिमभागस्यावृत्तिः । [2]तत्रापि प्रथमपादान्त्यस्य द्वितियपादान्ते[3] तृतीयपादान्त्यस्य चतुर्थपादान्ते वावृत्तिः । इतरत्र चतुर्धाविभक्तप्रथमपादान्तिमभागस्य द्वितीयतृतीयचतुर्थपादान्तेषु[4] आवृत्तिः । एते च पादभागावृत्तिनिबन्धनाः

1 एते. 2 तदा. 3 न्त्ये. 4 न्त्येषु.

यमकभेदाः काव्यप्रकाशिकाकाव्यदर्पणादौ विस्तरेण प्रतिपादिता गौरवभयात् न लिख्यन्ते। उदाहृतं च दण्डिना काव्यादर्शे—
'तव प्रिया सच्चरिताप्रमत्त या विभूषणं धार्यमिहांशुमत्तया।
रतोत्सवामोदविशेषमत्तया न मे फलं किंचन कान्तिमत्तया॥'
इति॥

स तस्य गिरिवर्यस्य तले नागवरायुते।
तिष्ठन् कपिवरस्तत्र ह्रदे नाग इवाबभौ॥

ववृधे रामसिद्ध्यर्थं समुद्र इव पर्वणि।

सलिलं संप्रसुस्राव मदं मत्त इव द्विपः।

पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले।
चक्षुषी संप्रकाशेते चन्द्रसूर्याविवोदितौ॥

तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः।
गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः॥

स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम्।
करेणुभिरिवारण्ये परिकीर्णो महाद्विपः॥

इत्यादौ उपमानत्वोपमेयत्वयोग्ययोः हनूमन्नागयोः हनूमत्समुद्रयोः [1]द्विपपर्वतयोः हनूमल्लोचनचन्द्रसूर्याणां द्विपरावणयोश्च सहृदयहृदयाह्लादनसमर्थचारुसादृश्यस्य व्यंग्यमर्यादां विना प्रतीतेः उपमानोपमेयत्वयोग्यवस्तुद्वयहृद्यसादृश्यरूपः उप-

---

1 द्वी.

मालङ्कारः । उक्तं चैतादृशसादृश्यस्योपमालङ्कारत्वं अर्थचित्रमीमांसायाम्— 'उपमानोपमेयत्वयोग्ययोर्वस्तुनोर्द्वयोः । हृद्यं साधर्म्यमुपमेत्युच्यते काव्यवेदिभिः ॥' इति । चन्द्रालोकेऽपि—'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।' इति । व्याख्यातश्चायं श्लोकः कुवलयानन्दे— 'यत्रोपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारु सादृश्यं उद्भूततया लसति; व्यंग्यमर्यादां विना स्पष्टं प्रकाशते, तत्रोपमालङ्कारः' इति ; उदाहृतं च तत्र— 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।' इति ; इयं च पूर्णोपमा इत्युच्यते । उपमानोपमेयतदुभयसाधारणधर्मभूतनागहनूमदवस्थानादिप्रतिपादकानां 'नागः' 'कपिवरः' 'तिष्ठन्' इत्यादिशब्दानां उपमावाचकस्य इवादिशब्दस्य च उपादानात् ॥

या भाति लक्ष्मीर्भुवि मन्दरस्था
तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था
रराज सा चारुनिशाकरस्था ॥

राक्षसेन्द्रमहासर्पान् स रामगरुडो महान् ।
उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥

इत्यादौ (अनुभयाभेदं?) रूपकालङ्कारः । तथा हि— प्रसिद्धोपमानभावपद्मादिवस्त्वन्तररूपेण वर्णनीयमुखादेः रञ्जनं रूपकं इति रूपकालङ्कारलक्षणम् । तच्च सामान्यतो द्विविधम्— अभेद-

रूपकं ताद्रूप्यरूपकं चेति । प्रसिद्ध[1]विषय्यभेदपर्यवसितमभेदरूपकम् । प्रसिद्धविषयिभेदे प्रतीयमान एव तदीयधर्मारोपमात्रपर्यवसितं ताद्रूप्यरूपकम् । द्विविधमपि प्रत्येकं त्रिविधम्, न्यूनाधिकानुभयोक्ति[2]भेदात् । तथा च चन्द्रालोके— 'विषय्यभेदताद्रूप्य[3]रञ्जनं विषयस्य [4]यत् । रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ॥' इति । व्याख्यातं च कुवलयानन्दे— विषयि उपमानभूतं पद्मादि । विषय[5]ः उपमेयं वर्णनीयं मुखादि । तथा च विषयिणो रूपेण विषयस्य रञ्जनं रूपकं, अन्यरूपेण रूपवतः करणात् । तच्च क्वचित्प्रसिद्धविषय्यभेदपर्यवसितम् । क्वचिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रपर्यवसितम् । ततश्च रूपकं तावद्द्विविधम्—अभेदरूपकं ताद्रूप्यरूपकं चेति । द्विविधमपि प्रत्येकं त्रिविधम् । विषय्याधिक्यवर्णनेन तन्न्यूनत्ववर्णनेनानुभयोक्त्या च । आहत्य षड्विधं रूपकमिति । तदुदाहरणानि च चन्द्रालोके एव दर्शितानि— 'अयं हि धूर्जटिः साक्षात् येन दग्धाः पुरः क्षणात् । अयमास्ते विना शंभुस्तार्तीयीकं[6] विलोचनम् । शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् । अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना । साध्वीयमपरा लक्ष्मीरसुधासागरोदिता । अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ॥' इति । तत्र 'अयं हि' इत्यर्धे 'येन दग्धाः' इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धशिवाभेदानुरञ्जनात् शिवस्य पूर्वावस्थातः वर्णनीयराजभावावस्थायां न्यूनत्वाधिक्ययोरवर्णना-

---

1 विषय. 2 यभे. 3 प्यं 4 तत्. 5 स्तद्रुप० 6 यकं

द[1] नुभयाभेदरूपकम् । 'अयमास्ते' इत्यर्धे तृतीयलोचनप्रहाणोक्त्या न्यूनत्वप्रतिपादनात् न्यूनाभेदरूपकम् । न्यूनत्ववर्णनमपि अभेदतात्पर्यापादकत्वात् चमत्कारकारि । 'शंभुर्विभ्रम्' इत्यर्धे विषमदृष्टित्वपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायां उत्कर्षविभावनादधिकाभेदरूपकम् । एवं 'अस्या मुखेन्दुना' इत्यादिषु ताद्रूप्यरूपकोदाहरणेषु अनुभयन्यूनाधिकभावा उन्नेयाः । 'या भाति लक्ष्मीः' इति प्रकृतोदाहरणेषु वर्णनीयनिशाकरस्थितलक्ष्म्या मन्दरादिस्थितलक्ष्म्यभेदस्य 'या सा' इति यत्तच्छब्दाभ्यां अनुरञ्जनात्, राक्षसेन्द्राणां रामस्य च प्रसिद्धोरगगरुडाभेदानुरञ्जनात्, मन्दरादिस्थितलक्ष्म्यादेर्वर्णनीयनिशाकरस्थितलक्ष्मीभावावस्थायां न्यूनाधिकभावाप्रतिपादनाच्चानुभयाभेदरूपकालङ्कारो द्रष्टव्यः ॥

रावणाननशंकाश्च काश्चिद्रावणयोषितः ।
मुखानि स्म सपत्नीनामुपाजिघ्रन्पुनः पुनः ॥

इत्यादौ भ्रान्तिमदलंकारः । तथा हि— स्वासाधारणधर्मेणानवगते वस्तुनि कविसंमतसादृश्यादारोप्यमाणधर्मानुभवो यत्र स भ्रान्तिमानित्युच्यते । तदुक्तम् **चित्रमीमांसायाम्**— 'कविसंमतसादृश्याद्विषये पिहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः ॥' इति । उदाहृतं च तत्र— 'कपाले मार्जारी पय इति करान् लेढि शशिनस्तरुच्छिद्रप्रोता-

---

1 चा.

म्बिसमिति करी संकलयति । रतान्ते तल्पस्थान्हरति वनिताप्यं-सुकमिति शुभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति ॥' इति ॥

शंकाहतात्मा दध्यौ सः कपीन्द्रं तेजसावृतम् ।
किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ॥

येन शप्तोऽस्मि कैलासे मया संचालिते पुरा ।
सोऽयं वानरमूर्तिः स्यात् किंस्विद्बाणो महासुरः ॥

वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणोऽनिलो वा।
रुद्रोऽग्निरर्को धनदश्च [1]सोमो न वानरोऽयं स्वयमेव कालः ॥

इत्यादौ **ससन्देहालङ्कारः** । तथा हि— अप्रकृतार्थस्य[2] सादृश्यात् प्रकृतार्थाश्रयानिर्धारणरूपा धीर्यत्र वर्तते स ससन्देहः । तदुक्तं **चित्रमीमांसायाम्**— 'साम्यादप्रकृतार्थस्य या धीरनवधारणा । प्रकृतार्थाश्रया तज्ज्ञैः ससन्देहः स इष्यते ॥' इति । उदाहृतं च तत्रैव— 'आनीय द्विषतां धनानि विपिने राजन्यचूडामणे तेष्वालोक्य विनिर्मलं हिमजलाखण्डं करण्डं पुनः । किं वाद्यं किमु पेषणं किमु धनं किं क्षेपणीयायुधं किं वा दैवतमित्यनिश्चितधियो मन्दाः पुलिन्दा जनाः ॥' इति । अत्र अरातिगृहानीतधनेषु कस्मिंश्चित् करण्डस्वरूपे (धनेन आर ?) वर्तुलत्वादिना अप्रकृतवाद्यादिसादृश्येन अनिर्धारणधीसत्त्वात्ससन्देहः । प्रकृतोदाहरणेऽपि 'शङ्काहतात्मा' इत्यत्र तेजोऽतिशयवत्त्वा[3]द्यप्रकृतसादृश्यात् (सादृश्ये तत्?) प्रकृतहनूमदाश्रयानवधारणज्ञानसत्त्वात्ससन्देहालङ्कारः इति । 'न

---

1 सा. 2 स्य प्र. 3. त्वसादृश्यात्

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, **Rajah Serfoji,** has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous **"Sarasvati Mahal Library".** It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.

वानरोऽयं स्वयमेव कालः' इत्यत्र वर्णनीये हनूमति वैवस्वतत्वारोपाय वानरत्वा[1]पह्नवाच्छुद्धापह्नवालङ्कारः इति । धर्मान्तरारोपार्थं विद्यमानधर्मापह्नवस्य शुद्धापह्नवालङ्कारलक्षणत्वमुक्तं चन्द्रालोके– 'शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः' इति । उदाहृतं च तत्रैव–'नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्' इति ॥

स गन्धस्तं महासत्वं [2]बन्धुर्बन्धुमिवोत्तमम् ।
इत एहीत्युवाचेव तत्र यत्र स रावणः ॥

पुप्लुवे कपिशार्दूलो विकर्षन्निव रोदसी ।
फलतीवास्य घोषेण गगनं सार्कमण्डलम् ॥

इत्यादौ वस्तूत्प्रेक्षालङ्कारः । तथा हि— अन्यधर्मनिमित्तेनान्यस्मिन्नन्यतादात्म्यसंभावनमुत्प्रेक्षेत्युच्यते । सा च त्रिविधा— वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा, फलोत्प्रेक्षा चेति । तत्र कस्यचिद्वस्तुनः वस्त्वन्तरतादात्म्यसंभावना वस्तूत्प्रेक्षा । अहेतोर्हेतुत्वसंभावना हेतूत्प्रेक्षा । अफलस्य फलत्वसंभावना फलोत्प्रेक्षा । तत्र वस्तूत्प्रेक्षा द्विविधा— उक्तविषया अनुक्तविषया चेति । हेतुफलोत्प्रेक्षे अपि प्रत्येकं द्विविधे– सिद्धविषये असिद्धविषये चेति । तथा च षड्विधा उत्प्रेक्षा । तदुक्तम्— 'संभावना [3]स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदाद्या तु सिद्धासिद्धास्पदे परे ॥' इति । उदाहृतं च— 'धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् । लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः । रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् । त्वन्मुखाभेच्छया

1 त्वापवादा 2 बन्धुं ब. 3 स्युरु

नूनं पद्मे वैरायते शशी । मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः । प्रायोऽब्जं त्वत्पदे़नैक्यं प्राप्तुं तोये तपस्यति ॥' इति । तत्र 'धूमस्तोमम्' इत्यर्धे रजनीमुखे सर्वत्र निसृत्वरस्य तमसः नैल्यदृष्टिप्रतिरोधकत्वादिधर्मसंबन्धेन गम्यमानेन निमित्तेन सद्यः प्रियविघटितसर्वदेशास्थितकोकाङ्गनाहृदयगतप्रज्वलिष्यद्विरहानलधूमस्तोमतादात्म्यसंभावनेति स्वरूपोत्प्रेक्षा, तमसो विषयस्योपादानादुक्तविषया । 'लिम्पतीव' इत्यर्धे तमोव्यापनस्य नभःप्रभृति भूपर्यन्तं सकलवस्तुसान्द्रमलिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादात्म्योत्प्रेक्षा नभःकर्तृकवर्षणतादात्म्योत्प्रेक्षा च अनुक्तविषया स्वरूपोत्प्रेक्षा, उभयत्रापि विषयभूततमोव्यापनस्यानुपादानात् । 'रक्तौ तव' इत्यर्धे स्वतःसिद्धे रक्तिम्नि वस्तुतो भूविक्षेपणं न हेतुरिति अहेतोस्तस्य हेतुत्वेन संभावना हेतूत्प्रेक्षा, विक्षेपणस्य विषयस्य सत्त्वात्सिद्धविषया । 'त्वन्मुखे 'त्यर्धे चन्द्रपद्मविरोधे स्वाभाविके नायिकावदनकान्तिप्रेप्सा न हेतुरिति तत्रापि[1] अहेतोः हेतुत्वसंभावना हेतूत्प्रेक्षा, वस्तुतस्तथेच्छाया अभावात् असिद्धविषया । 'मध्यः किम्' इत्यर्धे मध्यः स्वयमेव कुचौ धरति, न तु कनकदामबन्धत्वेनाध्यवसितताया वलित्रयशालिताया बलादिति मध्यकर्तृककुचधृतेः तत्फलत्वेनोत्प्रेक्षा सिद्धविषया फलोत्प्रेक्षा । 'प्रायोऽब्जं' इत्यर्धे जलजस्य जले निजावस्थितेरुदवासतपस्त्वेनाध्यवसितायाः कामिनीचरणसायुज्यप्राप्तिर्न फलमिति तस्या गगनकुसुमायमानायाः तपःफलत्वेनोत्प्रेक्षणमिति असिद्धविषया

1. पि हेतु

फलोत्प्रेक्षा इति । प्रकृतोदाहरणेऽपि **‘स गन्धस्तं महासत्वम्’** इत्यत्र रावणावस्थानदेशसंभूतवांतसमानीतविविधभक्ष्यपेयद्रव्यगतगन्धे, आह्वाना[1]कर्तरि आह्वानकर्तृनिष्ठेन संबोध्यगततद्देशगमनानुकूलव्यापारवत्त्वेन निमित्तेन तत्तादात्म्याध्यवसानाद्वस्तूत्प्रेक्षा । ‘पुप्लुवे कपिशार्दूलः’ इत्यत्रापि हनूमत्कर्तृकाकाशगमनरूपप्लवनस्य द्यावापृथिवीकर्षणभिन्नस्य सतः वेगातिशयवन्निष्ठत्वेन निमित्तेन तदभेदसंभावनात् वस्तूत्प्रेक्षा इति ॥

त्रयाणामेव भूतानां सागरस्येह लङ्घने ।
शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥

इत्यादौ वेगादिरूपगुणोत्कृष्टाभ्यां मारुतवैनतेयाभ्यां तुल्यतया हनूमतो वर्णनात् तुल्ययोगिता । गुणोत्कृष्टैः तुल्यतां विधाय वर्णनस्य तुल्ययोगितात्वम् । उक्तं च चन्द्रालोके— ‘गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता’ इति । उदाहृतं च— ‘लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ’ इति । अत्र वर्णनीयो राजा शक्रादिभिर्लोकपालत्वेन समीकृतः ॥

समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ।
विकृतं च विरूपं च सर्वस्य च भयावहम् ॥

इत्यत्र,

घातयेत्परमामर्षी सर्वैः सार्धं हि राक्षसैः ।
रावणं राघवो घोरे भार्याहर्तारमाहवे ॥

---

1 नक

इत्यत्र,

ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः ।

इत्यत्र च परिकरालङ्कारः । तथा हि—‘विकृतं च’ इत्यादि-विशेषणस्य भयहेतुत्वाभिप्रायत्वात् , ‘भार्याहर्तारम् ’ इति विशेषणस्य पुत्रपौत्रमित्रभ्रात्रादिनिखिलनिशाचरसहितरावणवधे निजाश्रमोचितनिखिलवैध[1]कर्मसहायभूतायाः स्वैकशरणायाः सीतायाः प्रसह्य हरणं हेतुरित्यभिप्रायत्वात्, ‘विहताशाः’ इत्यस्य राक्षसीनामनुद्योगे आशाविघातो हेतुरित्यभिप्रायत्वाच्च साभिप्राय-विशेषणत्वात्परिकरः । तदुक्तम्– ‘अलंकारः परिकरः साभिप्राये विशेषणे’ इति । उदाहृतं च– ‘सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः’ इति । अत्र ‘सुधांशुकलितोत्तंसः’ इति विशेषणं तापहरणसामर्थ्याभिप्रायगर्भम् ॥

योजनानां शतं धीमान् तीर्त्वाप्युत्तमविक्रमः ।
अनिःश्वसन्कपिस्तत्र न ग्लानिमधिगच्छति ॥

इत्यादौ शतयोजनविस्तीर्णार्णवतरणरूपग्लानिकारणे जाग्रत्यपि ग्लानिलक्षणकार्यानुत्पादकथनात्कारणपौष्कल्ये सत्यपि कार्यानिष्पत्तिरूपा विशेषोक्तिः । उक्तं चोक्तरूपकार्यानुत्पत्तेर्विशेषोक्तित्वम्— ‘कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे’ इति। उदाहृतं च— ‘हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि’ इति॥

अतुष्टं स्वेषु दारेषु चलितं चपलेन्द्रियम् ।
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥

1. वैतान

लक्षणम्, शृङ्गाररसत्रिभागश्च उदाहरणावसरे एव प्रदर्शयिष्यते इति नेह प्रदर्श्येते ॥

तत्र,

ततो वराङ्गाः सुविशुद्धभावाः
तेषां स्त्रियस्तत्र महानुभावाः ।
प्रियेषु पानेषु च सक्तभावा
ददर्श तारा इव सुप्रभावाः ॥

श्रिया ज्वलन्तीस्त्रपयोपगूढा
निशीथकाले रमणोपगूढाः ।
अन्याः पुनर्हर्म्यतलोपविष्टा-
स्तत्र प्रियाङ्केषु सुखोपविष्टाः ॥

इत्यादौ शृङ्गाररसः । नायिकानायकरूपेष्टवस्तुविषयकप्रीत्यात्मकरतेः नायिकादिभिरालम्बनविभावैः, तदीयलावण्यादिभिरुद्दीपनविभावैः, नायिकानायकपरिरम्भणादिरूपानुभावैः, व्रीडादिभिर्व्यभिचारिभिश्चापादितस्वादिम्नः (रसस्य ?) स्थाय्यन्तरैरविच्छेदेन स्थायित्वात् । उक्तं च इष्टवस्तुविषयकप्रीतेः रतित्वं, रतेश्च स्थायित्वे शृङ्गाररसत्वम्— 'मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः ।' 'स्थायी रतिर्यत्र मतः स शृङ्गाररसः स्मृतः ।' इति । अयं च संभोगरूपत्वात् संभोगशृङ्गारः । तत्रापि 'रमणोपगूढाः' इत्यन्ते नायकारब्धः, 'अन्याः पुनः' इत्यत्र तु नायिकारब्धः इति विवेकः । प्रदर्शितश्चायं भेदः काव्यदर्पणे— 'संभोगोऽत्रालोकनादिभेदाद्ययनेकधा । तथापि कामिनीकान्तारब्धभेदा-

द्विधा मतः ॥' इति। उदाहृतं च— 'शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्। विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥' इति। अत्र वासगृहं शून्यं विलोक्य शयनाच्छनैः किंचिदुत्थाय प्रेयस्या अनुरागशोधनाय कपटनिद्रामुपागतस्य पत्युर्मुखं सुचिरं निरीक्ष्य विस्रब्धं परिचुम्ब्य जातपुलकां पत्युर्गण्डस्थलीमालोक्य नम्रमुखी बाला हसता प्रियेण चिरं चुम्बितेति वाच्यार्थकक्ष्या शब्दार्थानुशासनमात्रविदां गोचरः। शून्यवासगृहविलोकनमुत्थानस्य, उत्थानं मुखनिर्वर्णनस्य, तच्च परिचुम्बनस्य, तच्च पुलकोद्गमस्य, तदवलोकनं च लज्जायाः, सा च मुखावनतेः, सा च प्रियचुम्बनस्य कारणभावमालम्बते। इत्थं वैचित्र्यकक्ष्या त्वालङ्कारिकाणां गोचरः। ध्वन्यध्व[1]नीनानां तु संभोगशृङ्गारश्चर्वणैकपथमध्यास्ते। तथा हि— शून्यमिति विजनतया चुम्बनयोग्यता, वासगृहमिति स्रक्चन्दनादिसामग्रीसमग्रतयोद्दीपकता, [2]विलोक्येति [[3]विलोकनस्य पौनःपुन्यलक्षणो न विशेषः, तेन च न मौग्ध्यातिशयः, किंचिदुत्थायेति पूर्वकायमात्रेण शय्यापरित्यागः, तेन च नायकोरुसन्दानितोरुकाण्डता, शनैरिति मिथः सन्दानितोरुसंक्षोभेण] पत्युरुत्थानभीरुता, उपागतस्येति व्याजनिद्रायास्तदानीमेव प्राप्तिः, तथा च व्याजनिद्रोपक्रमसमय एव तया 'चुम्बितमुपक्रान्तमिति तस्या अनुरागातिशयः, सुचिरमिति सुचिरं निर्वर्णनेऽपि व्याजनिद्रा-

---

1 नीतानां 2. विलोरूक्षन० 3. स्थलान्तरे (P. 24) विपर्यस्य निविष्टमौचित्यादत्र संयोजितम्।

निश्चयाभावात् तस्या मौग्ध्यातिशयः, तस्य व्याजनिद्रागोपने नैपुण्यम्, पत्युरिति वोढृत्वमात्रम्, न तु पूर्वमुपभोक्तृत्वम्, विस्रब्धमित्यविमृश्यकारितायाः परा काष्ठा, परिचुम्ब्येति चुम्बनस्य परितः स्वाच्छन्द्येन प्रवृत्तिः, जातपुलकामिति पुलकानामवशादाविर्भावः, आलोक्येति ईषदवलोकनमात्रेणे[1]त्ययमर्थः । नम्रमुखीति; न तु नामितमुखीत्ययमर्थः । तेन च लज्जातिशयादस्या मुखानमनेऽपि न स्वातन्त्र्यम्, तत्तु लज्जयैव स्वयं नतामित्यर्थः । पत्युरिति प्राङ्निर्दिश्य प्रियेणेति प्रतिनिर्देशात्, तदानीं तस्य अधिकप्रेमविषयत्वम्, हसतेति तदनुरागपरिज्ञानेन तस्य हर्षातिशयः, बालेति चौर्य[2]चुम्बनाचातुर्यम्, चिरमिति यावता समयेन लज्जामवधूय संभोगप्रस्तावाङ्गीकारः, तावत्कालं चुम्बितेति व्यज्यते । अत्र विस्रब्धपरिचुम्बनान्तशृङ्गारस्य नायिकारब्धत्वम् । 'प्रियेण हसते'त्यादौ नायकारब्धत्वं च । तेन संभोगशृङ्गारद्वयमपीहाभिव्यज्यते । अत्र नायकविषयकरतेः नायक एवालम्बनविभावः । शून्यवासगृहादिकमुद्दीपनविभावः । किंचिदुत्थानादिकमनुभावः । तदनुमितौत्सुक्यादयो व्यभिचारिणः । नायिकाविषयकरतेः नायिकैवालम्बनविभावः । हासोऽनुभावः । तदनुमितहर्षादयो व्यभिचारिण इति ध्येयम् । अत्र संभोगस्य द्वयारब्धत्वेऽपि[3] प्राधान्येन नायिकारब्धत्वात् नायिकारब्धस्यैवेदमुदाहरणमिति नायकारब्धस्य उदाहरणान्तरं तत्रैव प्रदर्शितम्— 'त्वं मुग्धाक्षि विनैव कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीणिकासंस्पृशि । शय्यो-

---

1 ण त्वयमर्थः 2 चुम्बनचातु 3 रब्धेऽपि

पान्तनिविष्टसस्मितवधूनेत्रोत्सवानन्दितो निर्यातः शनकैरलीक-वचनोपन्यासमालीजनः' ॥ हे मुग्धाक्षि त्वं कंचुलिकया निचोलेन विनैव मनोहारिणीं लक्ष्मीं धत्से इत्यभिधायिनि प्रियतमे तद्वेणिकां निचोलबन्धनग्रन्थिं संस्पृशति सति रिरंसाविर्भावे तच्छय्योपान्ते निविष्टा सस्मिता च या नायिका तस्या नेत्रोत्सवेन नेत्रोल्लासेन आनन्दितः (आनन्दिक्येति विलोकनस्य पौनःपुन्यलक्षणो न विशेषः, तेन च न मौग्ध्यातिशयः । किंचिदुत्थायेति पूर्वकायमात्रेण शय्यापरित्यागः । तेन च नायकोरुसंदानितोरुकाण्डता। शनैरिति मिथः सन्तानितोरुसंक्षोभेण पत्युत) आलीजनः अलीकवचनोपन्यासं 'दशत्यसौ परभृतः सहकारस्य मञ्जरीम्। तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम् ॥' इत्यादिरलीको मिथ्याभूतो वचनोपन्यासो यत्र क्रियायां यथा भवति तथा । शनकैरेकैकशः, युगपदपगमस्य शङ्कावहत्वात् । निर्यात इत्यत्र नायिकाविषयकरतेर्नायिकालम्बनम् । तद्वेणिकासंस्पर्शनादिकमनुभावः । 'अभिधायिनि' 'संस्पृशि' इत्यभिधानसंस्पर्शयोरेककालत्वप्रतीतेस्तदनुमितकालाक्षमत्वलक्षणमौत्सुक्यं व्यभिचारीति संभोगो व्यज्यते ॥

हा तात हा पुत्रक कान्त मित्र
हा जीवितं भोगयुतं सुरम्यम् ।
रक्षोभिरेवं बहुधा ब्रुवद्भिः
शब्दः कृतो घोरतमः सुभीमः ॥

इत्यादौ कपिजातिस्वभाववर्णनात् जात्यादिस्वभाववर्णनरूपः स्वभावोक्तिरलङ्कारः। उक्तं च [जात्यादिस्वभाववर्णनस्य स्वभावोक्तित्वम्]— 'स्वभावोक्तिरलङ्कारः जात्यादिस्थस्य वर्णनम्' इति। उदाहृतं च— 'कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्षितम्' इति॥

यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः।
बद्ध्वा राक्षसराजानमानयिष्यामि रावणम्॥
आनयिष्यामि वा लङ्कां समुत्पाट्य सतोरणाम्॥

इत्यत्र रावणसतोरणलङ्कानयनवर्णनात् अद्भुतातथ्यशौर्यवर्णनरूपात्युक्तिः। उक्तं च अद्भुतातथ्यशौर्यवर्णनस्यात्युक्तित्वम्— 'अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम्।' इति। उदाहृतं च— 'त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः। राजन् सम्प्राप्यकूपारास्त्वत्प्रतापाग्निशोषिताः॥' इति॥

स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता।
रामेण संगता सीता भास्करेण प्रभा यथा॥

ततो ह्यद्य मया दृष्टो रामः सत्यपराक्रमः।
लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान्॥

आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम्।
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः॥

इत्यादौ भाव्यर्थसाक्षात्कारवर्णनाद्भाविकालङ्कारः। उक्तं च

भूतभाव्यर्थान्यतरवर्णनस्य भाविकत्वम्— 'भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनम् ।' इति । उदाहृतं च—'अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः' इति । एवमलङ्कारान्तराण्यपि तत्र तत्र द्रष्टव्यानि, विस्तरभयात् इह नोदाहृतानि ॥

अथ रसभरितत्वं निरूप्यते । तथा हि—विभावैरनुभावैः सात्विकैर्व्यभिचारिभिश्च स्वाद्यमानमानीयमानःस्थायीभावो(रति?) रस इत्युच्यते । तदुक्तं दशरूपके— 'विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः ॥' इति । विभावादयश्च प्रतिपादिताः काव्यदर्पणे— 'कारणान्यथ कार्याणि सहकारीणि यानि च । रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥ विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः ॥' इति । तद्व्याख्या हि तत्रैव— लोके हि यौवनोद्भिन्नचित्तयोर्यूनोरन्योन्यसंदर्शनादिना प्रीतिरुत्पद्यते । सा च तदीयलावण्यालङ्करणादिभिस्तटस्थैरुद्यानमन्दसमीरणचन्द्रादिभिश्च, उद्दीपितोत्कण्ठापरनामधेया अभिलाषाकारेण परिणमते । तथाविधां च प्रीतिं रतिमाचक्षते । ततश्च मिथः संगत्युपायं जिज्ञासमानयोर्यूनोश्चिन्ताग्लानिशंकाविषादादयः प्रादुर्भवन्ति । तदनु च प्रीत्या चिन्तादिभिश्च तदुभयव्यञ्जिकाः चेष्टा जायन्ते । तदनन्तरं स्वयं दूतीप्रेषणेन वा संगमे जाते सा प्रीतिरुत्तरोत्तरं उज्जृम्भते । चिन्तादयः पुनः अपगच्छन्तीति स्थितिः । एवं रसान्तरेष्वप्युन्नेयम् । तथा च लोके काव्यनाट्यव्यतिरिक्तनायिकानायकव्यवहारस्थले स्थायी यो रत्यादिस्तस्य यानि कारणानि नायिकानायकरूपाणि तदीयलावण्यालङ्करणोद्यान-

मन्दसमीरणादीनि च, यानि च रत्यादेश्चिन्तादेश्च कार्याणि कटाक्षभुजाक्षेपस्तम्भप्रलयरोमाञ्चादीनि, यानि च रत्यादेः सहकारीणि परिपोषहेतुभूतानि निर्वेदचिन्तादीनि तानीमानि कारणादीनि नाट्येऽभिनयप्रधाने (न ?) नटव्यापारे साक्षात्कार-योग्ये, काव्ये गुणालङ्कारादिविशिष्टे श्राव्ये, सन्दर्भविशेषे च यदि स्युः, तदा कारणानि विभावा इति कथ्यन्ते— विशेषेण रत्यादयोऽमीभिर्भाव्यन्ते इति व्युत्पत्तेः । यानि च कार्याणि, तानि च अनुभावा इत्युच्यन्ते, रत्यादिकं चिन्तादिकं च अनु-भावयन्ति अनुमापयन्ति इति व्युत्पत्तेः । यानि च सहकारिकार-णानि तानि व्यभिचारिण इति कथ्यन्ते, विविधं आभिमुख्येन चरन्ति इति व्युत्पत्तेः ॥

तत्र द्विविधो विभावः— आलम्बनविभावः उद्दीपन-विभावश्चेति । यानालम्ब्य विषयीकृत्य रत्यादयो जायन्ते, ते नायिकानायकादयः आलम्बनविभावाः । तदीयलावण्यादयः चन्द्रमन्दसमीरणादयश्च उद्दीपनविभावाः, जातं रत्यादिकं उद्दीपयन्ति अभिलाषाद्याकारेण परिणमयन्तीति व्युत्पत्तेः इति भट्टलोल्लटप्रभृतयः । यद्यपि उद्दीपनानां न रत्यादिजनकत्वम्, तथापि विशेषाकारपरिणामजनकत्वात् कारणत्वं इति ध्येयम् । व्यभिचारिणस्तु त्रयस्त्रिंशद्भेदाः । तदुक्तम्— ‘ निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः । आलस्यं चैव दैन्यं च चिन्ता मोहो धृतिः स्मृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधि-

स्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्याता-स्तु नामतः ॥ ' इति । सात्विका अपि तत्रैव प्रतिपादिताः ' स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्य-मित्यष्टौ सात्विकाः परिकीर्तिताः ॥ ' इति । तथा च नायिका-नायकादिभिः आलम्बनविभावैस्तदीयलावण्यालङ्करणचन्द्रमन्द-समीरणादिभिश्चोद्दीपनविभावैः कटाक्षभुजाक्षेपादिभिरनुभावैः स्तम्भादिभिः सात्विकैर्निर्वेदादिभिर्व्यभिचारिभिश्च स्वादुभावमापा-द्यमानः स्थायी भावो रस इति रसविदां स्थितिः । विरुद्धैः स्थाय्य-न्तरैरविरुद्धैर्व्यभिचार्यादिभिर्यो न विच्छिद्यते, अथ च अन्यान्विभावादीनात्मना सह स्वादुविषयतां नयति, स स्थायी इत्युच्यते । तदुक्तम्—' विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः । आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥ ' इति । यद्वा वासनया ये चिरं चित्तेऽवतिष्ठन्ते, विभावादिभिः अनुबन्धि-भिः संबध्यन्ते, ततः प्रवृद्धाः सन्तः रसत्वं प्रतिपद्यन्ते, ते स्थायिन इत्युच्यन्ते । तदुक्तम्—' चिरं चित्तेऽवतिष्ठन्ते संबध्यन्ते-ऽनुबन्धिभिः । रसत्वं प्रतिपद्यन्ते प्रवृद्धाः स्थायिनस्तु ते ॥ ' इति । तदेवमुक्तलक्षणलक्षितः स्थायी भावो विभावादिभिः स्वादुतां नीयमानो रस इति निर्गलितार्थः ॥

स च रसः शृङ्गारादिभेदेन नवविधः । तदुक्तम् ' शृङ्गार-हास्यकरुणा रौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ ' इति । अत्र नाट्यग्रहणात् काव्येष्वेत-दतिरिक्तः शान्तिर्नाम रसोऽस्तीति तद्व्याख्यायाम् । शृङ्गारादीनां

इत्यादौ 'अतुष्टं' इत्यंशेन स्वीयदारेषु संतोषाभावप्रतिपादनेन 'चलितं' 'चपलेन्द्रियं' इति विशेषणद्वयेन विषयलोलुपत्वावशीकृतेन्द्रियत्वप्रतिपादनेन च परदाराभिरक्तत्वेनावगतस्य पुंसः परदारकर्तृकपराभवप्रतिपादनात् स्वाभिमतकार्यानिष्पत्तिपूर्वकानिष्टावाप्तिरूपो विषमालङ्कारः । इष्टानवाप्तिपूर्वकानिष्टप्राप्तेश्च विषमालङ्कारत्वं उक्तं चन्द्रालोके— 'अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्' इति । उदाहृतं च तत्रैव— 'भक्ष्याशया हि मञ्जूषां दष्ट्वाखुस्तेन भक्षितः' इति ॥

अहमौपयिकी भार्या तस्यैव वसुधापतेः ।
व्रतस्नातस्य धीरस्य विद्येव विदितात्मनः ॥
राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ।

इत्यादौ अनुरूपयोः सीतारामयोर्वर्णनादनुरूपवस्तुद्वयवर्णनात्मकः समालंकारः । उक्तं च चन्द्रालोके अनुरूपवस्तुद्वयवर्णनस्य समालंकारत्वम्— 'समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः' इति । उदाहृतं च तत्रैव— 'स्वानुरूपं कृतं सद्म हारेण कुचमण्डलम्' इति ॥

ततापन हि तं सूर्यः प्लवन्तं वानरेश्वरम् ।
सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥

इत्यत्र तपन[1] कृतातपाभावे[2] पवनकृतसेवने च आनुकूल्याचरणप्रयुक्तकार्यसौकर्यावगमात कारणान्तरसन्निधिप्रयुक्तकार्य-

---

1. तपनवनकृता 2. भावे आनु

सौकर्यरूपः समाधिः। उक्तं च कारणान्तरसन्निधिप्रयुक्तकार्यसौकर्यस्य समाधित्वं चन्द्रालोके— 'समाधिः कार्यसौकर्यं कारणान्तरसान्निधेः' इति। उदाहृतं च तत्रैव— 'उत्कण्ठिता च तरुणी जगामास्तं च भानुमान्' इति ॥

न हि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः।
अपि राक्षसरूपेण किंमुतान्येन केनचित् ॥

अपकुर्वन् हि रामस्य साक्षादपि पुरन्दरः।
न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥

इत्यत्र लङ्कायां स्वरूपं तिरोधाय राक्षसरूपेणापि केनचिद्राक्षसैरविज्ञातेन स्थातुं न शक्यते; किमु वक्तव्यं अन्येनाराक्षसरूपेण इति स्थातुमशक्यत्वस्यार्थस्य कैमुतिकन्यायसिद्धत्वप्रतिपादनात्, तथा येन त्वं जितो यश्च श्रीरामस्य देवभावेन पूजनीयः सोऽपि देवेन्द्रः श्रीरामापकारी चेन्न सुखं प्राप्नुयात्; किं पुनस्त्वादृश इति रावणं प्रति प्रतिपादनेन रामापकारकारिरावणसुखाप्राप्तिरूपस्य अर्थस्य कैमुतिकन्यायासिद्धत्वप्रतिपादनाच्च कैमुत्येनार्थसंसिद्धिरूपा काव्यार्थापत्तिः। उक्तं च कैमुत्येन अर्थसंसिद्धेः काव्यार्थापत्तित्वम्— 'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते' इति। उदाहृतं च— 'स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्' इति। अत्र 'स' इत्यनेन येन पद्मानि जितानि इति विवक्षितम्। तथा च सोऽपि येन जितः तेन पद्मानि जितानि इति किंमु वक्तव्यं इति दण्डापूपिकान्यायेन पद्मजयरूपस्यार्थस्य संसिद्धिः काव्यार्थापत्तिः ॥

युक्तरूपं त्वया देवि भाषितं शुभदर्शने ।
सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥

स्त्रीत्वं च न समर्थं हि सागरं व्यतिवर्तितुम् ।

कथं च धर्मार्थविनीतबुद्धिः
परावरप्रत्ययनिश्चितार्थः ।
भवद्विधः कोपवशे हि तिष्ठे-
त्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥

इत्यत्र सीतोक्तस्य स्वकर्तृकसागरलङ्घनानुचितत्वस्य विशेषस्य स्त्रीसामान्यनिष्ठसागरलङ्घनासामर्थ्यरूपसामान्यस्य, रावणं प्रति कोपनिषेधरूपविशेषस्य सत्पुरुषकर्तृक[1]कोपनियमनलक्षणसामान्यस्य चोपादानात् सामान्यविशेषयोरुक्तिरूपोऽर्थान्तरन्यासः । उक्तं च सामान्यविशेषयोरुक्तेरर्थान्तरन्यासत्वम्— 'उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः' इति । उदाहृतं च— 'हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्' इति ॥

शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ।
आनयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥

इत्यत्र सीतया राघवकर्तृकलङ्काशरान्तिबिडीकरणपूर्वकस्वीयानयनस्य राघवोचितकर्मसिद्ध्यर्थत्वेनोहितत्वात्, यदीत्थं स्यात् इत्यन्यसिद्ध्यर्थोहरूपः संभावनालङ्कारः। उक्तं च एतादृशोहस्य संभावनात्वम्— 'संभावनं यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये' इति । उदाहृतं च— 'यदि शेषो भवेद्वक्ता कथिताः

1. कोपानङ्गीकार

स्युर्गुणास्तव ' इति ॥

यूथमेवाभिजानीत योऽयं यद्वा करिष्यति ।
अहिरेव ह्यहेः पादान् विजानाति न संशयः ॥

इत्यादौ 'अहिरेव' इत्यादिलोकप्रवादानुकाराल्लोकोक्तिः। उक्तं च लोकप्रवादानुकारस्य लोकोक्तित्वम्— 'लोकप्रवादानुकृतिर्लोकोक्तिरिति गद्यते' इति । उदाहृतं च— 'सहस्व कतिचिन्मासान् मीलयित्वा विलोचने' इति । अत्र मीलयित्वा इति लोकप्रवादानुकारः । यथा वा— 'नाभैव ते वरद वाञ्छितदातृभावं व्याख्यात्यतो न वहसे वरदानमुद्राम् । विश्वप्रसिद्धतरविप्रकुलप्रसूतेर्यज्ञोपवीतवहनं न हि खल्वपेक्ष्यम् ॥' इति ॥ अत्र उत्तरार्धे लोकप्रवादानुकारः ॥

दुधुवे च स रोमाणि चकम्पे चाचलोपमः ।
ननाद सुमहानादं सुमहानिव तोयदः ॥

आनुपूर्व्याच्च वृत्तं च लाङ्गूलं लोमभिश्चितम् ।
उत्पतिष्यन् विचिक्षेप पक्षिराज इवोरगम् ॥

पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः ।
निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ॥

आस्फोटयामास चुचुम्ब पुच्छं
ननन्द चिक्रीड जगौ जगाम ।
स्तम्भानरोहन्निपपात भूमौ
[1]निदर्शयानः प्रकृतिं कपीनाम् ॥

1. निदर्शयन् स्वां

इत्यत्र तात[1]पुत्रकान्तादिभिः [आलम्बनविभावैः] व्यभिचारिभिश्च स्वादिमानमानीयमानस्य शोकस्य स्थायित्वात् करुणो रसः। उक्तं च शोकस्य स्थायित्वे [2]करुणंरसत्वम् 'शोकः स्थायी भवेद्यत्र तमाहुः करुणं रसम्' इति। उदाहृतं च– 'हा मातस्त्वरितासि कुत्र किमिदं हा देवताः काशिषो धिक् प्राणान्पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ। इत्थं बर्बरमर्धरुद्धकरुणाः पौराङ्गनानां गिरश्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि॥' इति। प्रमीतां मातरं प्रत्यनुशोचन्तीः पौराङ्गनाः प्रेक्ष्य शोचतः कस्यचिदुक्तिरियम्। हा मातः, कुत्र त्वरितासि? हा देवताः, किमिदं कृतम्? ब्राह्मणानामाशिषः क्व गताः? प्राणान् धिक्, ये मातरि गतायामपि तिष्ठन्ति। अकाण्ड एवाशनिः पतितः। दुःखमेवाशनित्वेनाध्यवसीयते। हे मातः यतस्तवाङ्गेषु हुतवहः प्रज्वलति। दृशौ च ते दग्धे। इत्थं बर्बरं गद्गदं यथा भवति तथा, अत एव अर्ध एव रुद्धाः अत एव करुणाः शोकावहाः पौरस्त्रीणां प्रलापाः चित्रगतानपि जनान् रोदयन्ति। चित्रभित्तीरपि शतधा कुर्वन्ति इति श्लोकार्थः। अत्र मृता मातालम्बनविभावः। हुतवहप्रज्वलनादिकमुद्दीपनम्। प्रलापनादिकमनुभावः। तद्व्यञ्जिता दैन्यचिन्तादयो व्यभिचारिणः। शोकः स्थायी। एभिः काव्यनिबद्धैः अभिनीतैर्वा संवलिततया सहृदयैः करुणो रसश्चर्व्यते॥

राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः।
हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः॥

---

1 माता 2 करुणो रस इति

D. 4

तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्त्रबिन्दवः ।
दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥

आत्मनः सदृशान् शूरान् किङ्करान्नाम राक्षसान् ।
व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥

इत्यत्र हनूमदालम्बनरावणनिष्ठक्रोधस्य स्थायित्वात् रौद्रो रसः । उक्तं च क्रोधस्य स्थायित्वे रौद्ररसत्वं 'क्रोधः स्थायी भवेद्यत्र तत्र रौद्रो रसः स्मृतः ।' इति । उदाहृतं च— 'कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः । नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥' इति । इदं हि द्रोणवधकुपितस्याश्वत्थाम्नो वचनम् । इदं द्रोणवधरूपं गुरु महत्पातकं मनुजपशुभिः पशुप्रायैर्धृष्टद्युम्नादिभिः कृतम् । पशुवदविवेकी न चेत्, को वा सन्यस्तशस्त्रमाचार्यं हन्यादिति भावः । यैर्निर्मर्यादैरतिक्रान्तधर्मसेतुभिर्नरकरिपुप्रभृतिभिरनुमतं वा यैर्भवद्भिः क्षत्रियैर्दृष्टं वा । नन्वस्माकं धृष्टद्युम्ननिवारणे असामर्थ्यात्तूष्णीं दृष्टमिति नास्माकमपराध इत्यत उक्तम्— उदायुधैरिति । तेन तन्निवारणसामर्थ्येऽपि उपेक्षितमिति व्यज्यते । तेषां भीमार्जुनसहितानां नरकरिपुणा सार्धं भवतामसृङ्मेदोमांसैर्दिशां बलिं करोमीति श्लोकार्थः । अत्र धृष्टद्युम्नाद्यालम्बनस्य गुरुवधजनिताश्वत्थामक्रोपस्य स्थायित्वम् ॥

न खल्वयं नाभिभवेदुपेक्षितः
पराक्रमो ह्यस्य रणे विवर्धते ।

प्रमापणं त्वेव ममास्य रोचते
न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥

इत्यत्र हनूमन्निष्ठाक्षकुमारवधोत्साहस्य स्थायित्वात् वीरो रसः । उक्तं च उत्साहस्य स्थायित्वे [1]वीररसत्वम् 'स्थाय्युत्साहो भवेद्यस्य स वीरो रस इष्यते' इति । उदाहृतं च — 'क्षुद्राः संत्रासमेनं विजहित हरयो भिन्नशक्रेभकुम्भा युष्मद्गात्रेषु लज्जां दधति परममी सायकाः संपतन्तः । सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥' इति । वानरान् लक्ष्मणं च प्रति इन्द्रजिद्वाक्यमिदम् । हे क्षुद्राः पराक्रमगन्धानभिज्ञाः कपय एनं संत्रासं मुञ्चत । कुतः ? भिन्नैरावतकुम्भा मदीयाः शरा भवदङ्गेषु संपतन्तो लज्जां दधति । सौमित्रे सुमित्रापुत्र निर्भयमास्स्व । यतो मम रुषां त्वं पात्रं नासि ; यतोऽहं मेघनादः । नन्विति प्रसिद्धौ । तर्हि कस्ते शौर्यस्य विषय इत्यत आह— भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि इति श्लोकार्थः । अत्र इन्द्रजितो युद्धार्थं रामगवेषणोत्साहस्य स्थायित्वाद्वीरो रसः ॥

ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ।
प्रावेपत वरारोहा प्रवाते कदली यथा ॥

[2] आच्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ।
उपविष्टा विशालाक्षी रुदती वरवर्णिनी ॥

---

1 वीरो रस इति 2 ऊरुभ्यामुदरं छाद्य

इत्यत्र दशवदनदर्शनजनितजनकतनयानिष्ठभयस्य स्थायित्वात् भयानकरसः। उक्तं च भयस्य स्थायित्वे [1]भयानकरसत्वम्— 'स्थायी भावो भयं यस्य भयानकरसस्तु सः'। उदाहृतं च— 'ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्। दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥' इति। अत्र दुष्यन्तस्यन्दनालम्बनहरिणभयस्य स्थायित्वम् ॥

सा तु तेन प्रहारेण विह्वलाङ्गा निशाचरी।
पपात सहसा भूमौ विकृताननदर्शना ॥

इत्यत्र लङ्काविषयकहनुमज्जुगुप्सायाः स्थायित्वात् बीभत्सरसः। उक्तं च जुगुप्सायाः स्थायित्वे बीभत्सरसत्वम्— 'स्थायी जुगुप्सा यत्र स्यात् स बीभत्सरसः स्मृतः' इति। उदाहृतं च— 'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपीठाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा। आत्तस्नाय्वान्त्रनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसन्धिस्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥' इति। गजादीनां निहतानां चर्म प्रथममुत्कृत्योत्कृत्य, पृथूत्सेधभूयांसि उपचयभूयिष्ठानि अंसयोः, ऊरुसन्धिप्रदेशयोः पृष्ठपीठाद्यवयवेषु च सुलभानि दुःसहदुर्गन्धानि मांसानि जग्ध्वा स्नायूनि अस्थिबन्धनसिराः आन्त्राणि सिरान्तराणि नेत्राणि च तानि भक्षितानि येन स तथा। प्रेतरङ्कः प्रेतपिशाचविशेषेषु दरिद्रः

---

1 भयानकरस इति

सीतादर्शनानन्तरमपि कार्यसिद्ध्यनन्तरकर्तव्यं मङ्गलं कृतमित्यवगम्यते सप्तदशे—

नमस्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान् ।
सीतादर्शनसंहृष्टो हनुमान् संवृतोऽभवत् ॥ इति ।

अत एव च आदिमध्यान्तेषु मङ्गलाचरणेन निर्विघ्नतया अलङ्घनीयसमुद्रलङ्घनादिपूर्वकं दुष्प्रवेशलङ्कामध्यवर्तिनीं सीतामपि दृष्ट्वा सिद्धार्थः पुनराजगाम । एवमेव सर्वैरपि कार्यसिद्ध्यर्थिभिरादिमध्यान्तेषु मङ्गलमाचरणीयमेवेति ॥

'अञ्जलिं प्राङ्मुखः कुर्वन्' इति दक्षिणां दिशं प्रति प्रस्थितेन हनूमता प्राङ्मुखतया मङ्गलाचरणादितरैरपि शुभकरं कर्म प्राङ्मुखतया (उदङ्मुखतया) आरम्भणीयं इति सूचितम् । तथा च बोधायनः 'प्राङ्मुखः प्रदक्षिणं यज्ञोपवीती दैवानि कार्याणि कुर्वीत' इति ॥

प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ।
ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥

नन्वत्र समुद्रस्याभिवृद्धिर्दृष्टान्तत्वेनोक्ता ; सा नोपपद्यते, पर्वकाले चन्द्रोदये विशिष्य जलान्तरागमाभावादिति चेत्, न, जलान्तरागमाभावेऽपि समुद्रवृद्धेः पुराणसिद्धत्वात् । तथा च विष्णुपुराणे — 'पयांसि सर्वदा सर्वसमुद्रेषु समानि वै । न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥ स्थालिस्थमग्निसंयोगादुद्रेकि सलिलं यथा । तथेन्दुवृद्धौ सलिलमम्भोधौ

मुनिसत्तम ॥ अन्यूनानतिरिक्ताश्च वर्धन्त्यापो ह्रसन्ति च। उदयास्तमये त्विन्दोः पक्षयोः शुक्लकृष्णयोः ॥ दशोत्तराणि पञ्चैव ह्यङ्गुलीनां शतानि वै। अपां वृद्धिक्षयौ दृष्टौ समुद्राणां महामुने ॥' इति ॥

तेजः सत्वं तथा वीर्यमाविवेश स वीर्यवान् ।
मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः ॥

अनेन कार्यारम्भे बलाभिवृद्धिः कार्यसिद्धिसूचिका, विपरीते विपरीतामिति सूचितम् । तथा च उद्योगे— 'विपाप्मा वृद्धतेजास्तु पुरुषो विन्दते महत् । हीनतेजोऽपि संसृष्टो नैव जातु व्यवस्यति ॥ अवश्यं जनयत्येव सर्वकर्मसु संशयान् ॥' इति ॥

तदनु उदन्वदुल्लङ्घनाय परिगृहीतातिमात्रशरीरस्य बाहुभ्यां चरणाभ्यां च दृढतरमापीडितो महेन्द्राचलश्चिरतरं चचाल । ततो द्रुततरनिहितचरणतलनिपीडनं सोढुमक्षमः क्ष्माभृदेष निष्पतद्भिर्झरौघतया निरन्तरनिपतद्बाष्पपूर इव इतस्ततो निपातिततरुप्रसूनतया विगलितधम्मिल्ल इव निबिडनिपीडननिर्वर्तितानेकधातुतया क्षरितशोणित इव साध्वसधावमाननानाविधसत्वशब्दसञ्जातप्रतिध्वनितया विनदन्निव सुचिरं वचसामगोचरं दशाविशेषमभजत । ततस्तत्क्षणसमुत्पन्नसाध्वसेन पानभूमिगतान् काञ्चनकरकानुच्चावचानि भक्ष्यभोज्यानि विविधानि च मांसान्यार्षभाणि चर्माण्यपहाय विस्मयस्तिमितवधूजनैः सह सहसोत्पत्य गगनमार्गे मायेन्द्रजालादिविधिं दर्शयन्तो विद्याधरा ऋषयः सिद्धचारणाश्च श्रीरामकार्यीयं पारावारस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति

पवनतनय इति वचनमाकर्ण्य सर्वतो दिक्षु चक्षुर्विक्षिपन्तः पर्वता-
दुत्पतन्तं वानरर्षभं सहर्षमालोकयामासुः ॥

तस्य लाङ्गूलमाविद्धमतिवेगस्य पृष्ठतः ।
ददृशे गरुडेनेव ह्रियमाणो महोरगः ॥

रुरोध हृदये प्राणानाकाशमवलोकयन् ।
पद्भ्यां दृढमवस्थानं कृत्वाथ कपिकुञ्जरः ॥

निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ।
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ॥

यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ।
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥

न हि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् ।
अनेनैव हि वेगेन गमिष्यामि सुरालयम् ॥

यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः ।
बद्ध्वा राक्षसराजं तमानयिष्यामि रावणम् ॥

सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ।
आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ॥

इत्याभिधाय सवेगं उत्पतति वायुसुते,

ऊरुवेगोत्थिता[1] वृक्षा मुहूर्तं कपिमन्वयुः ।
प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥

---

1 द्धता

अनेन प्रियो बन्धुः किञ्चिद्दूरमनुसर्तव्य इति सूचितम् । तथा चाश्वमेधिके— 'विनिर्ययौ नागपुराद्गदाग्रजो रथेन दिव्येन चतुर्युजा प्रभुः । तमन्वगाद्वानरवर्यकेतनः ससात्यकिर्माद्रवतीसुतावपि । अगाधबुद्धिर्विदुरश्च माधवं स्वयं च भीमो गजराजविक्रमः ॥' इति ॥

तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः ।
अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥

अनेन बहिः प्रस्थितो राजा सेनया अनुसर्तव्य इति सूचितम् । तथा च भीष्मपर्वणि भीष्मं प्रति गच्छन्तं दुर्योधनम्, 'अनुजग्मुर्महेष्वासाः सर्वलोकस्य धन्विनः । हयानन्ये समारुह्य गजानन्ये च भारत ॥ रथानन्ये नरश्रेष्ठं परिवव्रुः समन्ततः । पदातयश्च त्वरिता नखरप्रासयोधिनः ॥ आत्तशस्त्राश्च सुहृदो रक्षणार्थं महीपतेः ।' इति प्रतिपादितम् ॥

विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ।
अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥

अनेन प्रस्थितमिष्टजनमनुव्रज्य निवृत्ता बान्धवाः शोचन्तीति सूचितम् । तथा चाश्रमवासिके— निवृत्तांश्च कुरुश्रेष्ठान् दृष्ट्वा प्ररुरुदुस्तदा । उपावृत्तेषु पार्थेषु सर्वास्वेव वधूषु च ॥ ययौ राजा महाप्राज्ञो धृतराष्ट्रो वनं तदा । पाण्डवाश्चातिदीनास्ते दुःखशोकपरायणाः । यानैः स्त्रीसहिताः सर्वे पुरं प्रविविशुस्तदा ॥' इति । आपद्धर्मेऽपि—'दुःखं जरा ब्रह्मदत्त दुःखमर्थविपर्ययः । दुःखं चानिष्टसंवासो दुःखमिष्टवियोजनम् ॥' इति ॥

दिकल्पनया व्यभिचारपरिहारः निर्णीते मङ्गलेऽपि तुल्यः । वस्तुतस्तु मङ्गलस्य विघ्नध्वंस एव फलम्, समाप्तिः स्वकारणादेव। एवं च सति विघ्नसंशयस्य फलसंशयत्वेनाप्रतिबन्धकत्वात् संदेहेऽपि मङ्गलानुष्ठानं निरवद्यम् ॥

इदं च मङ्गलं देवतानतिस्तुतिस्मरणादिरूपम् । तत्रानुष्ठेयलौकिकवैदिककार्येषु सर्वत्र मङ्गलस्यानुष्ठानमात्रम् । ग्रन्थादिरूपकार्येषु कृतस्य मङ्गलस्य ग्रन्थतोऽपि निबन्धनं कार्यम् । तदुक्तम् 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ग्रन्थादौ ते प्रयोक्तव्या यतस्ते मङ्गलार्थकाः ॥' इति, 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।' इति च । इत्थं ग्रन्थतो मङ्गलनिबन्धनस्य प्रयोजनं ग्रन्थस्य सकलशिष्टसंग्राह्यत्वमेव । अन्यथा हि मङ्गलाननुष्ठानेन निर्विघ्नपरिसमाप्तस्यापि ग्रन्थस्य प्रमत्तकृतत्वशङ्कया महाजनपरिग्रहो न भवेदेव। तथा च सर्वोऽपि प्रयासः अनर्थको भवेत् । [1]एवं ग्रन्थसमाप्त्यर्थं कृतं मङ्गलं प्रमाणवशेन प्रयोजनवशेन च ग्रन्थादौ निबन्धनीयम् ॥

नन्वेवं सति बादरायणजैमिनिप्रभृतिभिः ब्रह्मधर्मविचारसूत्रकृद्भिः, भगवत्पादप्रभृतिभिः भाष्यकृद्भिः, कल्पसूत्रप्रणेतृभिः बोधायनापस्तम्बाचार्यप्रभृतिभिः, भगवता वाल्मीकिना च मङ्गलाननुष्ठानात् ग्रन्थतः अनिबन्धनात् भद्रादिवाचकशब्दप्रयोगाभावाच्च तत्कृतग्रन्थसमाप्तिः महाजनपरिग्रहादिकं च कथं स्यादिति चेत्; न, बहिः कृताज्जन्मान्तरानुष्ठिताद्वा मङ्गलात् ग्रन्थसमा-

---

1. एतत

त्यादेः संभवात् । वस्तुतस्तु तैरपि अस्मिन् जन्मनि मङ्गलाचरणं निबन्धनादिकं च कृतमेव । तथा हि— सूत्रेषु तावत्सर्वत्र अथशब्दः प्रयुक्तः । स च मङ्गलार्थकः । तदुक्तम्— 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥' इति । अथशब्देऽपि प्राथमिकोऽकारः विष्णु(शब्द)वाचकः, 'अकारो ब्रह्मविष्णवीशकमठेष्वङ्कणे रणे' इति रत्नमालावचनात् । थशब्दोऽपि चन्द्रवाचकः, 'थः पुंस्यूर्मिगिरीन्दुषु' इति रत्नमालावचनात । सौत्रश्च अविभक्तिको निर्देशः । तथा च ' अर्थं बुद्ध्वा शब्दरचना ' इति न्यायात् आदौ विष्ण्वादिस्मरणम्, तत्तच्छब्दरचनम्, तस्य ग्रन्थतो निबन्धनम् । इत्थमेव मङ्गलस्मरणं तद्वाचकाथशब्दरचनं ग्रन्थतो निबन्धनमित्यखिलमपि अथशब्दपूर्वकेषु ग्रन्थेषु सुलभमेव॥

नन्वेवमपि कर्मब्रह्मविचारसूत्रेषु तत्तद्विचारहेतुभूताध्ययनाद्यानन्तर्यबोधकोऽथशब्दः कथं मङ्गलं बोधयेत्, 'अन्याय्यं च [एकस्य शब्दस्य] अनेकार्थत्वम' इति न्यायादिति चेन्; न, अनेकार्थसङ्ग्रहाय प्रवृत्ते विश्वतोमुखे सूत्रे नानार्थत्वस्यालङ्कारत्वात्। अन्यथा 'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति सूत्रलक्षणाभावात्सूत्रत्वमेव न स्यात् । अत एव 'हलन्त्यम्' 'वा सुप्यापिशलेः' इत्यादिसूत्रेषु तत्र तत्रानेकार्थत्वमङ्गीकुर्वन्ति वैयाकरणाः । अतो मङ्गलार्थकोऽ[प्य]थशब्दः । वस्तुतस्तु न पदार्थं विधाय मङ्गलं ब्रूते, येनानेकार्थत्वं भवेत्; किं तु दर्शनधारणादिना सुवर्णादीनां मङ्गलत्ववदुच्चारणमात्रेण मङ्गलत्वसंभवात् । [उक्तं च]दर्शनादिना सुवर्णादि

मङ्गलमित्येतत्स्मृतिषु—'सुवर्णं चन्दनं रत्नं पञ्चगव्यानि रोचनम्। प्रियङ्गु सर्षपं क्षौद्रं मङ्गलानि प्रचक्षते ॥' 'विप्राग्न्यर्काम्बुगोहेमनृपाज्यं मङ्गलं स्मृतम्', 'दूर्वां च सर्पिर्दधि चोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णम्। मृद्गोमयं स्वस्तिकमक्षतांश्च तैलं मधु ब्राह्मणकन्यकां च ॥' इति। ततश्चानन्तर्यार्थक एवाथशब्दः उच्चारणमात्रेण मङ्गलमपि भवति इति मङ्गलप्रयोजनकोऽपि। एतदभिप्रायेणैवानन्तर्यार्थकशब्दान्तरवर्जनेनाथशब्दप्रयोगोऽप्यर्थवान् भवति। अन्योऽपि अथशब्दपूर्वकः सर्वोऽपि ग्रन्थः कृतमङ्गल एव। भगवत्पादैरपि वैयासिकसूत्रभाष्ये सर्वानर्थ(क)प्रत्यनीकचिदानन्दात्मकप्रत्यगभिन्नात्मप्रतिपादकास्मच्छब्दप्रयोगरूपं मङ्गलं कृतमेव 'युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः' इत्यत्र। आपस्तम्बाचार्यैरपि 'यज्ञं व्याख्यास्यामः' इत्यारम्भे 'यज्ञो वै विष्णुः' इति श्रुतिसिद्धविष्ण्वर्थकयज्ञशब्दप्रयोगान्मङ्गलं कृतमिति बोध्यम्। रामायणेऽपि भगवान्वाल्मीकिर्मङ्गलाभिप्रायेणैव तपःशब्दमादौ प्रयुक्तवान् ॥

इदं मङ्गलं कार्यस्यादिमध्यान्तेषु कर्तव्यम्। तथा च भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलावसानानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ताः यथा स्युः' इति। तदभिप्रायेणैव महर्षिः पाणिनिः वृद्धिशब्दं शास्त्रादौ, 'भूवादयो धातवः' 'वासुदेवार्जुनाभ्यां वुन्' इति शास्त्रमध्ये अमृतबीजं वकारम्, परमात्मवाचकं वासुदेवशब्दं च, 'अ अ' इत्यन्तिमे सूत्रे विष्णुवाचकं अकारं च प्रयुक्तवान्। भाष्यकारोऽपि वृद्धिशब्दो मङ्गलार्थ

इत्याह— 'इदमेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते' इति । इत्थं भूवादिसूत्रे वकारागमस्य मङ्गलार्थत्वमपि भाष्ये— 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारागमं प्रायुङ्क्त' इति ॥

इत्थं मङ्गलानाचरणे कार्याभावं तदाचरणे कार्यसिद्धिं च निश्चित्यैव व्याकरणादिनिखिलशास्त्राभिज्ञः हनुमान् चिकीर्षितकार्यस्य आदिमध्यान्तेषु अवश्यकर्तव्यमङ्गलेषु इदमादिमङ्गलं कृतवान् । इत्थमेव कार्यमध्ये कर्तव्यं मङ्गलं कृतमित्यवगम्यते त्रयोदशे सर्गे—

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥

सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ।
ब्रह्मा स्वयम्भूर्भगवान् देवाश्चैव दिशन्तु मे ॥

सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रधृक् ।
वरुणः पाशहस्तश्च सोमादित्यौ तथैव च ॥

अश्विनौ च महात्मानौ मरुतः शर्व एव च ।
सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ।
दास्यन्ति मम ये चान्ये ह्यदृष्टाः पथि गोचराः ॥ इति ।

अङ्कस्थात् करङ्कात् शवशरीरात् अस्थिसन्धिषु स्थपुटगतं निम्नोन्नततया स्थितं मांसं अत्वरं अत्तीति श्लोकार्थः । अत्र प्रेतालम्बनमाधवगतजुगुप्सायाः स्थायित्वम् ॥

[1]हारनूपुरकेयूरपारिहार्यधराः स्त्रियः ।
विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह ॥
दर्शयन्तो महाविद्यां विद्याधरमहर्षयः ।
सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् ॥

इत्यत्र विद्याधरादिनिष्ठविस्मयस्य स्थायित्वात् अद्भुतरसः । उक्तं च विस्मयस्य स्थायित्वेऽद्भुतरसत्वम्[2]— 'यत्र स्थायी विस्मयः स्याददद्भुताख्यो रसः स्मृतः' इति । उदाहृतं च—'अनादिकिटिहंसाभ्यामप्यदृष्टाङ्घ्रिशेखरम् । अहो महो महदहं महयाम्यधिमानसम् ॥' इति । अत्र भक्तविस्मयस्य स्थायित्वम् । शृङ्गारादिरसा उदाहृताः । एवं रसान्तरमपि यथासंभवं द्रष्टव्यम् । तदेतत्काण्डस्य रसालङ्कारभरितत्वलक्षणं सुन्दरत्वं सिद्धम् ॥

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥

अथ महतामप्यचिन्त्यरचनं दुष्करं कर्म कर्तुकामो मारुतिः समुदग्रग्रीवो गवां पतिरिव समुद्रतीरपरिसरसमुद्गतेषु वैडूर्यसमानवर्णेषु शाड्वलेषु धीरतरं संचरन्, चटुलतरचरण-

---

1 हारनूपुरकेयूरपारिहार्यैरलङ्कृताः ।
विस्मितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् ॥

2 रस इति ।

विन्यासैर्विलासयन्मृगगणानूरुवेगेन तरुनिकरमुरसा हरन्ननेकसिद्ध-गन्धर्वविद्याधरोरगनिषेवितमखिलधातुधूसरितं रम्यं गिरिवरमारुह्य,

स सूर्याय महेन्द्राय वरुणाय स्वयंभुवे ।
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ।
अञ्जलिं प्राङ्मुखः कुर्वन्पवनायात्मयोनये ॥

अत्र हनूमता दुस्तरसमुद्रोल्लङ्घनरूपमहाकार्यसिद्धयै इष्टदेवतानमस्कारमङ्गलाचरणात् इतरैरपि अभीष्टसिद्धयै कार्यारम्भे मङ्गलं कर्तव्यमिति सूचितम् । तत्र प्रमाणं शिष्टाचार एव । न च तस्य अन्धपरंपरादूषितत्वमिति वाच्यम्, श्रुत्यनुमानेन अन्धपरम्परानिरासंभवात । न च तादृशश्रुतौ मानाभावः, पठ्यमानशाखासु अनुपलम्भादिति वाच्यम् ; प्रत्यक्षतोऽनुपलम्भेऽपि 'स्मृतिः स्मृत्यर्थानुभवजनकवेदमूला, अविगीतमहाजनपरिगृहीतस्मृतित्वात्' (?) इत्यनुमानात् स्मृतिमूलभूतश्रुतिसिद्धिवत् अत्रापि 'मङ्गलं वेदबोधितकर्तव्यताकम्, अविगीतशिष्टाचारविषयत्वात्'[1] इत्यनुमानेन आचारमूलश्रुतिसिद्धिसंभवात् । न चानुमितापि श्रुतिरानुपूर्वीविशेषनिश्चयाभावात् कथं तत्कर्तव्यतां बोधयेदिति वाच्यम्, स्मृत्याचारयोरेव[2] कर्तव्यताबोधकत्वेनाङ्गीकारात् । न चैवं श्रुत्यनुमानमनर्थकम्, तत्कर्तव्यस्य कर्तव्यताबोधस्यान्यत एव सिद्धेरिति वाच्यम् । पौरुषेयस्मृत्याचारयोरन्धपरंपराप्रवृत्तत्वशङ्कया तत्कृतकर्तव्यताबोधस्यापि अप्रामाण्यशङ्काकलङ्कितत्तया मङ्गलाचरणे न कस्यापि निःशङ्कं प्रवृत्तिर्भवेत

1 चारत्वात् 2 रेक

इति तत्परिहाराय तत्तन्मूलभूतश्रुत्यनुमानस्यावश्यकर्तव्यत्वात्। अनुमितायां च श्रुतौ नान्धपरम्परा, निरस्तसमस्तदोषेण परमेश्वरेण प्रणीतत्वेन, नित्यत्वेन वा श्रुतेर्निष्कलङ्कप्रमाणत्वात्॥

वेदस्य परमेश्वरप्रणीतत्वे बादरायणं सूत्रम्— 'शास्त्रयोनित्वात्' इति। व्याख्यातं च भाष्ये— 'महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वा[र्था-]वद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म' इति। नित्यत्वे[1] च— 'अत एव च नित्यत्वम्' इति व्याससूत्रम्। तत्रापि भाष्यम्— 'अत एव च नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वादेवेदं वेदशब्दनित्यत्वमपि प्रत्येतव्यम्। तथा च मन्त्रवर्णः 'यज्ञेन वाचः पदवीयमायन्। तामन्वविन्दन् ऋषिषु प्रविष्टाम्।' इति स्थितामेव वाचमनुविन्नां दर्शयति। वेदव्यासश्चैवमेव स्मरति— 'युगान्तेऽन्तर्हितान्वेदान् सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा॥' इति। परमेश्वरप्रणीतत्वनित्यत्वयोः परस्परविरोधः प्रवाहनित्यतामादाय परिहर्तव्यः। तथा च श्रुतेर्निर्दुष्टपुरुषप्रणीतत्वेन नित्यत्वेन वा निरस्तसमस्तदोषाशंकतया तन्मूलकाचारस्मृतिजनितकर्तव्यताबोधे निष्कलङ्का प्रवृत्तिर्भवेदेवेति नान्धपरम्परा। तथा चोक्तमभियुक्तैः 'स्मृतेरेव कर्तव्यताबोधः। श्रुत्यनुमानं तु अन्धपरम्परानिरासार्थम्' इति। न च हेतौ शिष्टत्वं वेदोक्तकर्मकर्तृत्वं वेदप्रामाण्याभ्युपगन्तृत्वं वा, धार्मिकविद्यावद्विशेषणत्वोपलक्षणत्वादिविकल्पग्रस्तत्वान्न वक्तुं शक्यम्। अन्यच्च दुर्वचमिति वाच्यम्। अस्मद्बुद्धिपरिकल्पितशिष्टत्वस्य

1 त्वेन

यत्किञ्चिद्दूषणग्रस्तत्वेऽपि हेतुवादमात्रेणाशक्यनिरसनस्य श्रुतिस्मृतिसिद्धशिष्टत्वस्य हेतुघटकत्वसंभवात् । तथा च बोधायनः— 'शिष्टाः खलु वीतमत्सराः निरहंकाराः कुम्भीधान्याः अलोलुपाः दम्भमोहक्रोधविवर्जिताः(?)। धर्मेणाधिगतो येषां वेदः सपरिबृंहणः। शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः ॥' इति । एतादृशशिष्टत्वघटितहेतुना श्रुत्यनुमानं निर्दुष्टमेव ॥

मङ्गलस्य फलं कार्यसिद्धिरेव, शिष्टाचारविषयत्वेन सफलस्य मङ्गलस्य फलान्तराभावे सति परिशेषात्तस्यैव फलत्वौचित्यात् । न च सर्वपुरुषाभिलषितस्वर्गफलत्वमेव विश्वजिन्न्यायाद्भविष्यतीति परिशेषोऽसिद्ध इति वाच्यम् । फलान्तरबाधकप्रमाणाभावे हि विश्वजिन्न्यायः । अन्यथा दृष्टफलान्तरवतामपि स्वर्गफलवत्वं स्यात् । इह च अभीष्टसिद्धिरेव फलमिति, अत्रापि तत्कामनया शिष्टानां मङ्गलाचार एव प्रमाणम् । अतः अभीष्टसिद्धिरेव फलम् । तत्र न साक्षादिति विघ्नध्वंसो द्वारम् ॥

ननु अकृते कृतेऽपि वा मङ्गले आरब्धकार्यसमाप्त्यसमाप्त्योर्दर्शनेन व्यभिचारान्न मङ्गलं समाप्तौ हेतुरिति चेत्, न, जन्मान्तरीयमङ्गलेन व्यतिरेकव्यभिचारस्य वैगुण्यकल्पनेन अन्वयव्यभिचारस्य च परिहर्तुं शक्यत्वात् । अन्यथा केवलदृष्टवृष्टिफलककारीरीष्टयाद्यनुष्ठानेऽपि वृष्ट्यदर्शनात् न कारीरीष्टयादिर्वृष्ट्यादिहेतुर्भवेत् । यदि च 'वृष्टिकामः कारीर्या यजेत' इत्यादिश्रुत्या साधनत्वेनावगतस्य प्रतिबन्धादिकल्पनया व्यभिचारपरिहारः, तदा प्रकृतेऽपि शिष्टाचारात्समाप्तिसाधनत्वेनावगतस्य प्रतिबन्धा-

तदनु समुत्पतनसमयोदितोरुवेगसमाकृष्टतरुविटपकोटिपाटितजलदबृन्दस्यन्दमानशीकरदूरीकृताध्वश्रमं प्लवमानं पवमानसूनुमवलोक्य—

ववर्षुः पुष्पवर्षाणि देवगन्धर्व[1]चारणाः ॥

ततांप न हि तं सूर्यः प्लवन्तं वानरेश्वरम् ।
सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥

ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा ।
जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् ॥

नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः ।
प्रेक्ष्या[2]काशे कपिवरं सहसा विगतक्लमम् ॥

तदनु सगरान्ववायकृतावतारस्य रघुवीरस्य साचिव्याय खोपरि समुत्पतन्तं हनूमन्तमवलोक्य,

इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ।
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ॥

करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ।

अत्र पूर्वोपकर्तुः प्रत्युपकारमकुर्वतो दोष उक्तः । तदुक्तमभियुक्तैः—'सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितम् । प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् ॥' इति । इति विचिन्त्य निजोदरलीनं मैनाकमेवमवोचत्—

---

1 दानवाः 2 क्ष्य सर्वे

स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ।
हनूमान् रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥

अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः ।
मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥

कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् । इति ॥

अनेन उपकारककुलोत्पन्नोऽपि प्रत्युपकर्तव्य इति सूचितम्। तथा चाभियुक्ताः— 'प्रथमवयसि पीतं तोयमल्पं स्मरन्तः शिरसि निहितभारा नालिकेरा नराणाम् । सलिलममृतकल्पं दद्युरापुत्रपौत्रं न हि कृतमुपकारं साधवो विस्मरन्ति ॥' इति ॥

तद्वचः समाकर्ण्य तूर्णमेव सागरजलान्निर्गत्य समुत्पतन्तं महीधरमवलोक्य अयमत्र यात्राप्रत्यूहः प्रत्युद्भूत इति वक्षसा तमधः पातयित्वा प्रयान्तं हनूमन्तं प्रहृष्टमना मैनाकः समभाषत— पर्वतपक्षच्छेदनाय प्रवृत्तं शतक्रतुमवलोक्य गम्भीरे सागराम्भसि प्राक्षिप्तवतो नभस्वतो मित्रभूतं मां कृतज्ञेन सागरेण तवाध्वश्रमापनयनाय प्रेषितं सपक्षमेवावगत्य मत्कृतां पूजामभिनन्द्य सुचिरं विश्रम्य गन्तासि ॥

अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता ।
धर्मं जिज्ञासमानेन किं [1]पुनर्यादृशो भवान् ॥

अनेन निर्गुणः सगुणो वा अतिथिरवश्यं पूजनीय इत्युक्तम् । तथा च हारीतः— 'अतिथीनागतान् शक्त्या पूजयेदविचा-

1 पुनस्त्वादृशो महान्

रतः' इति । एवं प्रार्थयमानं हिरण्यनाभं संमान्य कार्यगौरवेण निरालम्बे अम्बरे प्लवमानस्य पवमानसूनोः,

तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ।
प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥

अथ [1]यथापुरं लङ्कापुरं प्रति धावतो हनूमतो बलपराक्रमजिज्ञासया देवगन्धर्वैः सत्कृत्य प्रहिता सुरसा भीषणं वपुरालम्ब्य विदार्य वदनमरुणसारथेः सरणिं विन्ध्य इव पवनतनयसरणिमवरुद्ध्य तमेवमवादीत्—

मम भक्षः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ।
अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥

इति तद्वाक्यं निशम्य, 'दाशरथिना रामचन्द्रेण राक्षसापहृतभार्यागवेषणाय प्रेषितस्य मम साहाय्यं कर्तुमर्हसि । न चेत्सीतामवलोक्य प्रतिनिवृत्तस्त्वद्वदनं प्रविशामि' इति वदन्तं हनूमन्तं सुरसा,

प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम ।
वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥

इत्यभिधाय,

व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ॥

तदनु दशयोजनप्रभृत्याशतयोजनं पर्यायतो विवृतास्यायाः

---

1 यथापूर्वं

सुरसायाः पुरतः स्वयमपि तथैवोच्छ्रितः सहसैवाङ्गुष्ठमात्रः तद्वक्त्रं प्रविश्य निष्पत्य चाकाशम्,

प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते ।
गमिष्ये यत्र वैदेही सत्यं चासीद्वरस्तव ॥

इति सप्रश्रयं पवनतनयेनाभिहिता सुरसा तमेवमवादीत्-

अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ।
समानयस्व वैदेहीं राघवेण महात्मना ॥ इति ॥

ततः कुञ्जरहरिशार्दूलपन्नगोरगवाहनविमानैः सिद्धगन्धर्वतपोधनादिभिः समलंकृतमम्बरमालम्ब्य प्रावृडिन्दुमिव महाभ्रजालानि प्रविश्य निष्पतन्तं हनूमन्तमवलोक्य सिंहिका नाम राक्षसी क्षुदुपशमनाय छायाग्रहणेन तं समाक्षिपत् । समाक्षिप्तच्छायतया च पङ्गूकृतपराक्रमो मारुतिः विचिन्त्य तिर्यगूर्ध्वमधश्च चक्षुर्विक्षिपन्विवृतवदनायाः सिंहिकाया मुखमाविश्य तीक्ष्णतरैर्नखैर्मर्माण्युत्कृत्य सहर्षमुत्पपात । तत्कर्मजनितविस्मयस्तिमितानि भूतानि तमेवं प्रशशंसुः ॥

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव ।
धृति[1]र्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति ॥

अनेन धैर्यादिकं कार्यसाधकमित्युक्तम् । तच्च प्राक् प्रपञ्चितम् । इति देवगणसंस्तुतो मारुतिः अनेन प्रवृद्धतरेण कायेन लङ्काप्रवेशोऽनुचित इति मनसि विचिन्त्य,

1 दृष्टि

अहंकारस्यैव कर्तृत्वम्, 'विज्ञानं यज्ञं तनुते' इति श्रुत्या विज्ञानमयकोशस्यान्तःकरणस्यैव कर्तृत्वप्रतिपादनात्। न च बुद्धिविवक्षायां विज्ञानेनेति करणत्वेन निर्देशापत्तिः। योधाः युध्यन्ते, काष्ठानि पचन्ति इतिवत् कर्तृत्वेन निर्देशसंभवात्। तथा च तादृशान्तःकरणधर्माध्यासेनात्मनः कर्तृत्वाद्यनुभवः, न स्वरूपेण, 'असङ्गो ह्ययं पुरुषः' इति श्रुत्या तस्य सङ्गराहित्यावगमात्। कर्तृत्वादेर्वास्तवत्वे 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिभिः श्रुतिभिः कर्तृत्वाद्युपाधिराहितसत्यज्ञानात्मकब्रह्मणा सह कर्तृत्वादिविशिष्टस्यैक्यप्रतिपादनमनुपपन्नं स्यात्। एतेनानुमानमपि प्रत्युक्तम्, अप्रयोजकत्वात्। न च श्रवणादिविध्यानर्थक्यम्, अध्यस्तकर्तृत्वादिबन्धविमोकार्थत्वात्तेपाम्। 'यजेत' इत्यादिविधयोऽपि औपाधिकं कर्तारमधिकारिणमासाद्य नि[1]वृता भवेयुः। तदुक्तं पुराणे—'केवलात्मानमालम्ब्य मुने शास्त्रं न किञ्चन। प्रवर्तते ततो देहादन्यो ज्ञो भ्रान्तिमाश्रितः॥ आत्मा शास्त्राधिकारी स्यात् स हि संसरति भ्रमात्। तस्मिन्नात्मनि मोहेन बन्धमोक्षौ हि कल्पितौ॥' इति॥

'परं ज्योतिरुपसंपद्य' इत्यादिश्रुतिरपि न मुक्तिकालीनं कर्तारमाह। तथा हि—अस्माच्छरीरात्समुत्थाय स्थूलसूक्ष्मशरीरविविक्तमात्मानं ज्ञात्वा स्वेन रूपेणाभिनिष्पद्येत; अहं ब्रह्मास्मीत्यखण्डाकारवृत्त्या साक्षात्करोति। तत्कर्तृत्वं चाविद्याकालीनमिति श्रवणादि कर्तुरन्तःकरणस्यैव। परं ज्योतिरुपसंपद्येत्यत्र उपसंपत्तिश्च

---

1 निवृत्ता

केवलानन्दब्रह्मरूपेणावस्थानम् । 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुत्यानुत्क्रान्तप्राणस्य विदुषः स्वस्वरूपब्रह्मगमनानुपपत्तेः । क्त्वाप्रत्ययश्च स्वरूपेणाभिनिष्पद्य ततः परं ज्योतिरुपसंपद्यत इंति संपद्यते, मुखं व्यादाय स्वपितीतिवत् । स तत्र पर्येति परितः सर्वत एति सर्वात्मप्राप्तः स्वयं सर्वात्मा भवति । जक्षत्क्रीडन् रममाण इति[च] ब्रह्मस्वरूपं प्राप्तस्यानवाप्तकामाभावान्निखिलानन्दप्राप्तिपरेति न मुक्तिकालीनं कर्तारं प्रतिपादयति । अत एवान्तःकरणस्यैव कर्तृत्वे सुषुप्त्यादावन्तःकरणविनाशात्कृतहानादिदोषमाशङ्क्य 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्' इति सूत्रेण आ मुक्तेरन्तःकरणानुवृत्त्या उक्तदोषः परिहृत आचार्यैः—

स्यादेतत् । यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत, ततो बुद्धिवियोगे सति आत्मनो विभक्तस्यालक्ष्यत्वात् असत्त्वमसंसारित्वं वा प्रसज्येतेत्यत उत्तरं पठति— **यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्** इति । नेयमाशङ्का । कस्मात्? यावदात्मभावित्वाद्बुद्धिसंयोगस्य । यावदात्मा संसारी भवति, यावदस्य सम्यग्दर्शने[न]संसारित्वं न निवर्तते, तावदस्य बुद्ध्या संयोगो न शाम्यति । यावदेव चायं बुद्ध्युपाधिसंबद्धस्तावदेवास्य जीवत्वं संसारित्वं च । परमार्थतस्तु जीवो नाम बुद्ध्युपाधिसम्बन्धपरिकल्पितस्वरूपव्यतिरेकेण नास्ति, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेः । कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति? तद्दर्शनादित्याह । तथा हि शास्त्रं दर्शयति— 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः [स] समानः सन्नुभौ लोकावनुसंच-

रति ध्यायतीव लेलायतीव' इत्यादि । तत्र विज्ञानमयो बुद्धि-गुणप्रधानः । यथा स्त्रीमयोऽसौ देवदत्त इति स्त्रीरागादिप्रधानोऽवगम्यते, तद्वत् । समानः सन्नुभौ लोकावनुसंचरति इति च लोकान्तरगमनेऽपि अवियोगं बुद्ध्या दर्शयति । केन समानः ? तयैव बुद्ध्येति गम्यते, सन्निधानात् । तच्च दर्शयति— 'ध्यायतीव लेलायतीव' इति। एतदुक्तं भवति—नायं स्वतो ध्यायति चलति वा ध्यायन्त्यां तु बुद्धौ ध्यायतीव, चलन्त्यां तु चलतीवेति । अपि च मिथ्याज्ञानपुरस्सरोऽयमात्मनो बुद्ध्युपाधिसम्बन्धः । न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति। अतो यावद्ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबन्धो न शाम्यति । दर्शयति च— 'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति ॥

ननु सुषुप्तिप्रलययोर्न बुद्धिसम्बन्धोऽवगन्तुं शक्यते, 'सता सोम्य तदा संपन्नो भवति' इति (च) वचनात् । कृत्स्नविकार-प्रलयाभ्युपगमाच्च ।[तत्]कथं यावदात्मभावित्वं बुद्धिसम्बन्धस्येति, अत्रोच्यते— **पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात्** । यथा बाल्यादिषु विद्यमानान्येव पुंस्त्वादीनि यौवने आविर्भवन्ति, एवं बुद्धिसम्बन्धोऽपि शक्त्यात्मना सुषुप्तिप्रलययोर्विद्यमान एव पुनः प्रबोधप्रसवयोराविर्भवति । दर्शयति च— 'त इह व्याघ्रो वा सिंहो वा' इत्यादिना । तस्माद्यावदात्मभावी बुद्धिसम्बन्ध इति ॥

कर्ता शास्त्रार्थवत्त्वात् [इति च] बुद्ध्युपाधिकमेव कर्तृत्वं जीवस्य । अत एव 'यजेत स्वर्गकामः' इत्यादिश्रुतिप्रतिपन्नं

कर्तृत्वादिकं पारमार्थिकमिति पूर्वपक्षं कृत्वा औपाधिकमेवेति सिद्धान्तितम् । तथाहि—

कर्ता जीवः स्यात् । कस्मात्? शास्त्रार्थवत्त्वात् । एवं सति 'यजेत' इत्यादिशास्त्रमर्थवद्भवेत् । अन्यथानर्थकं स्यात् । तद्धि कर्तुः सतः कर्तव्यविशेषमुपस्थापयति । न चासति कर्तृत्वे तदुपपद्यते । तथेदमपि शास्त्रमर्थवद्भवति । 'एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति ॥

विहारोपदेशात्। इतश्च जीवस्य कर्तृत्वम्, यज्जीवप्रक्रियायां स्वप्ने विहार उपदिश्यते— 'स ईयतेऽमृतो यत्र कामम्' इति ॥

उपादानात्। जीवप्रक्रियायां उपादानश्रवणादपि कर्तृत्वम्, 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति, 'प्राणान् गृहीत्वा' इति च ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ।

'विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च' इति लौकिकवैदिकक्रियाकर्तृत्वव्यपदेशाच्च कर्तृत्वम् । ननु विज्ञानशब्दो बुद्धौ समधिगतः । कथमनेन जीवस्य कर्तृत्वमुच्यत इति चेत्— न, जीवस्यैव एष निर्देशो न बुद्धेः । न चेज्जीवस्य स्यात् विज्ञानेनेति निर्देशविपर्ययः स्यात् । दृश्यते ह्यन्यत्र बुद्धिविवक्षायां करणत्वेन निर्देशो विज्ञानशब्दस्य 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति । अतो बुद्धिव्यतिरिक्तात्मनः कर्तृत्वमिति ॥

ननु यद्यात्मा स्वतन्त्रः कर्ता स्यात्, तर्हि इष्टमेव संपादयेन्नानिष्टम् । न च तथोपलभ्यते । अतोऽकर्तेत्यत उत्तरं पठति—

सूतसंहितायां च—‘ वर्णाश्रमसमाचारात्प्रसन्ने परमेश्वरे । साक्षात्तद्विषयं ज्ञानमचिरादेव जायते ॥ ज्ञानादज्ञानविध्वस्तिर्न कर्मभ्यः कदाचन । अज्ञाने सति संसारो ज्ञाने सति विमुच्यते । तस्मात् ज्ञानेन मुक्तिः स्यादज्ञानस्य क्षयान्मुने ॥’ इति ॥

तत्रैव— ‘ज्ञानेनैव निवृत्तिः स्यादज्ञानस्य न कर्मणा । भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि दृष्टे ह्यात्मनि सुव्रत ॥’ इति ॥

तत्रैवान्यत्र— ‘अशरीरं शरीरेषु महान्तं विभुमीश्वरम् । आनन्दमक्षरं साक्षान्मत्वा धीरो न शोचति ॥ विभेदजनकेऽज्ञाने नष्टे ज्ञानबलान्मुने । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ आत्मा शुद्धः सदा नित्यः सुखरूपः स्वयं प्रभुः । अज्ञानान्मलिनो भाति ज्ञानाच्छुद्धो विभात्ययम् ॥ अज्ञानमलपङ्कं यः क्षालयेत् ज्ञानतोयतः । स एव सर्वदा शुद्धो नान्यः कर्मरतो हि सः ॥’ इति ॥

तत्रैव योगखण्डे—‘विरक्तस्य तु संसारात् ज्ञानं कैवल्य-साधनम् । तेन पाशापहानिः स्यात् ज्ञात्वा देवमिति श्रुतिः ॥’ ‘अहो ज्ञानामृतं मुक्त्वा मायया परिमोहिताः । परिभ्रमन्ति संसारे सदासारे नराधमाः ॥ ज्ञानामृतरसो येन सकृदास्वादितो भवेत् । स सर्वकार्यमुत्सृज्य तत्रैव परिधावति ॥ आत्मैवेदं जगत्सर्वमिति जानन्ति पण्डिताः । अज्ञानेनावृता मर्त्या न विजानन्ति शङ्करम् ॥ अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः । ज्ञानात्तस्य निवृत्तिः स्यात्प्रकाशात्तमसो यथा ॥ आत्मस्वरूप-विज्ञानादज्ञानस्य परिक्षयः । क्षीणेऽज्ञाने महाप्राज्ञ रागादीनां

परिक्षयः ॥ तस्मादज्ञानमूलानि सर्वदुःखानि देहिनाम् । ज्ञाने-नैव निवृत्तिः स्यादज्ञानस्य न कर्मणा ॥' इति [च] ॥

तत्रैव ध्यानप्रकरणे—

'ज्ञानादज्ञानविध्वस्तिः सैव तस्य विमुक्तिदा ।' इति ॥

तत्रैव मुक्तिसाधनप्रकरणे—'आत्मनः परमा मुक्ति-र्ज्ञानादेव न कर्मणा । ज्ञानं वेदान्तवाक्यानां महातात्पर्यनिर्ण-यात् ॥ अनेनैवात्मनोऽज्ञानमात्मन्ये[1]व विलीयते । विलीने चात्मनोऽज्ञाने द्वैतवस्त्वादि नश्यति ॥ घटाज्ञानं घटज्ञानाद्यथा लोके विनश्यति । तथात्माज्ञाननाशेन संसारश्च विनश्यति ॥ तस्मादज्ञानमूलस्य संसारस्य क्षयो भवेत् । आत्मनस्तत्त्वविज्ञाना-त्तत्त्वं ब्रह्मैव केवलम् ॥' इति ॥

पराशरपुराणेऽपि—'जीवब्रह्मैक्यविज्ञानाद्यदज्ञानं विन-श्यति । तन्न भिन्नं न चाभिन्नं नापि सत्सद्विलक्षणम् ॥ भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि ब्रह्मज्ञानोदये सति ॥' इति ॥

तत्रैव प्रायश्चित्ते—'या वृत्तिर्मानसी शुद्धा जायते वेदवाक्यतः । तस्यां सा चिदभिव्यक्ता स्वतः सिद्धा च शाङ्करी ॥ तदेव(तद्)ब्रह्मविज्ञानं तदेवाज्ञाननाशनम् । ब्रह्मज्ञाने च संजाते ब्रह्मा-ज्ञानं निवर्तते ॥ घटज्ञाने च सञ्जाते घटाज्ञानं यथा तथा । अतः परमविज्ञानमज्ञानं ग्रसते सदा ॥ सम्यग् ज्ञाने समुत्पन्ने तेनाज्ञानं निवर्तते । तन्निवृत्तौ च तन्मूलं समस्तं प्रविनश्यति ॥ आत्मा-

---

1 नैव

नात्मविवेकाख्यविवेकादित्यसन्निधौ । कथं नामाभिमानाख्यं तमस्तिष्ठति सत्तमं ।। तस्माद्ब्रह्मात्मविज्ञानं ग्रसत्यज्ञानमात्मनः । अज्ञानजनितं कर्म तत्फलं च न संशयः ॥' इति ॥

(तत्रैव— 'सम्यग्ज्ञाने समुत्पन्ने तेनाज्ञानं निवर्तते । तन्निवृत्तौ च तन्मूलं समस्तं प्रविनश्यति ॥' [इति च] ॥)

शास्त्रार्थप्रकरणे— 'स्वात्मालाभनिमित्तं यद्बन्धनं पुरुषस्य तत् । स्वात्मलाभेन नष्टं स्यात्स्वात्ममात्रतयैव तु ॥' स्वात्मलाभेन— आत्मज्ञानेन ॥

तथा लिङ्गपुराणेऽपि — 'अज्ञानपाशबद्धत्वादमुक्तः पुरुषः सदा । ज्ञानात्तस्य निवृत्तिः स्याज्ज्ञानं वेदान्तवाक्यजम् ॥ यथाग्निस्तृणकाष्ठादिनिर्मिते मन्दिरे स्थितः । मन्दिरं दहति ज्ञानं तद्वदज्ञानमन्दिरम् ॥' इति ॥

तत्रैव— 'ऐश्वरं परमज्ञानं लब्ध्वा वेदान्तवाक्यजम् । छित्त्वा मायां महानन्दं भजध्वं मोक्षसंज्ञितम् ॥' इति ॥

तत्रैव दशमाध्याये— 'ज्ञानादज्ञानविच्छित्तिर्लोके सिद्धा श्रुतावपि ।' इति । तस्मादज्ञानं ज्ञानान्निवर्तत इति युक्तम् ॥

'वीतमोहः प्रकृतिमापेदे' इत्यनेनाज्ञाने निवृत्ते अशनायाद्यतीतब्रह्मात्मभावेनावातिष्ठत इत्युक्तम् । नन्वेतदसङ्गतम्, स्वाभाविककर्तृत्वादिमत अशनायाद्यतीतब्रह्मात्मभावेनावस्थानानुपपत्तेः । तथा हि—

तत्त्वतः जीवः कर्ता भोक्ताभ्युपगन्तव्यः, 'अहं करोमि, अहं भुञ्जे' इत्यनुभवात् । न चायं भ्रमः, शुक्तौ रजतप्रत्य-

क्षस्य 'नेदं रजतं' इतिव 'नाहं करोमि नाहं भुञ्जे' इति बाधकानुभवाभावात् । न च जीवस्यानुभूयमानमपि कर्तृत्वादिकमपारमार्थिकमिति वाच्यम् । तथा सति 'यजेत स्वर्गकामः' इत्यादिकर्मकाण्डजातं निरधिकारिकं स्यात् ॥

'मुक्त्याश्रय आत्मा, कर्ता आत्मत्वात्, व्यतिरेकेण घटवदि'त्यनुमानादप्यात्मनः स्वाभाविककर्तृत्वसिद्धिः । न चाप्रयोजकत्वम्; बन्धमोक्षयोर्वैयधिकरण्यापत्तेः । श्रवणादिसाध्यज्ञाननिवर्त्यकर्तृत्वादिबन्धस्यात्मन्यभावात् श्रवणादिविधयोऽप्यनर्थका भवेयुः ॥

श्रुतिरप्यात्मानं कर्तारमाह— 'स हि कर्ता' 'एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' 'विज्ञानं यज्ञं तनुते' इत्यादि[का] । नन्वत्र विज्ञानस्य कर्तृत्वं व्यपदिश्यते । विज्ञानशब्दश्च बुद्धौ समधिगतः । कथमनेन जीवस्य कर्तृत्वमुच्यत इति चेत्, न । बुद्धेरेष[न]निर्देशः; किं तु जीवस्य । अन्यथा विज्ञानेनेति क[रणतया]निर्देशः स्यात् । दृष्टश्च करणत्वेन निर्देशो बुद्धिविवक्षायाम्— 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति । तस्मादनेन जीवस्यैव कर्तृत्वं व्यपदिश्यत इति । किं च, 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' 'स तत्र पर्येति जक्षत्क्रीडन् रममाणः' इति च स्वरूपाविर्भावलक्षणमुक्तावपि कर्तृत्वश्रवणाज्जीवस्य कर्तृत्वादिकं पारमार्थिकमिति गम्यते । अतः प्रत्यक्षादिभिरवगम्यमानं कर्तृत्वादिकं पारमार्थिकमिति चेत्, उच्यते—

ततः शरीरं संक्षिप्य तन्महीधरसन्निभम् ।
पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥

अत्र आत्मवान् आत्मसाक्षात्कारवान् वीतमोहः निवृत्ताज्ञानतत्कार्यः प्रकृतिं अशनायाद्यतीतब्रह्मात्मस्वरूपं यथा प्राप्नोति तथा हनूमानपि पूर्वरूपं प्राप्तवान् इति ॥

नन्वत्र ज्ञानवान् वीतमोह इत्युक्त्या ज्ञानेनाज्ञानं निवर्तत इत्युक्तम् । तत्राज्ञानं ज्ञानाभावो वा भावरूपाज्ञानं वा? नाद्यः, ज्ञानात्यन्ताभावध्वंसयोः अनन्तत्वेन ज्ञानानिवर्त्यत्वात्, प्रागभावे प्रमाणाभावात् । भावे वा ज्ञानस्य स्वप्रागभावरूपाज्ञाननिवृत्तित्वेन तन्निवर्तकत्वानुपपत्तेः । न च प्रागभावातिरिक्तं भावरूपाज्ञानं संभाव्यते, लक्षणप्रमाणानिरूपणात् । तथा हि—

न तावदनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वं तल्लक्षणम्, अविद्यासंबन्धेऽतिव्याप्तेः । न हि साक्षात् ज्ञाननिवर्त्यं तत् । अनादिपदवैयर्थ्यात्, कल्पितस्य दोषजन्यत्वानियमेनानादित्वासंभवात् । अनादिभावस्यात्मवत् ज्ञाननिवर्त्यत्वासंभवाच्च । नापि भ्रमोपादानत्वमज्ञानलक्षणम्, अनुत्पादितभ्रमेऽज्ञानेऽव्याप्तेः । मायावच्छिन्नं ब्रह्मैव उपादानमिति मते असंभवाच्च । द्वितन्तुकरज्जौ सूत्रद्वयस्येव मायाब्रह्मणोरुपादानत्वमते ब्रह्मण्यतिव्याप्तेश्च ॥

प्रमाणमपि प्रत्यक्षमनुमानं वा? आद्येऽपि 'अहमज्ञः' इत्यनुभवो वा, 'त्वदुक्तमर्थं न जानामि' इति वा? नाद्यः, अहमर्थस्य भावरूपाज्ञानानाश्रयत्वेन सुखं न जानामि इति प्रत्यक्षवत्तस्य ज्ञानाभावविषयत्वात् । अन्यथा परोक्षज्ञानादज्ञान-

निवृत्त्या परोक्षज्ञानदशायां बर्हि न जानामि इत्यनुभवापाताच्च। नापि 'त्वदुक्तमर्थं न जानामी'त्याद्यनुभवः, तस्यापि जडविषयका-ज्ञानाभावेन ज्ञानाभावविषयत्वस्यैव वक्तव्यत्वात् । नापि 'देवदत्तप्रमा देवदत्तगतप्रमाप्रागभावातिरिक्तानादिनिवर्तिका, प्रमात्वात्, यज्ञदत्तप्रमावत्' इत्यनुमानं प्रमाणम्; देवदत्तसुखादि-प्रमायां बाधात्। किं च, साध्ये देवदत्तगतत्वं प्रमातत्प्राग-भावान्यतरविशेषणम्, तदतिरिक्तानादेर्वा ? नाद्यः, वृत्तेस्तत्प्रति-बिम्बितचैतन्यस्य वा अन्तःकरणाश्रितत्वेनात्मगतत्वाभावात्। प्राग-भावस्य प्रतियोगिदेशानियतत्वेनात्मावृत्त्या तद्घटितसाध्याप्रसिद्धेः। न द्वितीयः, यज्ञदत्तगतप्रमाप्रागभावस्य देवदत्तगतत्वाभावेन दृष्टान्ते साध्यवैकल्यादिति चेत्, उच्यते—

अनादित्वे सति ज्ञाननिवर्त्यत्वमज्ञानत्वम्। न च प्राग-भावेऽतिव्याप्तिः, तस्यैवाभावात्। तत्सत्त्वे प्रागभावाः परिमिता अपरिमिता वा? आद्ये ज्ञानोत्पत्त्या स्वतस्तन्नाशसंभवेन श्रवणादि-विधिवैयर्थ्यप्रसङ्गात् । द्वितीये, अपरिमितप्रागभावक्षयायोगे-नानिर्मोक्षप्रसङ्गः। न च अविद्यासंबन्धेऽतिव्याप्तिः, साक्षात् ज्ञाननिवर्त्यत्वस्यैव विवक्षितत्वात् । अविद्यासंबन्धस्याविद्या-निवृत्तिद्वारा ज्ञाननिवर्त्यत्वात्। न चानादिपदवैयर्थ्यम्, प्रत्यभि-ज्ञाननाश्यसंस्कारेऽतिव्याप्तिवारकत्वात् । न च कल्पितस्यानादि-त्वासंभवः, स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वलक्षणकल्पित-त्वस्यानादित्वेनाविरोधात्। न च कल्पितस्य दोषजन्यत्वनियमः, अप्रयोजकत्वात्। अन्यथा परमार्थस्यापि गुणजन्यत्वं नियतमिति नित्यमात्रविलोपप्रसङ्गः। वस्तुतस्तु कल्पितत्वे जडत्वं प्रयोजकम्।

तच्च दोषाजन्यत्वेऽपि अज्ञानादेरक्षतम् । न च कल्पितत्वे चैतन्यं प्रयोजकमिति वैपरीत्यम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि-श्रुतिभिः सत्यज्ञानात्मनावगतस्यात्मनः कल्पितत्वे जगदान्ध्य-प्रसङ्गात् , आत्मनो जगदवभासस्वरूपत्वात् । तथा च श्रुतिः — 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति । कल्पितस्याज्ञानस्यानादित्वं तु (ब्रह्मविषयमज्ञानं अनादि) सर्गाद्य-कालीनकार्योत्पादकत्वम् (सम्भवात्) । भ्रान्तिपरिणा(म्यज्ञान)मित्वं (मिति) वा (लक्षणम्)। न च ब्रह्मैव जगदुपादानमिति मतेऽसम्भवः, मायाब्रह्मणी उपादानमिति मते (च) ब्रह्मण्यतिव्याप्तिश्च ; अज्ञान-स्यैव परिणामित्वात् । ब्रह्मणः कार्यसत्तात्मनया विवर्तोपादानत्वे-ऽपि परिणामित्वासंभवात् । अज्ञानस्यैकत्वेनानुत्पादितभ्रमाज्ञाना-भावात् नाज्ञाने अव्याप्तिः ॥

तत्र 'अहमज्ञः,' 'अहं न जानामि' इत्यनुभवः प्रमाणम् । तथा हि— नास्य प्रागभावो विषयः, तत्सद्भावे प्रमाणाभावात् । नापि ध्वंसः, विशेषज्ञानस्यैतत्पूर्वमनुदयेन तत्प्रतियोगिकध्वंस-विषयत्वासंभवात् । ज्ञानसामान्यस्य ध्वंसाप्रतियोगित्वाच्च । अहम-र्थस्य चिज्जडसंवलितत्वेन भावरूपाज्ञानाश्रयत्वसंभवान्न तदा-श्रयत्वानुपपत्तिः । यदुक्तम्— अज्ञानानिवर्तकपरोक्षज्ञाने सति 'वह्निं न जानामि' इत्यनुभवापत्तिरिति, तन्न, ज्ञानसामान्य-स्याज्ञानानुभवविरोधित्वात् । 'जन्यसविकल्पकाजन्यदेवदत्त-घटचाक्षुषप्रमा देवदत्तगतप्रमाप्रागभावातिरिक्तानादिनिवर्तिका प्रमात्वात् , यज्ञदत्तघटचाक्षुषप्रमावत्' इत्यनुमानमपि तत्र प्रमाणम् । न च सुखादिप्रमायां बाधः, तद्वारणार्थं घटादि-

पदोपादानात्। किंचेत्याद्यपि न, देवदत्तगतत्वस्य प्रमाप्रागभाव-विशेषणत्वात्। उक्तप्रमाया देवदत्तपदार्थान्तःकरणनिष्ठतया प्रतियोगिसमानदेशस्य प्रागभावस्यापि तन्निष्ठत्वात् ॥

श्रुतिरपि मानम्– 'अविद्यायामन्तरे वर्तमानाः' 'नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति' 'एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' 'न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरं बभूव' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इत्यादि। न चानादित्वे अज्ञानस्य ज्ञाननिवर्त्यत्वानुपपत्तिः, अनादिभावस्यान्यत्र निवृत्त्यदर्शनादिति वाच्यम्। तर्हि त्वदभिमतप्रागभावस्यापि अभावान्तरे निवृत्तेरदर्शनेनानिवृत्तिरेव स्यात्। प्रमाणबलादन्यत्रादृष्टस्यापि कल्पनमज्ञानेऽपि तुल्यम्। न चाज्ञानस्य ज्ञाननिवर्त्यत्वे प्रमाणाभावः। ज्ञाने सत्यज्ञानाननुभवात्। तदसत्त्वे च नियमेन 'न जानामि' इत्यनुभवात् ज्ञानेनाज्ञानं निवृत्तमित्यनुभवाच्चेति ज्ञाननिवर्त्यं तत्। 'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः।' 'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ज्ञाननिर्मथनाभ्यासादाशां दहति पण्डितः ॥' 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥' इत्यादिश्रुतिरपि अत्र मानम् ॥ स्मृतिरपि—

'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते।
योगी मायाममेयाय तस्मै योगात्मने नमः' ॥ इति ॥

गीतायां च—'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनि ॥' इति ॥

उपलब्धिवदनियमः । कारकान्तराप्रयोज्यत्वे सति करणादिकारकप्रयोक्तृत्वं स्वातन्त्र्यं, न सहकार्यन्तरानपेक्षत्वम् । तथा सति ईश्वरोऽपि स्वतन्त्रो न भवेत् । देश[1]कालादिनिमित्तविशेषापेक्षि(त)त्वात् । लोकेऽपि पक्तुः पाके स्वातन्त्र्यं न स्यात्, उदकाद्यपेक्षत्वात् । एवं च यथोपलब्धौ स्वतन्त्रोऽप्यात्मा इष्टमनिष्टं चोपलभते सहकारिविशेषात्, तथा इष्टानिष्टक्रियायां सहकारिवैचित्र्यादनियमेन प्रवर्तेत इत्यविरोधः ॥

शक्तिविपर्ययात् । यदि बुद्धिः [2]कर्त्री स्यात्, तदा शक्तिविपर्ययः स्यात् । करणशक्तिर्बुद्धेर्हीयेत; कर्तृशक्तिरापद्येतेत्यर्थः । एवं च तस्याः सर्वार्थकारिकरणमन्यत्कल्पयितव्यम् । ततश्च करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात् संज्ञामात्र विवादो न वस्तुभेद इति । अतोऽपि जीवस्य कर्तृत्वम् ॥

समाध्यभावाच्च । योऽयमात्मनो ज्ञानप्रयोजनकः समाधिरुपदिष्टः 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' 'ओमित्येवं ध्यायथ आत्मानम्' इत्यादिभिः, सोऽप्यसत्यात्मनः कर्तृत्वादिबन्धे नोपपद्यते । तस्मादप्यस्य पारमार्थिककर्तृत्वादिसिद्धिः ॥

यथा च तक्षोभयथा । न स्वाभाविकं कर्तृत्वमात्मनः संभवति, अनिर्मोक्षप्रसङ्गात्, स्वभावानपायात् ॥

ननु मुक्तौ कर्तव्याभावेऽपि कर्तृस्वभावोऽनुवर्तताम् । यथा ज्ञेयाभावेऽपि ज्ञानस्वभावोऽनुवर्तते, तद्वदिति चेत्— न,

1. काल 2. कर्ता

'विज्ञानमानन्दं ब्रह्म' इति ज्ञानस्वभाववत् कर्तृत्वस्वभावस्याश्रवणात् । तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वम्, न स्वाभाविकम् । तथा च श्रुतिः— 'ध्यायतीव लेलायतीव' इति । न हि परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुत्या निषेधात् । न च पर एव तर्हि संसारी स्यात्, अन्यस्य निषेधादिति वाच्यम्, अविद्याप्रत्युपस्थापितत्वात्कर्तृत्वभोक्तृत्वयोः । तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयति— 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इति ॥

तदेतदाहाचार्यः— 'यथा च तक्षोभयथा' इति । त्वर्थे चायं चः पठितः । न स्वाभाविकमात्मनः कर्तृत्वमग्नेरिवौष्ण्यम् । यथा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति । स एव स्वगृहप्राप्तौ विमुक्तवास्यादिकरणो निर्व्यापारः सुखी भवति । एवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितयोः कर्ता दुःखी भवति । स एव तच्छ्रमापनुत्तये स्वात्मानं परं ब्रह्म प्रविश्य [वि]मुक्तकार्य[1]करणसङ्घातोऽकर्ता सुखी भवति सम्प्रसादावस्थायाम् । तथा मुक्तावस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलः सुखी भवति ॥

यत्तूक्तं शास्त्रार्थवत्त्वादिभिः स्वाभाविकमात्मनः कर्तृत्वमिति; तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्तव्य-

---

1. कारण

विशेषमुपदिशति, नात्मनः कर्तृत्वं प्रतिपादयति । न चास्य स्वाभाविकं कर्तृत्वम्, अज्ञात्म(त)त्वोपदेशादित्यवोचाम । तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते । 'कर्ता विज्ञानात्मा पुरुषः' इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथा-प्राप्तमेव कर्तृत्वमनुवदिष्यति । एतेन विहारोपादाने परिहृते, तयो-रप्यनुवादरूपत्वात् । यस्त्वयं व्यपदेशो दर्शितः 'विज्ञानं यज्ञं तनुते' इति, स बुद्धेरेव कर्तृत्वं प्रतिपादयति, विज्ञानशब्दस्य [तत्र]प्रसिद्धत्वात्, मनोऽनन्तरपाठाच्च । न च बुद्धेः करणत्वेन तृतीयान्तनिर्देशापत्तिः । उभयथापि निर्देशदर्शनात् लोके— योधा युध्यन्ते, योधैर्युध्यते राजा इति । न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति, सर्वकारकाणां स्वस्वव्यापारेषु कर्तृत्वस्यावश्यम्भावित्वात् । उपलब्ध्यपेक्षं तु तेषां करणानां करण-त्वम् । सा चात्मनः । न च तस्यामप्यात्मनः कर्तृत्वमस्ति, नित्यो-पलब्धिस्वरूपत्वात् । न चैवं सति करणान्तरकल्पनाप्रसङ्गः, बुद्धेः करणत्वाभ्युपगमात् । समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः, यथाप्राप्तं कर्तृत्वमुपादाय समाधिविधानात् । तस्मादुपाधि-निबन्धनमात्मनः कर्तृत्वादिकमिति ॥

पुराणेष्वपि औपाधिकमेव कर्तृत्वं व्यपदिश्यते । तथा हि ।

सूतसंहितायाम्— 'कर्तृत्वं वास्तवं नैव जीवस्य मुनि-सत्तम । भोक्तृत्वं वाक्रियस्यास्य ब्रह्मभूतात्मनः सदा ॥ कर्तृत्वं चैव भोक्तृत्वं यदि स्वाभाविकं भवेत् । आत्मनो न निवर्तेत केनचित्साधनेन च ॥ एकोऽपि सर्वदेहेषु भ्रमाद्भि-न्नोऽवभासते । घटाकाशमठाकाशविभागेन यथा नभः ॥ अक्रि-

ऽोऽपि स्वतन्त्रात्मा भ्रान्त्या सर्वविकारवान् । जलस्य चलनादेव यथा चलति भास्करः ॥ अतीव धवलो रक्तो विभाति स्फटिको यथा । रक्तोपाधिवशादात्मा संसारी चान्यसङ्क्रमात् ॥ वर्णाश्रमवयोऽवस्थाविशेषो यस्य भासते । तस्यैव हि निषेधाश्च विधयः सकला अपि ॥ सर्वोपाधिविनिर्मुक्तं चैतन्यं सर्वसाक्षिकम् । स्वात्मना पश्यतः कर्म कथं ब्रूहि शुभाशुभम् ॥ सर्वसाक्षिणमीशानं सर्वसंबन्धवर्जितम् । [1]साक्षादात्मतया पश्यन्कथं बध्येत कर्मणा ॥' इति ॥

तत्रैव क्षेत्रप्रशंसायाम्— ' वेदवेदान्तसारस्य प्रणवाख्यस्य पार्वति । ब्रह्मणस्त्वर्थभूतोऽहं संसारद्रावकोऽचिरात्[2] ॥ कृपया मामकं रूपं परिपूर्णं परामृतम् । आनन्दसत्यचिद्रूपं तारकं तमसः परम् ॥ स्वयंभान्तं निराधारं दास्यामि प्रत्यगात्मना ॥ येनैवाशु महादुःखं प्राणेशोऽयं महेश्वरि । परित्यज्य स्वसंसारं परानन्दो भवेत्स्वयम् ॥' इति ॥

तत्त्वप्रकरणेऽपि— ' शिवस्य परतत्त्वस्य स्वभावः सकलं शुक । तदधीनस्तत्[3]ऽन्येषामिति तत्वविदां स्थितिः ॥ साक्षात्परतरं तत्त्वं स्वभावादेव निर्मलम् । उत्पत्त्यादिविनिर्मुक्तं स्वतन्त्रं पूर्णमद्वयम् ॥ प्रकृतिप्राकृतातीतं लक्ष्यलक्षणवर्जितम् । बन्धमोक्षविनिर्मुक्तं बन्धमोक्षविधायकम् ॥ कालातीतं कलातीतं कारकग्रामवर्जितम् । अनन्तमखिलाधारमपरिच्छिन्नवैभवम् ॥ स्वात्मरूपपरानन्दं परशक्तिसमन्वितम् । वेद्यावेद्याखिलोल्लासविलासपरिबृंहितम् ॥ तं विदित्वा विमुच्यन्ते देशिकानुग्रहेण च ।

---

1. साक्षाद्ब्रह्मतया 2. विराट् 3. न तद्

समनुमेनिरे ॥ सापसाराणि दुर्गाणि भुवः सानूपजाङ्गलाः । निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छताम् ॥ बह्वादानोऽल्पनिस्रावः ख्यातः पूजितदैवतः । ईप्सितद्रव्यसंपन्नो हृद्यैः स्वाप्तैरधिष्ठितः ॥' इति । जाङ्गलदेशश्च—'अल्पोदकतृणो यस्तु प्रयतः प्रचुरातपः । स ज्ञेयो जाङ्गलो देश उक्तलक्षणलक्षितः ॥' एवमेकैकमपि दुर्गं दुस्साधं, किमु अनेकदुर्गसमुदायात्मकं लङ्कानगरम् इति ॥

तदिदानीं जीवति वा न वेति सीतामवगत्य ततः समीहितं चिन्तयामि । न चानेन रूपेणात्युग्रनिशाचरपरिपालिता पुरी प्रवेष्टुं शक्यते इत्यतः—

लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया ।
प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥

भूताश्चार्था विपद्यन्ते देशकालविरोधिताः ।
विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥

अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते ।
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥

एवं विचिन्त्य प्लवगवरस्तत्रभवन्तीं सीतामधिजिगमिषुः प्रच्छन्नसंचारहेतोर्गभस्तिमालिनोऽस्तमयमभिललाष । तदनु प्रतीचीं दिशं प्रविशति भगवति सहस्रदीधितौ अपरार्णवतटाभ्यर्णसमुदीर्णायां विद्रुमलताश्रियामिव पाटलितायां संध्यायां पृषदंशकमात्राकृतिर्मारुतिस्तां पुरीं प्रविवेश । तदनु त्रिभुवनमहनीयशौर्य-

राशेरार्यस्य रामभद्रस्य आज्ञया दौत्येन संप्रस्थितायानिलसुताय लङ्कालयानखिलान्प्रकाशयितुमिव सिन्दुवारकुसुमपाण्डरैः किरणोत्करैर्दश दिशोऽपि प्रकाशयन्नाविर्बभूव भगवान्कुमुदबान्धवः ॥

इति द्वितीयः सर्गः ।

अथ तृतीयः सर्गः ॥

तृतीये—ततो हनुमाननवरतमारक्षकराक्षसगणसंरक्ष्यमाणं काञ्चनमयं प्राकारमासाद्य समुत्तुङ्गसौधोत्सङ्गसङ्गिनीनामङ्गनानामाभरणरवोन्मिश्रेणातिमधुरवेणुगीतिरवेण मन्दरगिरिमथ्यमानजलधिगम्भीरदुन्दुभिनादपुरःसरेण तूर्यनिनादेन निर्दयसंमर्दितमृदङ्गशङ्खरवनिर्भर्त्सितक्रौञ्चबर्हिणनिनदेन च सर्वतः प्रतिनादिताम्, तप्तकनकमयद्वारैर्वैदूर्यमयवेदिकैर्मणिमयसोपानैः स्फाटिकमणिकुट्टिमैः राजतामलपाण्डरैर्गृहैरुपशोभितामनुत्तमामनुपमां तामवलोक्य विस्मयस्तिमितमानसः, कुमुदाङ्गदमैन्दद्विविदसुग्रीवसुषेणकेतुमालवानरयूथप्रमुखानन्तरेणान्यैर्नेयं पुरी प्रवेष्टुं शक्यते। तत्कथमखिलवानरसमूहो दुस्तरमर्णवं विलङ्घ्य मध्येसमुद्रं सर्वतः सुभद्रं लङ्कापुरमायास्यति । अथ वा, अधरीकृताधिकपराक्रमशक्रविक्रमयोः रामलक्ष्मणयोर्बाणानामाकिञ्चित्करमिदमिति संचिन्त्य लङ्कां प्रविवेश। प्रविशन्तं हनूमन्तमभियोद्धुं लङ्काधिदेवता परिगृहीतक्रूरवेषा तदभिमुखमाजगाम ॥

तदनु लङ्काधिदेवतामात्मना सह योद्धुं समागतां केनकार-

णेन दुर्गममिमं प्रदेशं प्राप्तवानासि, कस्य वानुचरस्त्वमिति भूयसा वचसा तर्जयन्तीं तामवलोक्य हनुमानहमिममर्थं यथावत्कथयामि । त्वं पुनः किंनिमित्तं मार्गस्यार्गलीभूतासि इत्यपृच्छत् । ततो रावणाज्ञया लङ्कापुरीरक्षणाय समाबद्धकक्ष्या लङ्कास्मि । मामवज्ञाय भवता न पुरं प्रवेष्टुं शक्यमिति वदन्तीं लङ्कां मारुतिरेवमवादीत्—

द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् ।
इत्यर्थमिह सम्प्राप्तः परं कौतूहलं हि मे ॥

वनान्युपवनानीह लङ्कायाः काननानि च ।
सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ॥

दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ।

अत्र सीतागवेषणरूपकार्यमाच्छाद्य कुतूहलार्थतया लंकां द्रष्टुकाम इति कथनात् शत्रुपक्षे कार्यार्थिना स्वकार्यं गोपनीयमिति सूचितम् ॥

तथा च **सभापर्वणि**— 'के यूयं पुष्पवन्तश्च भुजैर्ज्याकृतलक्षणैः । बिभ्रतः क्षात्रमोजश्च ब्राह्मण्यं प्रतिजानथ ॥ एवं विरागवसना बहिर्माल्यानुलेपनाः । सत्यं वदत के यूयं सत्यं राजसु शोभते ॥' इति जरासन्धेन पृष्टाः कृष्णभीमार्जुनाः, 'स्नातकान्ब्राह्मणान् राजन् विद्धयस्मांस्त्वं नराधिप' इति क्षत्रियत्वच्छादनेन ब्राह्मणत्वमेवोक्तवन्तः ॥

इति तद्वचनश्रवणसञ्जातकोपया लङ्काधिदेवतया सवेगं

मुष्टिना ताडितो हनूमान् तं देशं भृशमभिनादयन्वामहस्ताङ्गुलीः संवर्त्य,

मुष्टिनाभिजघानैनां हनूमान्क्रोधमूर्च्छितः ।
स्त्री चेति मन्यमानेन नातिक्रोधः स्वयं कृतः ॥

अनेन स्त्रीभिः कृतेऽप्यपराधे तासां प्राणान्तिको दण्डो न कर्तव्य इति सूचितम् । तथा च आदिपर्वणि एकचक्रनगरे ब्राह्मणी— 'अवध्याः स्त्रिय इत्याहुर्धर्मज्ञा धर्मनिश्चये' इति ॥

तत्प्रहारेण विह्वलावयवा तथैव भूमौ निपपात । ततः सा चिराय चेतनाभवाप्य सगद्गदपदमिदमवादीत्— पुरा खलु मत्प्रार्थितेन स्वयंभुवा वानरपराक्रमपराजितायां त्वयि लङ्कानिलयानां पिशिताशनानां भयमागतमवगम्यते इत्यभिहिता समयं समनुपालयन्ती भवता विक्रम्य निर्जितास्मि । तदधुना निश्शङ्कं प्रविश्य यथाभिलषितं साधयेति ॥

इति तृतीयः सर्गः ।

अथ चतुर्थः सर्गः ॥

चतुर्थे—

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् ।
विक्रमेण महातेजा हनूमान्कपिसत्तमः ॥
अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे ।

नन्वत्र हनुमता कृतः अद्वारप्रवेशोऽसङ्गतः, अद्वारेण

'पुनः प्रकृतिमापेदे' इति प्रकृतिप्राप्तिः [विस्मृत]कण्ठचामीकरन्यायेन प्राप्तस्यैवाप्राप्तत्वभ्रमनिवृत्तिरूपा प्राप्तिरुक्ता । तथा च पराशरपुराणे—'आत्मलाभात्परं नास्ति किञ्चिन्मात्रमपि द्विज । अतः स्वात्मानमीशानं लभते स्वात्मना स्वयम् ॥ लब्धस्य लाभोऽलब्धस्य लब्धव्यस्य तथैव हि । द्विधा लाभः स्वकं रूपं तत्र लब्धं हि संततम् ॥ लब्धस्यालब्धताज्ञानाल्लाभस्तस्यैव वेदनात्। आत्मलाभस्त्वतः स्वात्मवेदनोत्पत्तिरेव हि ॥' इति ॥

सूतसंहितायां—'सायुज्यरूपा परमा मुक्तिर्जीवपरात्मनोः । पारमार्थिकतादात्म्यस्वरूपाज्ञाननाशतः ॥ मुमुक्षोर्जायते सम्यगिति वेदान्तनिर्णयः । यस्य स्वभावभूतेयं मुक्तिः साक्षात्परा हरेः । अभिव्यक्ता स एवाहमिति मे निश्चिता मतिः ॥' इति ॥

पाराशर्येऽपि— 'स्वस्वरूपस्य लाभेन स्वात्मानन्दो महत्तरः । अपरोक्षतया भाति सा परा मुक्तिरात्मनः ॥' इति ॥

'पुनः' इति विशेषणाच्च कण्ठचामीकरन्यायेन नित्यप्राप्तस्यैवात्मनः अप्राप्तत्वभ्रमनिरासपूर्विका स्फूर्तिः सूचिता । तथा च श्रुतिः— 'एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् । समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥' इति ॥

ततः—

स सागरं दानवपन्नगायुतं
बलेन विक्रम्य महोर्मिमालिनम् ।

निपत्त्य तीरे च महोदधेस्तदा
ददर्श लङ्कामरावतीमिव ॥

इति प्रथमः सर्गः ।

अथ द्वितीयः सर्गः ॥

द्वितीये— तदनु हनूमानर्णवलङ्घनजनितां ग्लानिमविगणय्य लङ्कावलोकने कृतत्वरस्तत्क्षणमेव वनकरिकुलमदजलसेकसंवर्धितैर्विकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभितान्भूमिभागानवलोकयन् लङ्कापुरपरिसरवर्तिनं शैलमारुह्य सरलप्रियाल(क)तमालहिन्तालनागपुन्नागकेतकीकरवीरादिविविधतरुषण्डमण्डितपर्यन्तभूमिभागामनवरतसिच्यमानसलिलतया हरितोपवनान्धकारैः केतकीधूलिधूसरैरुपशल्यकैर्विभूषितां विकचकुवलयदलकान्तैरुत्फुल्लकुमुदधवलोदरैः सहस्रसंख्यैः सरोभिरुद्भासितामुत्पलपङ्कजपरागपिञ्जरितजलेन रसातलगम्भीरेण जलनिधिनेव परिखावलयेन परिवृतां गगनतलोल्लेखिशिखरमालेन काञ्चनमयेन प्राकारमण्डलेन परिगतां कनकमयामलकलशशिखरैरनिलदोलायितध्वजैः शारदाम्बुदपाण्डुरैरमरमन्दिरैरिव निशाचरमन्दिरैर्विराजितशृङ्गाटकां खड्गशूलगदाशक्तितोमरादिनानायुधधरैर्निशाचरैः सर्वतो रक्ष्यमाणामुच्चतरशिखरतयाम्बरमिवालिखन्तीमापिबन्तीमिवाकाशं स्पृशन्तीमिव विधुमण्डलं विश्वकर्मनिर्मितामपरामिवामरावतीं लङ्कामवलोक्य तदुत्तरद्वारमासाद्य मारुतिः,

दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टसपाणिभिः ।
रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥

तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ।
रावणं च रिपुं घोरं चिन्तयामास वानरः ॥

अत्र हनूमता बहुविचारकरणादन्यैरपि कार्यार्थं प्रवृत्तैः स्वपरबलसाधकबाधकादिकमखिलमपि विचारणीयमिति सूचितम ॥

तथा च कामन्दके— 'स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन् । अन्तपालांस्तु कुर्वीत मित्राण्याटविकांस्तथा । जलस्थानानि मार्गांश्च विद्यात्स्वबलसिद्धये ॥ सारवत्तां च राष्ट्रस्य दुष्टतां गुप्तिमेव च । छिद्रं शत्रोर्विजानीयात्कोशमित्रबलानि च ॥' इति ॥

आगत्यापीह हरयो भविष्यन्ति निरर्थकाः ।
न हि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥

इमां तु विषमां दुर्गां लङ्कां रावणपालिताम् ।
प्राप्यापीह महाबाहुः किं करिष्यति राघवः ॥

अत्र त्रिकूटगिरिशिखराग्रनिर्मिततया दुर्गमा लङ्कापुरी युद्धादिभिर्जेतुमशक्या इत्युक्त्या निखिलदुर्गापेक्षया गिरिदुर्गं जेतुमशक्यं इति सूचितम् ॥

तत्र दुर्गाणि षट्— धन्वदुर्गं, महीदुर्गं, अब्दुर्गं, वार्क्षंदुर्गं नृदुर्गं, गिरिदुर्गं, चेति । तत्र यथा धन्वदुर्गमाश्रिता मृगाः, महीदुर्गमाश्रिता मूषिकादयः, अब्दुर्गमाश्रिता झषादयः, वार्क्षंदुर्गमा-

श्रिताः प्लवङ्गमादयः, नृदुर्गमाश्रिता नराः, गिरिदुर्गमाश्रिता देवाश्च तत्तच्छत्रुभिः सिह्ममार्जारश्येनश्वा[नरा]सुरैरजेया भवन्ति । एव-मेतेषु दुर्गेषु यं कंचन दुर्गमाश्रितो नृपतिरजेयो भवति । गिरिदुर्गं तु सर्वदुर्गापेक्षया श्रेष्ठतममित्युक्तम् । तथा च मनुः—

'धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरम् ॥ सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् । एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ त्रीण्याद्यान्याश्रितास्त्वेषां मृगा गर्ताश्रया झषाः । त्रीण्युत्तराणि (च) क्रमशः प्लवङ्गमनरामराः ॥ यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः । तथारयो न हिंसन्ति नृपं दुर्गसमाश्रयम् ॥ एकः शतं योधयति प्राकारस्थो धनुर्धरः । शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते ॥' इति ॥

राजधर्मेऽपि—'षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत् । सर्वसंपत्प्रधानं यद्बाहुल्यं चापि सम्भवेत् ॥ धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च । मनुष्यद्रुमदुर्गं च जलदुर्गं च तानि षट् ॥' इति ॥

कामन्दके तु—

'पृथुसीम महाखातमुच्चप्राकारगोपुरम् । समावसेच्छैल-सरिन्मरुत्स्थलवनाश्रयम् ॥ जलवद्धान्यधनवद्दुर्गं कालसहं महत् । दुर्गहीनो नरपतिर्वाताभ्रावयवैः समः ॥ औदकं पार्वतं वार्क्षं ऐलेयं धान्वनं तथा । प्रशस्तं शस्त्रमतिभिर्दुर्गं दुर्गोपचिन्तकैः ॥ जलान्नायुधयन्त्राढ्यं वीरयोधैरधिष्ठितम् । गुप्तिप्रधानमाचार्या दुर्गं

प्रसादेन च रुद्रस्य भवानीसहितस्य तु ॥ अतः सकलजन्तूनां तदेव परमं पदम् । वेदितव्यं विशेषेण विद्यया हि परा गतिः ॥' इति ॥

तथा लिङ्गपुराणेऽपि— 'न कर्ता न च भोक्ताहं न च कारयिता तथा । धर्माधर्मौ न मे विप्राः सर्वदा परमार्थतः ॥' इति ॥

सूतसंहितायामपि— 'यद्यात्मा मलिनः कर्ता भोक्ता च स्यात्स्वभावतः । नास्ति तस्य विनिर्मोक्षः संसाराज्जन्मकोटिभिः ॥ आत्मायं केवलं स्वच्छः शान्तः सूक्ष्मः सनातनः । अस्ति सर्वान्तरः साक्षी चिन्मात्रसुखविग्रहः ॥ अयं स भगवानीशः स्वयंज्योतिः स्वभावतः । अस्माद्विजायते विश्वमत्रैव प्रविलीयते ॥' इति ॥

तत्रैव समाधिप्रकरणे— 'नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः । एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥ तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः । यथाकाशो घटाकाशो महाकाश इतीरितः । तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ॥' इति ॥

मुक्तिखण्डेऽपि— 'न देहो नेन्द्रियं प्राणो न मनो बुद्ध्यहंकृती । न चित्तं नैव माया च न च व्योमादिकं जगत् ॥ न कर्ता न च भोक्ता च न च भोजयिता तथा । केवलं चित्सदानन्दब्रह्मैवात्मा यथार्थतः ॥' इति ॥

ज्ञानवाचकपदान्तरपरिवर्जनेन आत्मवानित्यात्मपदप्रयोगात् आत्मविषयकज्ञानमेव मुक्तिसाधकं इति सूचितम् ॥

नन्वात्मनः कर्तृत्वेन कर्मशेषत्वात् तज्ज्ञानमपि कर्तृद्वारा कर्माङ्गमेव । न च ज्ञानस्याङ्गत्वे 'तरति शोकमात्मवित्' इत्यादिफलश्रवणानुपपत्तिः । 'यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोति' 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' 'यत्प्रयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानाय' इत्यादिषु कर्माङ्गपर्णतादिफलप्रतिपादकानाम् 'न स पापश्लोकं शृणोति' इत्यादीनामिवार्थवादत्वसंभवात् । न च पर्णताया अव्यभिचरितजुहूद्वारा विनियोगवत् द्वारभूतात्मनो लौकिकवैदिकक्रियाकर्तृत्वने व्यभिचरिततया विनियोगासंभवात्कथं कर्माङ्गत्वमिति वाच्यम् । देहादिव्यतिरिक्तात्मज्ञानस्य लौकिके कर्मण्यनुपयुक्तत्वेन वैदिके कर्मणि देहपातोत्तरभाविफले तेन विना प्रवृत्त्यनुपपत्त्या विनियोगात्, तस्य क्रत्वव्यभिचारित्वात् । तस्मात्पर्णतादिवदात्मज्ञानं कर्माङ्गमिति चेत् ।

उच्यते— न हि देहातिरिक्तात्मा कर्ता भोक्ता शारीरो जीव एव वेदान्तेषु प्रतिपाद्यते । किं तु, 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' इत्यादिभिः अशनायाद्यतीतं सत्यज्ञानानन्दाद्वितीयब्रह्माभिन्नमेवात्मस्वरूपमुपदिश्यते । न चैतादृशात्मज्ञानं कर्मण्युपयुज्यते । प्रत्युत औपनिषदात्मज्ञानं कर्तृत्वोच्छेदकमेव । तथा च क्रियाकारकभावतत्कारणोच्छेदकत्वमामनन्ति माध्यन्दिनाः— 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिना । एवं च कर्मविरोध्यौपनिषदात्मज्ञानस्य फलाकाङ्क्षायां स्वप्रकरणा-

धीतफलवाक्यानां 'तरति शोकमात्मवित्' इत्यादीनां फलसमर्पकत्वे सम्भवति नार्थवादत्वं कल्पयितुमुचितम्। तस्मादौपनिषदात्मज्ञानं स्वतन्त्रफलवत्, न कर्माङ्गम्। अयमर्थः 'पुरुषार्थोऽतः शब्दादिति बादरायणः' इत्यादिभिः 'उपमर्दं च' इत्यन्तैः सूत्रैः भाष्ये भगवत्पादैः प्रतिपादितः॥

'वीतमोहः पुनः प्रकृतिमापेदे' इत्यनेनाज्ञाने निवृत्ते स्वरूपप्राप्तिप्रतिपादनादविद्याकार्यस्य कर्तृत्वादेर्निवृत्तिमन्तरा निर्विशेषस्वरूपप्राप्त्यनुपपत्तेः अर्थादविद्योपादानकार्यस्य कर्तृत्वादेः प्रपञ्चस्य निवृत्तिरुक्ता॥

ननु नाज्ञानमुपादानं कार्यस्य। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥' 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' 'सोऽकामयत बहु स्यां प्रजायेयेति' इत्युपक्रम्य 'इदं सर्वमसृजत यदिदं किं च' इत्यादिभिः श्रुतिभिः ब्रह्मणो व्यावहारिकसर्वप्रपञ्चोपादानत्वप्रतिपादनादिति चेत्— सत्यं ब्रह्मोपादानम्। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इत्यादिश्रुत्या, मायागतजाड्यस्य घटादिष्वनुगमाच्च मायापि जगदुपादानम्। तत्र व्यावहारिकप्रपञ्चस्य समानस्वभावत्वादविद्या परिणाम्युपादानम्। सच्चिद्रूपं ब्रह्म तु विलक्षणत्वाद्विवर्तोपादानम्। न च विवर्ताधिष्ठानस्योपादानत्वं पारिभाषिकमिति वाच्यम्। स्वनिष्ठकार्यजनकत्वस्य स्वाभिन्नकार्यजनकत्वस्य वा उपादानलक्षणस्य तत्रापि सत्वात्। तस्मादज्ञानमेव परिणाम्युपादानम्। ब्रह्म [तु] विवर्तनेव॥

अत एव 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण ब्रह्मणो जगदुपादानत्वे तस्य कात्स्न्येंन जगदाकारेण परिणामे विकारातिरेकेण ब्रह्माभावो वा, एकदेशेन परिणामे निरवयवत्वश्रुतिविरोधो वा प्रसज्येत इति पूर्वपक्षे कृते 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेण [1]विवर्तवादाभिप्रायेण स्वप्नदृशि जीवात्मनि स्वरूपानुपमर्देनेनानेकाकारस्वप्नप्रपञ्चसृष्टिवद्ब्रह्मणि वियदादिप्रपञ्चसृष्टिरुपपद्यत इति सिद्धान्तितं भगवत्पादैः ॥

देहादेरज्ञानविकारत्वं पुराणेषु प्रतिपादितम् । तत्र पराशरपुराणे— 'अज्ञानस्यैव कार्याणि कारकाण्यखिलानि च । अज्ञाननाशतो नाशमायान्त्येव न संशयः ॥' इत्युपक्रम्य अध्यायपरिसमाप्तिपर्यन्तं कार्यमात्रस्याज्ञानविकारत्वं प्रतिपादितम् ॥

तत्रैव प्रायश्चित्ते-- 'अज्ञाने सति कर्तृत्वं तत्रैव तु शुभाशुभम् । तथा सति कृतं कर्म बाधते ज्ञानमात्मनः ॥ मूलभूते स्थितेऽज्ञाने ततो द्वैतं विजायते । शोभनाशोभनभ्रान्तिस्तत्र पुंसः प्रजायते ॥ रागद्वेषौ च जायेते शोभनाशोभनभ्रमात् । प्रवर्तते पुनर्देही धर्माधर्मौ प्रवृत्तितः ॥ धर्माधर्मोपभोगाय शरीरं जायते द्विज ॥' इति ॥

लैङ्गेऽपि--- 'कोशमन्नमयं भान्तमात्मवन्माययैव तम् । स्वदेहमिति चासत्यमिति विद्धि विचक्षण ॥ प्राणापानादिभेदेन विभिन्नो भाति यो यतः । योऽयं प्राणमयः कोशः सोऽयं मायाविजृम्भितः ॥' इति ॥

---

1. मानता

कुद्वारेण वा प्रवेशस्य निषिद्धत्वात् । तथा च मनुः— 'अद्वारेण तु नातीयाद्ग्रामं वा वेश्म वावृतम्' इति ॥

गौतमोऽपि—'कुद्वारप्रवेशनपादपादधावनासन्दीस्थभोजननदीबाहुतरणवृक्षविषमारोहणप्राणव्यायच्छनानि च वर्जयेत् ।' इति ॥

आपस्तम्बोऽपि— 'न कुसृत्या ग्रामं प्रविशेत् यदि प्रविशेन्नमो रुद्राय वास्तोष्पतय इत्येतामृचं जपेदन्यां वा रौद्रीम्' इतीति चेन्न । शत्रुगृहप्रवेशादिव्यतिरिक्तविषयत्वात् । शत्रुगृहे त्वद्वारेणैव प्रवेशः । तथा च स्मृतिः— 'अद्वारेण विशेच्छत्रोः पुरं ग्रामं गृहं तथा' इति ॥

सभापर्वण्यपि जरासन्धं प्रति कृष्णः—

'अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहम् । प्रविशन्ति नरा वीरा नीतिशास्त्रविशारदाः ॥' इति ॥

प्रविश्य नगरीं लङ्कां कपिराजहितङ्करः ।
चक्रेऽथ सव्यं पादं च शत्रूणां स तु मूर्धनि ॥

अनेन शत्रुपुर्यादौ प्रवेशे सव्यचरणविन्यासपूर्वकमेव प्रवेष्टव्यमिति सूचितम् । तथा च स्मृतिः— 'प्रयाणकाले च गृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कुर्यात्पुरः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपाल ॥' इति ॥

ततः स्फुरदुडुबिम्बाडम्बरविडम्बिमुक्तामणिमयमालिकासमलङ्कृतं महापथमास्थाय मङ्गलविधिपटुपटहतूर्यनिनादपुरःसरेण

सरभसमितस्ततः प्रधावितकौणपगणचरणसंक्षोभचलितेन हसित-संभ्रमघोषेण च विनादितां वज्राङ्कुशनिकाशरत्नचयखचितविविधसालभाञ्जिकोपेतैर्गृहसङ्घैरतिशोभमानां सन्तप्तकनकमयाभित्तिखचितमाणिक्यकान्तिभिः प्रज्वलितामिव लक्ष्यमाणां तां सहर्षमवलोक्य सीतावलोकनाय प्रतिभवनमटन्मर्कटवदुर्हिमकरबिम्बावलम्बिसौधोपान्तविहारिणीनां [स्त्रीणां]अतिमधुरगीतिरवं विविधसोपानसमारोहणसमयसञ्जातमणिनूपुरकिङ्किणीरवोन्मिश्रं सामोदमितस्ततः संचरद्रामाजनमेखलाकलापकिङ्किणीघणात्कारमुखरं प्रमदाजनसम्भाषणं चाकर्णयन्कुत्रचिद्विचित्रमन्त्रजपपरान्स्वाध्यायनिरतान्यातुधानानप्यवलोकयन्

राजमार्गं समावृत्त्य स्थितं रक्षोबलं महत् ।
ददर्श मध्यमे गुल्मे रावणस्य चरान्बहून् ॥

अन्यत्रापि रावणेन भवनसंरक्षणाय व्यवस्थापितांश्चारान्दीक्षितमुण्डिजटिलप्रायान्परशुमुद्गरकूटपाशपरिघाद्यायुधधरानेकानेककर्णनेत्रपादतयातिविरूपान्सुरूपानपि मध्यमे गुल्मे समवस्थितानेकसहस्रसंख्यानवलोकयन्

सहेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम् ।
परार्ध्यकालागरुचन्दनाक्तं स रावणान्तःपुरमाविवेश ॥

अनेन पुरगृहरक्षणाय राज्ञा गुल्माः स्थापनीया इति सूचितम् । तथा च राजधर्मे— 'न्यसेत गुल्मान् दुर्गेषु सन्धौ च कुरुनन्दन । नगरोपवने चैव पुरोद्याने तथैव च ॥ संस्थानेषु

च सर्वेषु पुरेषु नगरस्य च । मध्ये च नरशार्दूल तथा राजनिवे-
शने ॥' इति ॥

इति चतुर्थः सर्गः ।

अथ पञ्चमः सर्गः ॥

पञ्चमे—

ततः स मध्यं गतमंशुमन्तं
ज्योत्स्नावितानं महदुद्वमन्तम् ।
ददर्श धीमान् दिवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥

लोकस्य पापानि विनाशयन्तं
महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं
ददर्श शीतांशुमथाभियान्तम् ॥

या भाति लक्ष्मीर्भुवि मन्दरस्था
तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था
रराज सा चारुनिशाकरस्था ॥

हंसो यथा राजतपञ्जरस्थः
सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितकुञ्जरस्थ-
श्चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥

स्थितः ककुद्मानिव तीक्ष्णशृङ्गो
महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो
रराज चन्द्रः परिपूर्णशृङ्गः ॥

विनष्टशीताम्बुतुषारपङ्को
महाग्रहग्राहविनष्टपङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को
रराज चन्द्रो भगवान् शशाङ्कः ॥

शिलातलं प्राप्य यथा मृगेन्द्रो
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्र-
स्तथा प्रकाशो विरराज चन्द्रः ॥

प्रकाशचन्द्रोदयनष्टदोषः
प्रवृद्धरक्षःपिशिताशदोषः ।
रामाभिरामेरितचित्तदोषः
स्वर्गप्रकाशो भगवान्प्रदोषः ॥

तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः
स्वपन्ति नार्यः पतिभिः सुवृत्ताः ।
नक्तंचराश्चापि तथा प्रवृत्ता
विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥

मत्तप्रमत्तानि समाकुलानि
रथाश्वभद्रासनसङ्कुलानि ।

भृतकदासेभ्य उच्छिष्टं शेषयेत्ततः ॥' इति । अनुमतमपीदमुच्छिष्ट-दानमाहिताग्निना पर्वणि न कर्तव्यमित्याह बोधायनः— 'नैतदह्नः शूद्रायोच्छिष्टं दद्यात् । स्त्रिया एवैतदहरुच्छिष्टं दद्यात्' इति ॥

उक्तवर्णानां वृत्तिर्द्विविधा–स्वकीया परकीया चेति । स्वकीयापि द्विविधा–सगुणा विगुणा चेति । तत्र ब्राह्मणानां सगुणा वृत्तिर्याज्ययाजनाध्याप्याध्यापनप्रतिग्राह्यप्रतिग्रहरूपा । तस्याः सगुणत्वं च प्रशस्तत्वात् । प्रशंसा च स्मृतिरत्ने— 'याजनाध्यापने शुद्धे तथा पूतः प्रतिग्रहः । एषा सम्यक् समाख्याता त्रितयं तस्य जीविका ॥' इति । तत्र याज्यानाह द्राह्यायणः— 'आर्षेयोऽनूचानः साधुचरणः' इति ऋत्विकुलक्षणमभिधाय 'याज्यश्च प्रथमैस्त्रिभिर्गुणैर्व्याख्यातः' इति । प्रतिग्राह्यं तु गौतमेनोक्तम्— 'प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत प्रतिगृह्णीयाच्च' इति । व्यासोऽपि–'द्विजातिभ्यो धनं लिप्सेत्प्रशस्तेभ्यो द्विजोत्तमः' इति । अध्याप्याश्च छन्दोगब्राह्मणे विद्यावाक्ये— 'ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियो विद्यया वा विद्यां यः प्राह तानि तीर्थानि षण्मम' इति ॥

विगुणा वृत्तिरयाज्ययाजनानध्याप्याध्यापनाप्रतिग्राह्य-प्रतिग्रहरूपा । तत्र अयाज्ययाजनादीनां विगुणत्वं च प्रतिषेधात् । प्रतिषेधश्च बोधायनसूत्रे – 'ना[न]नूचानं प्रयाजयेत्' इत्यादि । सुमन्तुरपि — 'अभिशस्तपतितपौनर्भवभ्रूणहापुंश्चल्यशुचिशस्त्रकार-तैलिकचाक्रिकध्वजिसुवर्णकारलेख्यकभण्डकबाध[वधे]किश्वगणिक-सौनिकव्याधनिषादरजकबुरुडचर्मकरा अभोज्यान्ना अप्रतिग्राह्या

अयाज्याश्च ' इति । इदं चाप्रतिग्राह्यत्वमेधोदकादिव्यतिरिक्तविषयम् । एधोदकादिकं तु सर्वतः प्रतिग्राह्यम् । तदाह गौतमः— ' एधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनावसथयानपयोदधिधानाशफरीप्रियङ्गुस्रङ्मार्गशाकान्यप्रणोद्यानि सर्वेषाम् ' इति । अनध्याप्याश्च छन्दोगब्राह्मणे— ' अनर्हते मानिने नैव मादाः ' इति ॥

सद्गुणालाभे विगुणादपि वृत्तिरादातव्या । ' पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते ॥ नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् । दोषो भवति विप्राणां ज्वलनार्कसमा हि ते ॥ जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । आकाशमिव पङ्केन न स दोषेण लिप्यते ॥ अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः । न चालिप्यत दोषेण क्षुत्प्रतीकारमाचरन् ॥ श्वमांसमिच्छन्नार्तोऽत्तुं धर्माधर्मविचक्षणः । प्राणानां रक्षणार्थाय वामदेवो न लिप्तवान् ॥ भारद्वाजः क्षुधार्तस्तु सपुत्रो निर्जने वने । बह्वीर्गाः प्रतिजग्राह ब्रह्मतीक्ष्णो महातपाः ॥ क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् । चण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥ ' इति । गौतमोऽपि— ' पितृदेवगुरुभृत्यभरणे चान्यत् ' इति । अत्र मिताक्षरा— ' पितृभरणं अविच्छेदेन प्रकरणम् । देवभरणमग्निहोत्रादि । गुरवः पित्रादयः । भृत्याः पुत्रादयः । तेषां भरणं भक्तादिना रक्षणम् । एतेषु निमित्तेषु अन्यदपि अन्नादिकं सर्वतः प्रतिग्राह्यम् ' इति ॥

मनुस्तु— ' गुरून् भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् । सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥ ' इति ।

शूद्रप्रतिग्रहमन्तरेण जीवनं न लभ्यते चेत्, शूद्रादपि प्रतिग्राह्यम्। तदप्याह गौतमः—'वृत्तिश्चेन्नान्तरेण शूद्रात्' इति। भगवान्बादरायणोऽपि— 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्' इति ॥

स्ववृत्तिभूतानामपि याजनादीनां पूर्वं पूर्वं निन्दितम्। तदाह गौतमः— 'याजनाध्यापनप्रतिग्रहाः सर्वेषाम्। पूर्वः पूर्वो गुरुः' इति। मनुस्तु— 'प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि। प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥' इति। उक्तस्ववृत्त्यलाभे एव परवृत्त्यादरः। तथा च गौतमः— 'तदलाभे क्षत्रवृत्तिः, तदलाभे वैश्यवृत्तिः' इति। मनुरपि— 'अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा। जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥ उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्। कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥' इति ॥

वैश्यवृत्त्या जीवन्ब्राह्मण उद्धृतोद्धारं विक्रीणीयात्। तदाह मनुः—'विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्धनम् ॥ सर्वान् रसानपोहेत कृतान्नं च तिलैस्सह। अश्मनो लवणं चैव पशवो ये च मानुषाः ॥ सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च। अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥ अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः। क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥ आरण्यांश्च पशून्सर्वान् दंष्ट्रिणश्च वयांसि च। मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफान्पशून् ॥ (त्रपुसीसे तथा लोहं तैजसानि च सर्वशः। पाशां[वालां]श्चर्म तथास्थीनि वा स्नायूनि रोचनाम् ॥)' इति। आपस्तम्बोऽपि— 'अविहिता ब्राह्मणस्य वणिज्या। आपदि व्यवहरेत पण्यानामपण्यानि व्युदस्यन्।

मनुष्यान् रसान् रागान् गन्धान् अन्नं चर्म गवां वशां श्लेष्मोदके तो[क्म]क्नकिण्वे पिप्पलीमरीचे धान्यं मांसमायुधं सुकृताशां च तिलतण्डुलांस्त्वेव धान्यस्य विशेषेण न विक्रीणीयात्' इति। **गौतमोऽपि**-- 'तस्यापण्यं गन्धरसकृतान्नतिलशाणक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरं च सविकारम् मूलफलपुष्पौषधमधुमांसतृणोदकापथ्यानि पशवश्च हिंसासंयोगे। पुरुषवशाकुमारीवेहतश्च नित्यम्। भूमिव्रीहियवाजाव्यश्वधेन्वनडुहश्चैके।' इति॥

अपण्यानामेतेषां च विनिमयेन व्यवहारः। तथा च **गौतमः**-- 'विनिमयस्तु रसानां रसैः पशूनां च[न]लवणकृताश्नयोस्तिलानां च समेना(स)मेन तु पक्वस्य' इति। विनिमयेऽपि द्रव्यनियममाहापस्तम्बः- 'अन्नेन चान्नस्य मनुष्याणां च मनुष्यैः रसानां च रसैः गन्धानां च गन्धैः विद्यया च विद्यानाम्। अक्रीतपण्यैर्व्यवहरेत मुञ्जबल्बजैर्मूलफलैस्तृणकाष्ठैरविकृतैः' इति। अविक्रेयद्रव्यविशेषाणां विक्रयकालविशेषेण पातित्यमाह **मनुः**— 'सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी॥' इति। इतरेषामविक्रेयाणां विक्रये सप्तरात्रेण वैश्यो भवति। तथा च मनुः— 'इतरेषां तु पण्यानां विक्रयादिह कामतः। ब्राह्मणः सप्तरात्रेण वैश्यो भवति जातितः'॥ इति॥ कृष्युत्पन्नानां तिलानां विक्रेयत्वमनुजानाति **मनुः**-- 'काममुत्पाद्य कृष्या तु स्वयमेव कृषीवलः। विक्रीणीत तिलान् शुद्धान् धर्मार्थमचिरस्थितान्॥ भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः। कृमीभूतः श्वविष्ठायां पितृभिः सह

नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा ॥
महारत्नसमाकीर्णं ददर्श स महाकपिः ।

अत्र रावणगृहे पर्वणि होमः प्रतिपादितः । स च [न] दर्शपूर्णमासयागात्मकः, तस्य होमत्वाभावात् । नापि नैमित्तिकं होमान्तरं सम्भवति, तादृशस्य प्रतिपर्वनियततया विहितस्यादर्शनात् । अतोऽयमग्निहोत्रहोम एव भवति । न च तत्र रावणस्याधिकारः संभवति, सकलवर्णबहिर्भूतस्य अनुलोमबहिर्भूतस्य च होमाधिकारासंभवात् । तथा हि—

तत्र ब्राह्मणादिवर्णास्तावन्मनुना दर्शिताः— 'सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु । आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ॥' इति । देवलोऽपि— 'ब्राह्मण्यां ब्राह्मणाज्जातः संस्कृतो ब्राह्मणो भवेत् । एवं क्षत्रियविट्शूद्रा ज्ञेयाः स्वेभ्यः स्वयोनिजाः ॥' इति । मनुरपि— 'स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् । सदृशानेव तानाहुर्मातृदोषैर्विगर्हितान् ॥' इति । अस्य चायमर्थः— क्षत्रियायां ब्राह्मणादुत्पन्नो ब्राह्मणसदृशः । न तु मुख्यब्राह्मणः, हीनजातिमातृसम्बन्धादिति ॥

ते चानुलोमा मूर्धावसिक्तादिभेदेन षड्विधाः । तथा च याज्ञवल्क्यः—'विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् । अम्बष्ठः शूद्र्यां निषादः जातः पारशवोऽपि वा ॥ वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ । वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥' इति । विन्नासु ऊढासु । गौतमोऽपि— 'अनुलोमा अनन्तरैकान्तरद्व्यन्तरासु जाताः सव-

र्णाम्बष्ठोग्रनिषाददौष्यन्तपारशवाः’ इति। अत्र मिताक्षरा—‘ब्राह्मणस्यानन्तरा क्षत्रिया। तस्यां ब्राह्मणाज्जातः सवर्णः मूर्धावसिक्तापरनामा। क्षत्रियस्यानन्तरा वैश्या। तस्यां तस्मादुत्पन्नोऽम्बष्ठः। वैश्यस्यानन्तरा शूद्रा। तस्यां तस्मादुत्पन्नः उग्रः। ब्राह्मणस्यैकान्तरा वैश्या। तस्यां तस्मादुत्पन्नो निषादः। क्षत्रियस्यैकान्तरा शूद्रा। तस्यां तस्मादुत्पन्नो दौष्यन्तः। ब्राह्मणस्य द्व्यन्तरा शूद्रा। तस्यां तस्मादुत्पन्नः पारशवः। अयमेव याज्ञवल्क्येन निषाद इत्यभिहितः ॥

प्रतिलोमानाह मनुः— ‘क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः। वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥ शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः॥’ इति। गौतमोऽपि— ‘प्रतिलोमाः सूतमागधायोगवक्षत्तृवैदेहकचण्डालाः’ इति। अत्र मिताक्षरा— ‘अनन्तरैकान्तरद्व्यन्तरासु जाता इत्यनुवर्तते। क्षत्रियस्यानन्तरा ब्राह्मणी। तस्यां तस्माज्जातः सूतः। वैश्यस्यानन्तरा क्षत्रिया। तस्यां तस्मादुत्पन्नो मागधः। शूद्रस्यानन्तरा वैश्या। तस्यां तस्माज्जातः आयोगवः। वैश्यस्य एकान्तरा ब्राह्मणी। तस्यां तस्माज्जातः क्षत्ता। शूद्रस्यैकान्तरा क्षत्रिया। तस्यां तस्माज्जातः वैदेहकः। शूद्रस्य द्व्यन्तरा ब्राह्मणी। तस्यां तस्माज्जातश्चण्डालः’ इति। उक्तानां वर्णानां तारतम्यमाह देवलः— ‘तेषां सवर्णजाः श्रेष्ठास्तेभ्योऽन्वगनुलोमजाः। अन्तराला बहिर्वर्णाः पतिताः प्रतिलोमजाः ॥’ इति ॥

अयमर्थः— विजातीयान्मिथुनादुत्पन्ना अन्तरालाः। ते च द्विविधाः— अनुलोमजाः, प्रतिलोमजाश्च। तत्र अनुलो-

मजाः सवर्णजेभ्यो हीना अपि वर्णाश्रमधर्मा(न)धिकारिणः मातृजातिधर्म[ा]र्यात् । प्रतिलोमजास्तु वर्णाश्रमधर्माधिकारात्पतिता अधमा इति । गौतमोऽपि—'प्रतिलोमास्तु धर्महीनाः' इति ॥

ननु मूर्धावसिक्तादीनां वर्णबाहिर्भूतत्वेन जात्यन्तरत्वमुक्तम्; तदसङ्गतम्, अनुलोमजातानां मातृजातीयत्वात् । तदाह विष्णुः— 'समानवर्णासु पुत्राः समानवर्णाः भवन्ति । अनुलोमास्तु मातृवर्णाः । प्रतिलोमास्त्वार्यविगर्हिताः' इति । शङ्खोऽपि— 'क्षत्रियायां ब्राह्मणादुत्पन्नः क्षत्रिय एव भवति । क्षत्रियेण वैश्यायामुत्पन्नो वैश्य एव । वैश्येन शूद्रायां शूद्र एव भवति' इति— नै(व)[ष]दोषः । अनयोर्वचनयोर्मातृजात्युचितधर्मप्राप्त्यर्थत्वात् । अन्यथा बीजोत्कर्षवैयर्थ्यापत्तेः । यथा क्षेत्रापकर्ष उत्कृष्टजातिनिवारकः, एवं बीजोत्कर्षोऽपि निकृष्टजातिं कुतो न निवारयेत् । तथा च अन्तराला बहिर्वर्णा इति जात्यन्तरम् ॥

एतेषां वृत्तिं धर्मांश्चाह मनुः— 'ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः । ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम् ॥' इति । ब्राह्मणाः ब्रह्म बूभूषवः । ब्रह्मयोनिस्थाः ब्राह्मणात् ब्राह्मण्यामुत्पन्नाः । 'अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥ षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥' इति । क्षत्रियविशोरप्याह— शस्त्रास्त्रभृ-

एवं क्षत्रस्य वणिक्पशुकृषिर्विशः । आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ॥' वणिक् वाणिज्यम् । पशुः पशुपाल्यम ॥

त्रयाणां वर्णानां विशिष्टकर्माण्याह स एव— 'वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य तु रक्षणम् । वार्ताकर्म च वैश्यस्य विशिष्टानि स्वकर्मसु ॥' इति । शूद्रस्यापि विशिष्टां वृत्तिमाह स एव— 'स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः । जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥' इति । जातब्राह्मणशब्दः अस्य ब्राह्मणस्य अयं शुश्रूषक इति शब्दः ॥

एवं शुश्रूषकशूद्रस्त्रिविधः— आगन्तुकः क्रीतो गर्भदासश्चेति । एतेषां त्रयाणां ग्रहस्थितिविशेषेण उत्पत्तिमाह बृहज्जातके— 'एभ्योऽल्पमध्यबहुभिः क्रमशः प्रसूता ज्ञेयाः स्युरभ्युपगमक्रयगर्भदासाः' इति । तत्र अभ्युपगमभृत्यस्य भृतिदानेनैव भरणम्, न तूच्छिष्टदानम्, 'न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्' इति मनुनैव स्थलान्तरे प्रतिषिद्धत्वात् । क्रीतगर्भदासयोस्तु उच्छिष्टान्नजीर्णवसनादिकमपि देयमित्यभिप्रायेण स्थलान्तरे मनुरेवाह— 'प्रकल्प्या तस्य वै वृत्तिः स्वकुटुम्बाद्यथार्हतः । शक्तिं चावेक्ष्य भक्तिं च भृत्यानां च परिग्रहम् ॥ उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च । पुलकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥' इति । भृत्यानां परिग्रहस्तदीयः संसारः । पुलकाः असारधान्यानि । अत एव 'भोजनं तु न निश्शेषं कुर्यात्प्राज्ञः कथंचन । अन्यत्र दधिसक्त्वाज्यलाजक्षीराच्च मध्वपः ॥' इति पुलस्त्योक्तरीत्यावशेषितान्नस्य भृत्यादिभ्यः प्रदानं प्रतिपत्तिरित्याह वृद्धमनुः— 'पीत्वापोशनमश्नीयात्पात्रदत्तमगर्हितम् । भार्या-

वीरश्रिया चापि समाकुलानि
दुदर्श धीमान्स कपिः कुलानि ॥
परस्परं चाधिकमाक्षिपन्ति
भुजांश्च पीनानधिनिक्षिपन्ति ।
मत्तप्रलापानधिविक्षिपन्ति
मत्तानि चान्योन्यमधिक्षिपन्ति ॥
रक्षांसि वक्षांसि च विक्षिपन्ति
गात्राणि कान्तासु च विक्षिपन्ति ।
रूपाणि चित्राणि च विक्षिपन्ति
दृढानि चापानि च विक्षिपन्ति ॥
ददर्श कान्ताश्च समालपन्त्य-
स्तथापरास्तत्र पुनः स्वपन्त्यः ।
सुरूपवक्त्राश्च तथा हसन्त्यः
क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥
महागजैश्चापि तथा नदद्भिः
सुपूजितैश्चापि तथा सुसद्भिः ।
रराज वीरैश्च विनिःश्वसद्भिः
ह्रदो भुजङ्गैरिव निःश्वसद्भिः ॥
बुद्धिप्रधानान् रुचिराभिधानान्
संश्रद्दधानान् जगतः प्रधानान् ।
नानाविधानान् रुचिराभिधानान्
ददर्श तस्यां पुरि यातुधानान् ॥

ननन्द दृष्ट्वा च स तान्सुरूपा-
न्नानागुणानात्मगुणानुरूपान् ।
विद्योतमानान्स तदानुरूपान्
ददर्श कांश्चिच्च पुनर्विरूपान् ॥

ततो वरार्हाः सुविशुद्धभावा-
स्तेषां स्त्रियस्तत्र महानुभावाः ।
प्रियेषु पानेषु च सक्तभावा
ददर्श तारा इव सुप्रभावाः ॥

श्रिया ज्वलन्तीस्त्रपयोपगूढा
निशीथकाले रमणोपगूढाः ।
ददर्श काश्चित्प्रमदोपगूढा
यथा विहङ्गाः कुसुमोपगूढाः ॥

अन्याः पुनर्हर्म्यतलोपविष्टा-
स्तत्र प्रियाङ्केषु सुखोपविष्टाः ।
भर्तुः प्रिया धर्मपरा निविष्टा
ददर्श धीमान्मदनाभिविष्टाः ॥

अप्रावृताः काञ्चनराजिवर्णाः
काश्चित्परार्घ्यास्तपनीयवर्णाः ।
पुनश्च काश्चिच्छशलक्ष्मवर्णाः
कान्तप्रहीणा रुचिराङ्गवर्णाः ॥

ततः प्रियान्प्राप्य मनोऽभिरामा-
न्सुप्रीतियुक्ताः प्रसमीक्ष्य रामाः ।

गृहेषु हृष्टाः परमाभिरामा
हरिप्रवीरः स ददर्श रामाः ॥

चन्द्रप्रकाशाश्च हि वक्त्रमाला
वक्राक्षिपक्ष्माश्च सुनेत्रमालाः ।
विभूषणानां च ददर्श मालाः
शतह्रदानामिव चारुमालाः ॥

न त्वेव सीतां परमाभिजातां
पथि स्थितां राजकुले प्रजाताम् ।
लतां प्रफुल्लामिव साधुजातां
ददर्श तन्वीं मनसाभिजाताम् ॥

सनातने वर्त्मनि सन्निविष्टां
रामेक्षणां तां र नाभिविष्टाम् ।
भर्तुर्मनः श्रीमदनुप्रविष्टां
स्त्रीभ्यो वराभ्यश्च सदा विशिष्टाम् ॥

उष्णार्दितां सानुसृतास्रकण्ठीं
पुरा वरार्होत्तमनिष्ककण्ठीम् ।
सुजातपक्ष्मामभिरक्तकण्ठीं
वने प्रनृत्तामिव नीलकण्ठीम् ॥

अव्यक्तरेखामिव चन्द्ररेखां
पांसुप्रदिग्धामिव हेमरेखाम् ।
क्षतप्ररूढामिव बाणरेखां
वायुप्रभिन्नामिव मेघरेखाम् ॥

सीतामपश्यन्मनुजेश्वरस्य
　रामस्य पत्नीं वदतां वरस्य ।
बभूव दुःखाभिहतश्चिरस्य
　प्लवङ्गमो मन्द इवाचिरस्य ॥

इति पञ्चमः सर्गः ।

अथ षष्ठः सर्गः ॥

षष्ठे—अथ प्रतप्तचामीकरभास्वरेण रजनीचरसंरक्षितेन प्राकारमण्डलेन विकचकमलकुमुदकुवलयामोदवासितविमलसलिलाशयपरिखावलयेन विचित्रतोरणभूषिताभिः कक्ष्याभिरुभयपार्श्वावस्थिताधोरणाधिष्ठितदुर्मदवरवारणैरनेकशूरसमारूढतुरगशताक्रान्तप्रदेशैर्विद्रुतचामीकरकलितमणिगणभूषितविचित्ररथसहस्रैः सर्वतः समावृतम्, सेवासमायातविनीतान्तपालवलयितम्, त्रिभुवनस्त्रैणमेकीकृत्यावलोकितुं जनितमतिना ब्रह्मणा संमि[मे]लितेनेव दिव्याङ्गनासमूहेन परिपूर्णम्, वीणावेणुमृदङ्गपणवादिविविधवाद्यसङ्घर्षसमुद्भूतेन तारतरकाहलीकलकलकलितेन ससम्भ्रममितस्ततः प्रधावितनकञ्चरगणसंचारणसंमर्दितसमुदितेन मदमुदितप्रमदाशतसङ्गीतानुविधायिमेखलाकलापमञ्जुलशिञ्जितेन सर्वतः सन्नादिततयापरमिव समुद्रम्,

भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितम् ।

मज्जति ॥' इति । धर्मार्थं यज्ञार्थम् । शुद्धान् अन्यद्रव्यामिश्रितान् । अचिरस्थितान् लाभाद्यर्थमचिरस्थापितान् ॥

अत्यन्तापदि च सर्वप्रकारेण आजीवनमाह गौतमः— '(सम्प्रत्यर्थे) सर्वथा तु वृत्तिरशक्तौ अशौद्रेण । तदप्येके प्राणसंशये तद्वर्णसंकराभक्ष्यनियमस्तु' इति । क्षत्रियस्त्वापद्गतः सर्वविक्रयेणापि वैश्यवृत्तिमवलम्ब्य जीवेत्, न तु ब्राह्मणवृत्तिम् । 'जीवेदेतेन राजन्यः सर्वेणाप्यत्ययं गतः । न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥' इति । सर्वेण निषिद्धविक्रयेणापि । वैश्योऽपि आपदि शूद्रवृत्त्या जीवेत् । तथा च मनुः— 'वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत् । अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ॥' इति । ब्राह्मणशुश्रूषणेन वृत्त्यलाभे मनुः— 'शूद्रस्तु वृत्तिमाकाङ्क्षन्क्षत्रमाराधयेदपि । धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥' इति । त्रैवर्णिकशुश्रूषणालाभे मनुः— 'अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् । पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ॥' इति । कारुककर्माण्यपि द्विजात्यपेक्षितान्येव कर्तव्यानि । तदपि मनुराह— 'यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः । तानि कारुककर्माणि शिल्पानि विविधानि च ॥' इति । 'शूद्रस्य द्विजशुश्रूषा तथाजीवन्वणिग्भवेत् । शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥' इति च । शूद्रः शक्तोऽपि बहुद्रव्यं नार्जयेत् । तथा च मनुः— 'शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः । शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥' इति । अनसूयया स्ववृत्तिस्थस्य उत्तमलोकप्राप्तिमाह मनुः— 'यथा यथा हि सद्वृत्तिमातिष्ठत्यनसूयकः । तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ॥' इति ॥

अनुलोमानां च वृत्तिः। तत्र मूर्धावसिक्तस्य क्षत्रवृत्तिरेव। तथा च क्षाधवीये— समानवर्णासु पुत्राः समानवर्णा भवन्ति। 'अनुलोमास्तु मातृसवर्णतः' इत्यत्र मातृसवर्णग्रहणं मातृधर्मप्राप्त्यर्थमिति व्याख्यातत्वेन मूर्धावसिक्तस्य क्षत्रियायामुत्पन्नस्य क्षत्रधर्मप्राप्तेः। अन्यत्रापि— 'वैश्यतः शूद्रकन्यायामुग्रको नाम जायते। मेषादिविक्रयस्तस्य वृत्तिः कम्बलविक्रयः॥ अन्तःपुराणि वा रक्षेन्नृपाणामाज्ञया सदा॥ चौर्येण कटकारः स्यात्कटविक्रयकर्मकृत्। क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्॥ क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते। ब्राह्मणाद्वैश्यकन्यायां निषादो नाम जायते॥ मन्त्रौषधक्रियां कुर्यान्नित्यं शाल्यन्नकर्म च। चौर्येण कटकारः स्यादूर्ध्वं नापित एव सः॥ नाभ्यूर्ध्ववपनं वृत्तिः कुम्भानां करणं मृदा। ब्राह्मणाच्छूद्रकन्यायां जातः पारशवस्तथा। भद्रकाल्यर्चनं तस्य नृत्तं वाद्यं च वृत्तये॥ अस्यां वै चोरसङ्गत्या निषादो जायते सुतः॥ जीवेदम्भेन गानेन मृगाणां हिंसयापि वा॥ वनौकसां सङ्ग्रहणं मत्स्यानां ग्रहणं तथा। [क्षत्रियाच्छूद्रकन्यायां जातो दौष्यन्त उच्यते।] खड्गादिशस्त्रकरणं दौष्यन्तस्य तदुच्यते। अग्रामनेन चौर्येण शूलिको नाम जायते॥ नित्यं शूलधरश्चैव राज्ञां दण्ड्यांस्तु दण्डयेत्। माहिष्यात्करणायां तु रथकारस्तु जायते। अथ पर्यायनामानि तक्षा शिल्पी च वर्धकी॥ लोहकारः कर्मकारः विद्यते यजनं तथा। उपवीतं विधानेन कुर्यादाधानमप्यसौ। वास्तुशास्त्रमधीयनः प्रासादप्रतिमादिकाम्॥ यज्ञपात्रं द्विजातीनां हैमान्याभरणानि च। कृष्युपस्करणं लेख्यं कर्माण्यस्योदितानि च॥'

इति । शङ्खोऽपि— 'रथकारस्त[स्ये]ज्याधानोपनयनसंस्काराः क्रियाश्च प्रतिमारथसूत्रवास्तुविद्याध्ययनवृत्तिता च' इति ॥

प्रतिलोमानां च वृत्तिमाह मनुः— 'क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः । प्रतिलोमेषु च श्रेष्ठो विष्णोरभ्यर्चनं तथा ॥ धर्मावबोधनं तस्य सारथ्यं कूटविक्रयः । नित्यं द्विजवदाचार इति सूतस्य वृत्तयः ॥ नृपायां वैश्यतो जातः कथितो मागधश्च सः । नृपप्रशंसनं कुर्यात्तन्त्रीवीणाश्च वादयेत् ॥ अस्यामनेन चौर्येण पुलिन्दो नाम जायते । हिंसया दुष्टसत्वानामरण्ये वर्तयेदयम् ॥ तैलपिण्याकलवणविक्रयेणापि वर्तयेत् । अभोज्यान्नस्त्वयं शूद्रैरस्पृश्योऽपि भवत्युत ॥ ग्रामादिष्वपराद्धेषु प्राणिशन्दण्डमर्हति । उग्रात्तु क्षत्रकन्यायां श्वपाक इति कीर्त्यते ॥ चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः । चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ॥ वसेयुरेते विज्ञाता वार्तया च स्वकर्मभिः । वासांसि मृतचेलानि भिन्नभाण्डे च भोजनम् ॥ कार्ष्णायसस्त्वलङ्कारः परिव्रज्या च नित्यशः । न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन् ॥

उक्तानां सर्वेषामापद्यपि उत्कृष्टवृत्तिर्नाश्रयणीया । तथा च मनुः— 'न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् । यो मोहादधमो जात्या जीवेदुत्कृष्टकर्मभिः ॥ तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ।' इति ॥

उत्कृवृत्तिषु परवृत्तिः सगुणापि परित्याज्या । विगुणापि स्ववृत्तिरेव चादर्तव्या । तथा च 'वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः । परधर्मेण जीवन्हि सद्यः पतति जातितः ॥

इति गीतायामपि— 'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' इति ॥

इत्थं परवृत्त्या जीवन्नपि स्ववृत्तिलाभानन्तरं परवृत्तिं परित्यज्य प्रायश्चित्तेन संशोध्यात्मानं स्ववृत्त्यैव जीवेत्। तथा च याज्ञवल्क्यः— 'क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः। निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ॥' इति। आपन्निस्तरणानन्तरमात्मानं संशोध्य स्वमार्गे स्थापयेदित्यर्थः। एवमापद्वृत्त्या जीवतां स्ववृत्तिलाभे सति तत्परित्यजेत्। तथा चापस्तम्बः—'नात्यन्तमन्ववस्येद्वृत्तिं प्राप्य विरमेत्' इति ॥

उक्तानामनुलोमानां मूर्धावसिक्तादीनां पुनर्ब्राह्मण्यादिप्राप्तिः सप्तमे षष्ठे पञ्चमे वा। तदाह याज्ञवल्क्यः— 'जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥' इति। मूर्धावसिक्तादीनां ब्राह्मणत्वादिजातिप्राप्तिरुत्कर्षः। अपकर्षः शूद्रत्वादिजातिप्राप्तिः। युगे जन्मनि सप्तमे पञ्चमेऽपि वा। अपिशब्दात्तु षष्ठे। व्यवस्थितश्चायं विकल्पः। व्यवस्था च ब्राह्मणेन शूद्रायामुत्पादिता निषादी। सा ब्राह्मणेन ऊढा दुहितरं कांचिज्जनयति। सा ब्राह्मणेन, साप्यन्येन ब्राह्मणेन इति प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति। ब्राह्मणेन वैश्यायामुत्पादिताम्बष्ठा। सा ह्यनेन प्रकारेण पञ्चमी षष्ठं ब्राह्मणं जनयति। ब्राह्मणेन क्षत्रियायामुत्पादिता मूर्धावसिक्ता। साप्यनेन प्रकारेण चतुर्थी पञ्चमं ब्राह्मणं जनयति। उग्रा तु क्षत्रियोढा माहिष्या च यथाक्रमं षष्ठं पञ्चमं च क्षत्रियं जनयति। तथा करणी वैश्योढा पञ्चमं वैश्यं जनयति।

प्रसाधनं भर्तुर्दन्तधावनमञ्जनम्। हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं गृहे भवेत्॥ न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति। ब्राह्मणी त्वेव कुर्याच्च ब्राह्मणस्य युधिष्ठिर॥ अन्नं पानं च माल्यं च वासांस्याभरणानि च। ब्राह्मण्यैतानि देयानि भर्तुः सा तु गरीयसी॥ अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर। स वै ब्राह्मणचण्डालः पूर्वदृष्टस्तथैव सः'॥ इति॥

इत्थं धर्मान्वयरहितायां रत्यर्थोढायां तस्यामुत्पन्नो मूर्धावसिक्त एव। एतदभिप्रायमेव याज्ञवल्क्यवचनमपि— 'विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्' इति। ब्राह्मणेन रत्यर्थमूढायां क्षत्रियायामुत्पन्नस्य क्षत्रियधर्म एव उक्त आनुशासनिके— 'यथा न सदृशी जातु ब्राह्मण्याः क्षत्रिया भवेत्। क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत्। श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर। विहितं दृश्यते राजन् रक्षा नान्यत्र क्षत्रियात्॥ ब्राह्मणा हि महाभागा देवानामपि देवताः। तेषु राजन्प्रवर्तेत पूजायां विधिपूर्वकम्। प्रणीतमृषिभिर्ज्ञात्वा धर्मं शाश्वतमव्ययम्। लुप्यमानं स्वधर्मेण क्षत्रियो हि एव रक्षति॥ दस्युभिर्ह्रियमाणं च धनं दारांश्च सर्वशः। सर्वेषामेव वर्णानां त्राता भवति पार्थिवः॥ भूयान् स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः। भूयस्तेनाभिहर्तव्यं पितृवित्ताद्युधिष्ठिरः॥' इति। अत एव माधवीयेऽपि— 'समानवर्णासु पुत्राः समानवर्णाः भवन्ति अनुलोमास्तु मातृवर्णाः' इति विष्णुवचने मातृसवर्णत्वप्रतिपादनं मातृजात्युचितधर्मप्राप्त्यर्थमिति प्रतिपादितम्। तस्मात्

धर्मान्वयरहितायां क्षत्रियायां ब्राह्मणादुत्पन्नो मूर्धावसिक्त एव ॥

क्षत्रियेण पुत्रार्थतया प्रेषितायां क्षत्रियभार्यायां ब्राह्मणादुत्पन्नः क्षत्रिय एव । तथा चादिपर्वणि कुन्तीं प्रति पाण्डुः— 'सौदासेन च रम्भोरु नियुक्तापत्यजन्मनि । मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ॥ तस्माल्लेभे च सा पुत्रमश्मकं नाम भामिनि । अस्माकमपि ते जन्म विदितं कमलेक्षणे ॥ कृष्णद्वैपायनाद्भीरु कुरुवंशविवृद्धये ॥' इति । तत्रैवान्यत्र— 'बलिः सुदेष्णां भार्यां स्वां तस्मै स प्राहिणोत्पुनः । तां स दीर्घतमाङ्गेषु दृष्ट्वा देवीमथाब्रवीत् । अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सह्मश्च ते सुताः ॥ भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ।' इति । तत्रैव च स्थलान्तरे— एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना । त्रिःसप्तकृत्वः पृथिवी? निकृत्ताः क्षत्रियाः पुरा ॥ ततः सम्भूय सर्वाभिः क्षत्रियाभिः समन्ततः । उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः ॥ पाणिग्राहस्य तनय इति वेदेषु निश्चितम् । धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः सम[illegible]युः ॥ ततः पुनः समुदितं क्षत्रं समभवत्तदा । ' इति । तत्रैवान्यत्र 'शृणु कुन्ति कथामेतां शारदण्डायनीं प्रति । सा वीरपत्नी गुरुणा नियुक्ता पुत्रजन्मने ॥ पुण्येन प्रयता स्नाता निशि कुन्ति चतुष्पथे ॥ वरयित्वा द्विजं सिद्धं हुत्वा पुंसवनेऽनलम् । कर्मण्यवसिते तस्मिन्सा तेनैव सहावसत् ॥ तत्र त्रीन् जनयामास दुर्जयादीन्महारथान् । तथा त्वमपि कल्याणि ब्राह्मणात्तपसाधिकात् ॥ मन्नियोगाद्यत क्षिप्रमपत्योत्पादनं प्रति । ' इति ॥

एवं पुलस्त्येन धर्मार्थतया ऊढायां तृणबिन्दुकन्यायां धर्म-

पत्न्यामुत्पन्नत्वेन विश्रवसः ब्राह्मणत्वं न तु मूर्धावसिक्तत्वमेव । तस्य विश्रवसः भरद्वाजकन्या ब्राह्मणी ज्येष्ठा धर्मपत्नी । तया चाग्निहोत्रादिकमनुष्ठाय स्थितस्य विश्रवसः समीपे स्वयं पुत्रार्थतया कैकसी समागतेति प्रतिपादितमुत्तरकाण्डे— 'अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः । अचिरेणैव कालेन पितेव तपसि स्थितः ॥ सत्यवान् शीलवान् दान्तः स्वाध्यायनियतः शुचिः । सर्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः ॥ ज्ञात्वा तस्य तु तद्वृत्तं भारद्वाजो महानृषिः । ददौ विश्रवसे भार्यां स्वसुतां ...वर्णिनीम ॥ स तस्यां वीर्यसम्पन्नं पुत्रं परमधार्मिकम् । जनयामास धर्मात्मा सर्वैर्ब्रह्मगुणैर्वृतम् । तस्मिन् जाते तु संहृष्टः स बभूव पितामहः ॥ नाम चास्याकरोत्प्रीतः सार्धं देवर्षिभिस्तदा । यस्माद्विश्रवसोऽपत्यं सादृश्याद्विश्रवा इव ॥ तस्माद्वैश्रवणो नाम भविष्यत्येष विश्रुतः । अथ तत्रावसत्प्रीतो धर्मात्मा नैर्ऋताधिपः ॥ समुद्रपरिधानायां लङ्कायां विश्रवात्मजः । काले काले विनीतात्मा पुष्पकेण धनेश्वरः ॥ अभ्यगच्छत्सुसंहृष्टः पितरं मातरं च सः ।' ततः पुष्पकमधिरुह्य काले काले पितृदर्शनाय गच्छन्तं वैश्रवणमवलोक्य सुमाली स्वपुत्रीं कैकसीमित्थमवोचत्— 'गच्छ विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् । ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः ॥ तेजसा भास्करसमा यादृशोऽयं धनेश्वरः । सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् ॥ तत्रोपगम्य सा तस्थौ विश्रवा यत्र तप्यते । एतस्मिन्नन्तरे राम पुलस्त्यतनयो द्विजः ॥ अग्निहोत्रमुपासीनश्चतुर्थ इव पावकः ।' एवं विश्रवसः ब्राह्मण्यां ज्येष्ठायां धर्मपत्न्यां सत्यामेव पुत्रार्थतया समागतायां कैकस्यामुत्पन्नत्वात् रावणः क्षत्रियधर्मा मूर्धावसिक्त एव ॥

तथा इन्द्रजितो राजसूयाश्वमेधादिराजयज्ञावगमादपि तत्पितु रावणस्य क्षत्रियत्वम् । तथा चोत्तररामायणे रावणं प्रत्युशनाः— 'उशना त्वब्रवीत्तत्र गुरुर्यज्ञसमृद्धये । रावणं राक्षसश्रेष्ठमुवाच च महातपाः ॥ अहमाख्यामि ते राजन् श्रूयतां सर्वमेव च । यज्ञास्ते सप्त पुत्रेण प्राप्ताः सुबहुविस्तराः ॥ अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः । राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा ॥ माहेश्वरप्रवृत्ते तु यज्ञे पुंभिः सुदुर्लभे । वरांस्ते लब्धवान्पुत्रः साक्षात्पशुपतेरिह ॥ कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम् । मायां च तामसीं नाम यया संपद्यते तमः ॥' इति । उक्तानां राजयज्ञत्वं बोधायनसूत्रे— 'अथ राजयज्ञाः । राजसूयोऽश्वमेधः सर्वमेधः सोमसवः पृथिवीसवो मृत्युसवः कानान्धयज्ञः शुनस्कर्णयज्ञः' इति । तथा याजनाध्यापनप्रतिग्रहादिब्राह्मणधर्मादर्शनात् 'राक्षसेन्द्रोऽभिषिक्तश्च भ्रातृभिस्सहितस्तदा' इत्यादिभिः श्लोकैः राज्याभिषेकावगमाच्च ॥

किं च राज्यकरणस्वप्रजासंरक्षणत्रैलोक्यविजययुद्धमरणादिक्षत्रियधर्मदर्शनादपि क्षत्रियः । अत एव इन्द्रस्य विशुद्धमातापितृजन्यत्वात् ब्राह्मणत्वे सिद्धेऽपि कर्मणा क्षत्रियत्वं प्रतिपादितं राजधर्मे— 'इन्द्रो वै ब्राह्मणः पुत्रः कर्मणा क्षत्रियोऽभवत्' इति । सुन्दरकाण्डे हनुमता सह युद्धार्थं इन्द्रजित्प्रेषणदशायाम्— 'न खल्वियं मतिः श्रेष्ठा यत्त्वां सम्प्रेषयाम्यहम् । इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥' इति रावणेन स्वस्य क्षत्रियत्वोक्तेः ॥

बुभुक्षितैरुक्तस्ततस्तानाह भूतकृत । रक्षामेति च यैरुक्तं राक्षसास्ते भवन्तु वः। जक्षामेति च यैरुक्तं ते वै यक्षा भवन्तु वः॥' इति । एवं क्षत्रियासाधारणरक्षणधर्मयोगेन राक्षसजाते क्षत्रजातित्वेन तद्वंश्यायां कैकस्यां विश्रवसो ब्राह्मणस्य सकाशात् प्रसूतत्वात् रावणस्य मूर्धावसिक्तत्वमेव ॥

नन्वेवं विश्रवसोऽपि ब्राह्मण्यं न स्यात् । मूर्धावसिक्तत्वमेव स्यात् । तृणबिन्दोः[कन्यायां] राजन्यायां ब्राह्मणादुत्पन्नत्वात् । तथा **चोत्तररामायणे**– 'पुरा कृतयुगे राम प्रजापतिसुतः प्रभुः । पुलस्त्यो नाम ब्रह्मर्षिः साक्षादेव पितामहः ॥ तृणबिन्दुस्तु राजर्षिस्तपसा द्योतितप्रभः । गृहीत्वा तनयां गत्वा पुलस्त्यमिदमब्रवीत् । भगवंस्तनयां मे त्वं गुणैः स्वैरेव भूषिताम् । भिक्षां प्रतिगृहाणेमां मयेह स्वयमुद्यताम् ॥' इत्थमभिहितः अङ्गीकृत्य राजतनयां तया च कृतशुश्रूषः 'परितुष्टोऽस्मि सुश्रोणि गुणानां संपदा भृशम् । तस्मात्तु वितराम्यद्य पुत्रं त्वात्मसमं तव । उभयोर्वंशकर्तारं पौलस्त्य इति विश्रुतम् ॥ यस्मात्तु विश्रुतो वेदस्त्वयेहाभ्यस्यतो मम । तस्मात्तु विश्रवा नाम भविष्यति न संशयः' ॥ इत्यभिहितवान् । सापि— 'अचिरेणैव कालेनासूत विश्रवसं सुतम् । पितेव तपसा युक्तो विश्रवाश्चाभवन्मुनिः ॥' इति । तथा च क्षत्रियायामुत्पन्नस्य कथं ब्राह्मण्यम्? न च मास्तु ब्राह्मण्यं, को दोष इति वाच्यम् । तथा सति 'ब्रह्मर्षेस्तं सुतं ज्ञात्वा मयो हर्षमुपागतः । दातुं दुहितरं तस्मै रोचयामास तत्र वै ॥' इत्यत्र, 'किन्तु विद्धि हि मां ब्रह्मन् शासनात्पितुरागताम्' इति कैकसीवाक्ये च **उत्तरकाण्डे**

ब्राह्मणत्वव्यवहारविरोधप्रसङ्गादिति चेत्– न, ब्राह्मणात्क्षत्रियाया-मुत्पन्नानामपि ब्राह्मणत्वसम्भवात् । [तथा हि— ब्राह्मणात् क्षत्रि-यायामुत्पन्नाः] त्रिविधाः– ब्राह्मणो मूर्धावसिक्तः क्षत्रियश्चेति । तत्र 'ब्राह्मणकन्यकाया अलाभे स्नातकव्रतं चरेत् । क्षत्रियायां वा पुत्रमुत्पादयीत वैश्यायां वा' इति पैठीनसिवचनेन क्षत्रिया-विवाहस्यानुमतत्वात्, तस्यां ब्राह्मविवाहोढायां धर्मान्वयवत्यां क्षत्रियायां ब्राह्मणादुत्पन्नो ब्राह्मण एव । एतदभिप्रायेणैव क्षत्रि-यायामुत्पन्नस्य ब्राह्मणत्वमुक्तं मनुना— 'यथा त्रयाणां वर्णानां द्वयोरात्मा प्रजायते । आनन्तर्यात्स्वयोन्यां च तथा बाह्येष्वपि क्रमः ॥' इति ॥

आनुशासनिकेऽपि— 'क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः । त्रिषु वर्णेषु जातो हि ब्राह्मणाद्ब्राह्मणो भवेत् ॥ भार्याश्चतस्रो विप्रस्य द्वयोरात्मा प्रजायते । आनुपूर्व्या द्वयोर्हीनौ मातृजात्या प्रसूयते ॥' इति । अत्र वैश्यशूद्रयोर्निजातयोर्मातृजा-तीयत्वोक्त्यापि पूर्वयोः ब्राह्मणत्वं सिद्धम् ॥

इत्थं भारतेऽप्यादिपर्वणि— उपरिचरवसुनाम्नो राज्ञ-स्तनयायां सत्यवत्यां पराशराद्व्यासो ब्राह्मणोऽभूदिति प्रतिपादि-तम्— 'दिव्यां तां वासवीं कन्यां रम्भोरूं मुनिपुङ्गवः । दृष्ट्वैव च स तां धीमांश्चकमे चारुहासिनीम् ॥' इति । वासवीं उपरिच-रवसोः सुताम् । 'पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा । जज्ञे च यमुनाद्वीपे पाराशर्यश्च वीर्यवान् । एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् ॥' इति ॥

अत एव च अगस्त्यो विदर्भराजतनयायां लोपामुद्रायां दृढस्युं ब्राह्मणमजीजनदिति प्रतिपादितम् **वनपर्वणि**— 'वरये तां महीपाल लोपामुद्रां प्रयच्छ मे ।' इत्यगस्त्यप्रार्थितो वैदर्भः— 'लोपामुद्रां ततः प्रादाद्विधिपूर्वं विशांपते । तत आधाय गर्भं तमगमद्वनमेव सः ॥ सप्तमेऽब्दे गते चापि प्राच्यवत्स महाकविः । ज्वलन्निव प्रभावेन दृढस्युर्नाम भारत ॥ तस्य पुत्रोऽभवद्धपे स तेजस्वी महाद्विजः ।' स एव 'इध्मानां भारमाजह्रे इध्मवाहस्ततोऽभवत् ' । इति । एवं ऋचीकात् गाधितनयायां जमदग्निर्ब्राह्मणोऽभवदिति प्रतिपादितं **वनपर्वणि**— 'गाधीति विश्रुतो लोके वनवासं जगाम ह । वने तु वसतस्तस्य कन्या जज्ञेऽप्सरःसमा ॥ ऋचीको भार्गवस्तां च वरयामास भारत । गङ्गायां कान्यकुब्जे वै ददौ सत्यवतीं तदा । ततो गाधिः सुतां चास्मै ज[ध]न्याश्वासन्सुरास्तदा ॥ धर्मेण लब्ध्वा तां भार्यां ऋचीको द्विजसत्तमः । जमदग्निं ततः पुत्रं जज्ञे सा काल आगते ॥ तेजसा वर्चसा चैव युक्तं भार्गवनन्दनम् ॥' इति । एवमेव जमदग्नेरपि प्रसेनजितो राज्ञस्तनयायां रेणुकायां परशुरामपञ्चमाः पुत्रा ब्राह्मणाः अभवन्नित्यपि तत्रैव— 'स वेदाध्ययनोद्युक्तो जमदग्निर्महातपाः । तपस्तेपे ततो वेदान्नियमाद्वशमानयत् ॥ स प्रसेनजितं राजन्नधिगम्य नराधिपम् । रेणुकां वरयामास स च तस्मै ददौ नृपः । रेणुकां त्वथ सम्प्राप्य भार्यां भार्गवनन्दनः ॥ तस्यां कुमाराश्चत्वारो जज्ञिरे रामपञ्चमाः ॥' इति । एवं शर्यातेः क्षत्रियस्य कन्यायां सुकन्याभिधायां प्रमतिं ब्रह्मर्षिं च्यवनोऽजीजनत् । प्रमतिरपि घृताच्यां रुरुम् । रुरुरपि

प्रमद्वरायां शुनकमित्यादि वनपर्वणि— 'ऋषेर्वचनमाज्ञाय शर्यातिरविचारयन् । ददौ दुहितरं तस्मै च्यवनाय महात्मने ॥ सुकन्यापि पतिं लब्ध्वा तपस्विनमनिन्दिता । नित्यं पर्यचरत्प्रीत्या तपसा नियमेन च ॥ अग्नीनामतिथीनां च शुश्रूषुरनसूयिका । समाराधयति क्षिप्रं च्यवनं सा शुभानना ॥ स चापि च्यवनो ब्रह्मन् भार्गवोऽजनयत्सुतम् । सुकन्यायां महात्मानं प्रमतिं दीप्ततेजसम् ॥ प्रमतिस्तु रुरुं नाम घृताच्यां समजीजनत् । रुरुः प्रमद्वरायां तु शुनकं समजीजनत् ॥' इति ॥

तथा च क्षत्रियायां धर्मान्वयवत्यां ब्राह्मणादुत्पन्नो ब्राह्मण एव । यस्तु धर्मान्वयिन्यां ब्राह्मण्यां सत्यां रत्यर्थोढायां क्षत्रियायां ब्राह्मणादुत्पन्नः स मूर्धावसिक्तः । तथाहि— ब्राह्मण्यां सत्यां क्षत्रियायाः विवाहो रत्यर्थ एव[न]धर्मार्थः । तथा च मनुः— 'सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः ॥' 'चतस्रोऽभिहिता भार्या ब्राह्मणस्य पितामह । ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ॥' इति । सवर्णयैव धर्माः कर्तव्याः । न तस्यां सत्यामसवर्णया । तदपि मनुनोक्तम्— 'यदि स्वाश्चापराश्चापि विन्देरन्योषितो द्विजाः । तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्मनि ॥ भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम् । स्वा स्वैव कुर्यात् सर्वेषां नासवर्णा कथंचन ॥ यस्तु तत्कारयेन्मोहात्स्व[वि]जात्यां स्थितयान्यया । यथा ब्राह्मणचण्डालः पूर्वदृष्टस्तथैव सः ॥' इति । आनुशासनिकेऽपि— 'तिस्रः कृत्वा पुरो भार्याः पश्चाद्विन्देत ब्राह्मणीम् । सा ज्येष्ठा सा च पूज्या स्यात्सा च भार्या गरीयसी ॥ स्नानं

जीवनार्थानां कर्मणां व्यत्यये विपर्यासे । यथा ब्राह्मणो मुख्य-वृत्त्याजीवन्क्षात्रेण कर्मणा जीवेदित्यनुकल्पः । तेनाप्यजीवन्वैश्य-वृत्त्या । तयाप्यजीवन् शूद्रवृत्त्या । क्षत्रियोऽपि स्वकर्मणा जीवनार्थे-नाजीवन्वैश्यवृत्त्या । तयाप्यजीवन् शूद्रवृत्त्या । वैश्योऽपि स्ववृत्त्या अजीवन् शूद्रवृत्त्येति कर्मणां व्यत्ययः । तस्मिन् व्यत्यये सति यथा-पद्विमोक्षेऽपि तां वृत्तिं न परित्यजति, तदा सप्तमे षष्ठे वा पञ्चमे वा जन्मनि साम्यम् । यस्य हीनवर्णस्य कर्मणा जीवति, तत्समा-नजातिर्भवति तद्यथा— ब्राह्मणः शूद्रवृत्त्या जीवन् सप्तमे शूद्रं जन-यति । वैश्यवृत्त्या जीवन् षष्ठे वैश्यम् । क्षत्रियवृत्त्या जीवन्पञ्चमे क्षत्रियम् । क्षत्रियोऽपि शूद्रवृत्त्या षष्ठे शूद्रम् । वैश्यवृत्त्या जीव-न्पञ्चमे वैश्यम् । वैश्योऽपि शूद्रवृत्त्या जीवन् तामपरित्य-जन्पुत्रपरम्परया पञ्चमे जन्मनि शूद्रं जनयति इति । पूर्ववच्चा-धरोत्तरमिति । अस्यार्थः— अधरे च उत्तरे च अधरोत्तरम् । यथा मूर्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादितास्तथा अम्बष्ठायां वैश्यशू-द्राभ्यामुत्पादिताः, निषाद्यां शूद्रेण उत्पादिता अधरे प्रतिलोमाः । तथा मूर्धावसिक्ताम्बष्ठानिषादीषु ब्राह्मणेनोत्पादिताः, माहिष्यो-ग्रयोर्ब्राह्मणेन क्षत्रियेण चोत्पादिताः, करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिताः उत्तरे अनुलोमाः । एवमन्यत्रापि ऊह्यम् । गौतमोऽपि— 'वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन' इति । अस्यार्थः— तेषामेव सवर्णादीनामनुलोमादीनां उत्कर्षापकर्षाभ्यां उत्कर्षेणापकर्षेण च वर्णान्तरगमनं वर्णान्तरप्राप्तिर्भवति । पितुरु-त्कृष्टो वर्णो मातुरपकृष्टः, स्वयं मध्ये जात्यन्तरं पितुरुत्कृष्टवर्णं मातुरपकृष्टवर्णं गच्छति तज्जातीयो भवति, कथितेन परिवर्त-

नेन सप्तमेन । यदि सप्तपरिवर्तनानि उत्कर्षेणैव भवन्ति, ततः पित्रा सजातिर्भवति । अपकर्षेण ततो मात्रा । ब्राह्मणेनोढायां क्षत्रियायामुत्पादिता सवर्णा स्त्री ब्राह्मणेनोढा, तस्या अपि दुहितेत्येवमा [सप्तमात्] सप्तमी तु ब्राह्मणेनोढा यदपत्यं सूते, तद्ब्राह्मणसजातीयमेव भवति । एवं ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रियामूढ्वा पुत्रमुत्पादयति, सोऽपि क्षत्रियामेवेत्या सप्तमात् । सप्तमस्तु क्षत्रियायां यदपत्यमुत्पादयति, तत् क्षत्रियजातीयमेव भवति । एवं क्षत्रियस्य वैश्यायां, वैश्यस्य च शूद्रायामिति द्रष्टव्यम् । 'पञ्चमेनाचार्याः ।' पञ्चमेन च परिवर्तनेन वर्णान्तरगमनं भवतीत्याचार्याः मन्यन्ते । वृत्तस्वाध्यायापेक्षित[क्ष]मिदं सूत्रम् । 'सृष्ट्यन्तरजानां च'। द्वयोः सृष्ट्यन्तरे जाताः, सृष्ट्यन्तरजाः सवर्णादयोऽनुलोमाः । तेषां चोत्कर्षापकर्षाभ्यां वर्णान्तरगमनं भवति सप्तमेन पञ्चमेन वा परिवर्तनेन । सवर्णेनोढायां अम्बष्ठयां उत्पादिता दुहिता पुनः सवर्णेनोढ्यते । तस्या अपीत्येवमा सप्तम्याः । सप्तमी तु सवर्णोढा यदपत्यमुत्पादयति तत्सवर्ण एव भवति । एवं अम्बष्ठोग्रयोरपि द्रष्टव्यमिति ॥

उक्तप्रकारेण असवर्णाविवाहादिकं कलिनिषिद्धम् । तथा च स्मृत्यन्तरे— 'कन्यानामसवर्णानां विवाहश्च द्विजन्मनः । द्विजस्याब्धौ तु निर्याणं शोधितस्यापि संग्रहः ॥ सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् । महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ॥ सौत्रामण्यामपि सुराग्रहणस्य च सङ्ग्रहः । अग्निहोत्रहवण्याश्च लेहलीढापरिग्रहः ॥ वानप्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः । वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ॥ प्रायश्चित्तविधानं च

विप्राणां मरणान्तिकम् । संसर्गदोषस्तेनान्यमहापातकनिष्कृतिः ॥ वरातिथिपितृभ्यश्च पशूपाकरणक्रिया । दत्तौरसेतराणां तु पुत्रत्वेन परिग्रहः ॥ विवर्णानां तथा दुष्टैः संसर्गः शोधितैरपि । अयोनौ सङ्ग्रहे वृत्ते परित्यागो गुरोः स्त्रियाः ॥ अस्थिसंचयनादूर्ध्वमङ्गसंस्पर्शमेव च । शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥ शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् । भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरत ॥ शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता । आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा ॥ प्रजार्थं तु द्विजाग्र्याणां परदारपरिग्रहः । ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥ बलात्कारादिदुष्टस्त्रीसङ्ग्रहो विधिचोदितः । यतेस्तु सर्ववर्णेषु भैक्षचर्या विधानतः । नवोदकदशाहं च दक्षिणा गुरुचोदिता ॥ ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च । भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥ गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया । पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ॥ यतेः सायं गृहस्थत्वं सूरिभिस्तत्त्वतत्परैः । एतानि लोके गुप्त्यर्थं कलेरादौ महात्मभिः ॥ निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥' इति । इत्थं कलियुगे निषिद्धा अपि जातयः पुरायुगे सन्त्येव ॥

इत्थं प्रतिपादितेषु जातिषु नायं रावणो ब्राह्मणः, ब्राह्मण्यामुत्पन्नत्वाभावात् । नापि क्षत्रियो वैश्यः शूद्रो वा, ब्राह्मणाद्विश्रवस उत्पन्नत्वात् । नापि अनुलोमभूर्धावसिक्ता-(त्वा)दिः, राक्षस्यामुत्पन्नस्य क्षत्रियादिक्षेत्रोत्पत्त्यभावात् । राक्षस्यामुत्पत्तिश्च उत्तररामायणे— 'तत्र हेतिः प्रहेतिश्च भ्रातरौ

राक्षसर्षभौ । मधुकैटभसङ्काशौ बभूवतुररिन्दमौ ॥ प्रहेतिर्धार्मिकस्तत्र तपोवनगतस्तदा । हेतिर्दारक्रियार्थं तु यत्नं परमथाकरोत् । स कालभगिनीं कन्यां भयां नाम भयावहाम् ॥ उदावहदमेयात्मा स्वयमेव महामतिः । स तस्यां जनयामास हेती राक्षसपुङ्गवः ॥' पुत्रं विद्युत्केशं (जनयामास) । सोऽपि सन्ध्यातनयायां सालकटंकटायां मालिसुमालिमाल्यवन्नामकान्पुत्रानजीजनत् । तत्रापि सुमालितनयायां कैकस्यां विश्रवसो रावण उत्पन्न इति । तथा च ब्राह्मणादिबहिर्भूतस्य कथं वैदिके कर्मण्यधिकार इति चेत्— न ॥

राक्षससामान्यस्य क्षत्रियजातित्वेन राक्षस्यां विश्रवसो उत्पन्नस्यापि मूर्धावसिक्तत्वेन कर्माधिकारसम्भवात् । [अथवा] रक्षणार्थं सृष्टा जातिस्तावत्क्षत्रियजातिरेव । तथा च बृहदारण्यके 'तच्छ्रेयोरूपमत्यसृजत क्षत्रम्' इति । अस्यार्थो भाष्ये— 'तद्ब्रह्म श्रेयोरूपं प्रशस्तरूपं क्षत्रं क्षत्रियजातिमत्यसृजत' इति । भारतेऽपि 'अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात् । रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥' इति । तथा च रक्षणोद्देशेन सृष्टत्वरूपक्षत्रियधर्मयोगात्क्षत्रिय एव राक्षसः । राक्षसानां रक्षणोद्देशेन सृष्टत्वं चोत्तररामायणे— 'प्रजापतिः पुरा सृष्ट्वा ह्यपः सलिलसम्भवः । तासां गोपायने सत्वानसृजत्पद्मसम्भवः ॥ ते सत्वाः सत्वकर्तारं विनीतवदुपस्थिताः । किं कुर्म इति भाषन्तः क्षुत्पिपासाभयार्दिताः ॥ प्रजापतिस्तु तान्याह सत्वानि प्रहसन्निव । आभाष्य वाचा यत्नेन रक्षध्वमिति मानदः ॥ रक्षामेति च तत्रान्यैर्जक्षामेति तथापरैः । भुङ्क्षिता-

तथा विभीषणं प्रति रामवचनेऽपि— 'नैवं विनष्टाः शोच्यन्ते क्षत्रधर्मे व्यवस्थिताः। वृद्धिमाशंसमानाश्च निपतन्ति रणाजिरे ॥ येन सेन्द्राः त्रयो लोकाः त्रासिता युधि धीमता। अस्मिन्कालसमायुक्ते न कालः परिशोचितुम् ॥ नैकान्तविजयो युद्धे भूतपूर्वः कदाचन। परैर्वा हन्यते वीरः परान्वा हन्ति संयुगे ॥ इयं हि पूर्वैः सन्दिष्टा गतिः क्षत्रियसम्मता। क्षत्रियो निहतः सङ्ख्ये न शोच्य इति निश्चयः ॥ तमेव निश्चयं दृष्ट्वा सत्वमास्थाय विज्वरः। यदिहानन्तरं कार्यं कल्पं समनुचिन्तय ॥' इति। संस्कारदशायां च— 'वर्तते वेदविहितो राज्ञो वै पश्चिमः क्रतुः। अनुस्तरणिकां राज्ञो घृताक्तां समवेशयत् ॥' इति राजत्वेन व्यवहाराच्च क्षत्रधर्मा मूर्धाभिषिक्तो रावणः ॥

क्षत्रियाणां चासाधारण्येन पर्वण्येव होमः। तथा चाश्वलायनः— 'पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः। तैरमावास्यायां पौर्णमास्यां वा यजेत राजन्यश्चाग्निहोत्रं जुहुयात्। तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत्' इति। आपस्तम्बस्तु— 'न राजन्यस्य जुहुयात् होमकाले गृहेभ्यो ब्राह्मणायान्नं प्रहिणुयात्तेनैवास्य हुतं भवति नित्यमग्न्युपस्थानं वाचयितव्यम्' इति। अतश्च क्षत्रियधर्मानुष्ठातुर्दशग्रीवस्य पर्वण्येवाग्निहोत्रहोम उपपन्नः। न च सोमयाजित्वान्नित्यहोमः किं न स्यादिति वाच्यम्। ऋतसत्यशीलस्य सतः सोमयाजिन एव नित्यहोमविधानात्। तथा च आश्वलायनः— 'ऋतसत्यशीलः सोमसुत्सदा जुहुयात्' इति। आपस्तम्बोऽपि— 'यो वा सोमयाजी सत्यवादी तस्य जुहु-

यात्' इति ।। व्याख्यातं धूर्तस्वामिना— 'उभयगुणस्य हूयते' इति । उभयगुणस्य ऋतसत्यशीलित्वं सोमयाजित्वं चेत्युभयमपि यस्य तस्य क्षत्रियस्य नित्यं होमः' इति । न चायं रावणो ऋतसत्यशीलः, मायावित्वात्, गान्धर्वविवाहोत्पन्नत्वाच्च । विवाहानुरूपतया सत्यवचनत्वं अनृतत्वं चाह मनुः— 'ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः । ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसम्मताः ।। रूपसत्वगुणोपेता धनवन्तो यशस्विनः । पर्याप्तभोगा धर्मिष्ठाः जीवन्ति च शतं समाः ।। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा । इतरेष्ववशिष्टेषु नृशंसानृतवादिनः ।। जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ।' इति । आपस्तम्बोऽपि— 'यथायुक्तो विवाहस्तथायुक्ता प्रजा भवति' इति । तथा चानृतवादिनो रावणस्य ऋतसत्यशीलत्वसोमयाजित्वयोरुभयोर्गुणयोरभावेन आपस्तम्बोक्तरीत्या नित्यहोमप्राप्त्यभावादुक्तरीत्या मूर्धावसिक्तस्य पर्वण्यसाधारण्येनाग्निहोत्रहोमप्रतिपादनं भगवता महर्षिणा वाल्मीकिना कृतं युक्तमेव ।।

ततः प्रहस्तमहापार्श्वसुपार्श्वकेतुमालसुमालकुम्भकर्णविभीषणप्रमुखानां भवनान्यवप्लुत्य अपरमिवेन्दिरामन्दिरं रावणमन्दिरमासाद्य

ददर्श विविधान् गुल्मांस्तत्र रक्षःपतेर्गृहे ।

अनेन राजगृहसंरक्षणाय गजवाजिपदातिभिः सन्नद्धतया परितः सर्वदा स्थेयम् । तथा च राजधर्मे— 'न्यसेत गुल्मान्

दुर्गेषु सन्धौ च कुरुनन्दन । मध्ये च नरशार्दूल तथा राजनिवेशने ॥' इति ॥

इति षष्ठः सर्गः ।

अथ सप्तमः सर्गः ॥

सप्तमे—

स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालम् ।
यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥

निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः ।
मनोहराश्चापि पुनर्विशाला ददर्श वेश्माद्रिषु चन्द्रशालाः ॥

गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि ।
सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥

तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि ।
महीतले सर्वगुणोत्तराणि ददर्श लङ्काधिपतेर्गृहाणि ॥

ततो ददर्शोच्छ्रितमेघरूपं मनोहरं कांचनचारुरूपम् ।
रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपम् ॥

महीतले स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् ।
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णम् ॥

नारीप्रवेकैरिव दीप्यमानं तटिद्भिरम्भोदवदर्च्यमानम् ।
हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे सुकृतां विमानम् ॥

यथा नगाग्रं बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् ।
ददर्श युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रम् ॥

मही कृता पर्वतराजिपूर्णा शैलाः कृता वृक्षवितानपूर्णाः ।
वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं केसरपत्रपूर्णम् ॥

कृतानि वेश्मानि च पाण्डराणि तथा सुपुष्पाण्यपि पुष्कराणि ।
पुनश्च पद्मानि सकेसराणि धन्यानि चित्राणि तथा वनानि ॥

पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च विवर्धमानम् ।
वेश्मोत्तमानामपि चोच्चमानं महाकपिस्तत्र महाविमानम् ॥

कृताश्च वैडूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गाः ।
चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥

प्रवालजाम्बूनदपुष्पपक्षाः
सलीलमावर्जितजिह्मपक्षाः ।
कामस्य साक्षादिव भान्ति पक्षाः
कृता विहंगाः सुमुखाः सुपक्षाः ॥

नियुज्यमानाश्च गजाः सुहस्ताः
सकेसराश्चोत्पलपत्रहस्ताः ।
बभूव देवी च कृता सुहस्ता
लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥

अत्र गृहद्वारि महालक्ष्म्याः प्रतिमा स्थापनीयेति सूचितम् ।

तत्प्रकारश्चागमशास्त्रे—

'तयोर्मध्ये महालक्ष्मीं हेमवर्णां विभूषिताम् । श्रीफला-

स्वयंप्रभा ॥ दीप्यते नाकपृष्ठस्था भर्त्सयन्ती च भास्करम् । यस्यां स भगवानास्ते विभ्रद्देहममानुषम् । स्वयमेकोऽनिशं राजन् सर्वलोकपितामहः ॥ उपतिष्ठन्ति चाप्येनं प्रजानां पतयः प्रभुम । दक्षः प्रचेताः पुलहो मरीचिः कश्यपस्तथा । एते चान्ये च बहवो ब्रह्माणं समुपस्थिताः । अर्थो धर्मश्च कामश्च हर्षो द्वेपस्त[पो]मो दमः ॥ आयान्ति तस्यां सहसा गन्धर्वाप्सरसां गणाः । विशन्ति[विंशतिः]सप्त चैवान्ये लोकपालाश्च सर्वशः । शुक्रो बृहस्पतिश्चैव बुधोऽङ्गारक एव च ॥ शनैश्चरश्च राहुश्च ग्रहास्सर्वे तथैव च । मन्त्रो रथन्तरं चैव हरिमान्वसुमानपि । आदित्याः साधिराजानो नामद्वंद्वैरुदाहृताः । मरुतो विश्वकर्मा च वसवश्चैव भारत ॥ यच्च किंच त्रिलोकेऽस्मिन्दृश्यते स्थाणु जङ्गमम् । सर्वं तस्यां मया दृष्टमिति विद्धि नराधिप । सर्वतेजोमयी दिव्या ब्रह्मर्षिगणसेविता । ब्राह्मया श्रिया दीप्यमाना शुशुभे विगतक्लमा ॥ सा सभा तादृशी दृष्टा मया लोकेषु दुर्लभा । सभेयं राजशार्दूल मनुष्येषु यथा तव ॥' इति ॥

इत्थमत्युत्कृष्टं लोकपालैश्वर्यम्, ततोऽप्यधिकं ब्रह्मण ऐश्वर्यम्, पुष्पकम्, ऐहिकामुष्मिकं सुखं च 'तपस्समाराधनपराक्रमार्जितम्' इति श्लोकोक्तरीत्या रावणस्तपोमहिम्ना अत्रैवोपभुङ्क्ते इत्युक्त्या तपसो दुर्लभं न किञ्चिदपि इति सूचितम् । तथा च मनुः—'यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् । तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥' इति ॥

ततो मदिरासमास्वादनविवशं रतिपतिसमितिपरिश्रमोप-

शान्तस्वभावं निश्शब्दमरालालिपटलं काञ्चनपङ्कजवनमिव तदङ्गनासमूहमवलोक्य—

तासां संवृतदन्तानि मीलिताक्षाणि मारुतिः ।
अपश्यत्पद्मगन्धीनि वदनानि सुयोषिताम् ॥

प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये ।
पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥

इमानि मुखपद्मानि नियतं मत्तषट्पदाः ।
अम्बुजानीव फुल्लानि प्रार्थयन्ते पुनः पुनः ॥

अत्र आसां मुखानि पद्मगन्धीनि, अत एव एतानि भ्रमराः प्रार्थयन्ते इत्युक्त्या तासां स्त्रीणां पद्मिनी-चित्रिणी-शङ्खिनी-हस्तिनीति जातिचतुष्टयमध्ये पद्मिनीजातित्वं सूचितम् । तज्जातिचतुष्टयं, पद्मिन्याः सर्वोत्कृष्टत्वं तल्लक्षणं चानङ्गरङ्गादौ । तत्र— 'पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा । पूर्वपूर्वतरास्तासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे ॥'

तत्र **पद्मिनी**— पद्मगन्धवदना सुकपोला मन्दगा तनुषडङ्गुलगुह्या । दानधर्मनिरता कृतपुण्या पद्मिनी विबुधभाषणलोला ॥ कुमुदविमलनेत्रा कुन्ददन्ताभिरामा वलियुततनुमध्या वक्रदीर्घोरुकेशा । अतिमृदुतरनासावक्त्रहस्ताङ्घ्रियुग्मा घनकुचसुनितम्बा पद्मिनी कामिनी स्यात् ॥ शुभ्रवस्तुप्रिया धीरा मुक्ताभरणभूषिता । श्वेतवस्त्रप्रिया रम्या मधुराहारसेविनी ॥' इत्यादि ॥

स्मरदीपिकायामपि— 'शशिवदना बिम्बोष्ठी तन्वी

ताम्रनखी तथा । मृद्वङ्गी लज्जिता श्यामा रक्तोपान्तविलोचना ॥ गायनी सुरताढ्या च पारावतकलस्वना । स्वल्पाहारा सुकेशी च पद्मगन्धा च पद्मिनी ॥' इति ॥

अनङ्गरङ्गे— 'कान्तारक्तकुरङ्गशावनयना पूर्णेन्दुतुल्यानना पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा । फुल्लाम्भोज-सुगन्धिकामसलिला लज्जावती मानिनी श्यामा कापि सुवर्णपङ्कज-निभा देवादिपूजारता ॥ उन्निद्राम्बुजकोशतुल्यमदनच्छत्रा मराल-स्वना तन्वी हंसवधूगतिः सुललितं वेषं सदा बिभ्रती । मध्यं चारुवलित्रयाङ्कितमसौ शुक्लाम्बराकाङ्क्षिणी सुग्रीवा शुभना-सिकेति गदिता नार्युत्तमा पद्मिनी ॥' इति ॥

चित्रिणी चानङ्गरङ्गे— 'तन्वङ्गी गजगामिनी चपलदृक् सङ्गीतशिल्पान्विता नो ह्रस्वा न बृहत्तराथ सुकृशा मध्ये मयूर-स्वना । पीनश्रोणिपयोधरा सुललिते जङ्घे वहन्ती कृशे कामांभो मधुगन्धि कोष्णमधुरा तुच्छोन्नता वत्सला ॥ कामागारमसान्द्र-लोमसहितं मध्ये मृदु प्रायशो बिभ्रत्फुल्लसितं च वर्तुलमथो रत्यम्बुनाढ्यं सदा । भृङ्गश्यामलकुन्तलाथ जलजग्रीवोपभोगे रता चित्रा शक्तिमती रतेऽल्परुचिका ज्ञेयाङ्गना चित्रिणी ॥' इति ॥

शङ्खिनी चानङ्गरङ्गे– 'दीर्घं बाहुशिरस्तथा कृशमथो देहं वहन्ती सदा पादौ दीर्घतरौ कटी च बृहती स्वल्पस्तनी कोपिनी । गुह्यं क्षारविगन्धिना स्मरजलेनाल्पेन सांद्रैः कचैरानिम्ना कुटि-लेक्षणा द्रुतगतिः सन्तप्तगात्रा भृशम् ॥ सम्भोगे करजक्षतानि

बहुशो यच्छत्यनङ्गाकुला न स्तोकं न च भूरि भक्षति सदा प्राज्ञे भवेत्पित्तला ।' इति ॥

हस्तिनीलक्षणं चानङ्गरङ्गे— 'स्थूला पिङ्गलकुन्तला च बहुभुक् क्रूरा त्रपावर्जिता गौराङ्गी कुटिलाङ्गुली कुचरणा ह्रस्वा महाकन्धरा । बिभ्रत्यैभमदाम्बुगन्धि रतिजं तोयं भृशं मन्दगा दुस्साध्या सुरतेऽतिगद्गदरवा स्थूलोष्ठिका हस्तिनी ॥' इति । एतासां परस्परसाङ्कर्यप्रयुक्ततया बहवो भेदा दृश्यन्ते । तथापि विस्तरभियोपरम्यते । एवं च रावणस्त्रियः पद्मगन्धित्वात्पद्मिन्य एव ॥

एवमेव कालिदासेनापि व्यङ्ग्यमर्यादया शकुन्तलायाः पद्मिनीत्वमुक्तम् । यथा—

'चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करौ व्याधून्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥' इति ॥

ननु धर्मनिरूपणाय प्रवृत्ते रामायणे कामपुरुषार्थोपयुक्तपद्मिन्यादिजातिनिरूपणमसङ्गतमिति चेन्न । स्वभावतो दुष्टानां स्त्रीणां संरक्षणेन विना धर्मानवाप्तेस्तत्संरक्षणस्य च वधबन्धादिभिः कर्तुमयुक्तत्वात् तच्चित्तसमाधानेनैव कर्तव्यत्वात् चित्तसमाधानोपायस्य च पद्मिन्यादिजातिभेदेन भिन्नत्वादस्ति पद्मिन्यादिजातिभेदनिरूपणस्य पारम्पर्येण धर्मोपयोगः । तथाहि । तत्र स्त्रीषु दोषस्तावद्भारते— 'आहारो द्विगुणः स्त्रीणां लज्जा तासां चतुर्गुणा । षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥

त्विरजोऽम्बराः । चित्राङ्गदाश्चित्रमाल्याः सर्वे ज्वलितकुण्डलाः ॥ सुकृतैः कर्मभिर्दिव्यैः परिबर्हैश्च भूषिताः । गन्धर्वाश्च महात्मानः सङ्घशश्चाप्सरोगणाः ॥ वादित्रनृत्यगीतं च हास्यं लास्यं च सर्वशः । पुण्याश्च गन्धाः शब्दाश्च तस्यां पार्थ समन्ततः ॥ दिव्यानि माल्यानि च तामुपतिष्ठन्ति सर्वशः । ईदृशी सा सभा राजन्पितृराज्ञो महात्मनः ॥' इति ॥

निर्ऋतिलोकैश्वर्यमपि तत्रैव— 'दिक्पतेर्नैर्ऋतस्यासौ पुण्यापुण्यजनोषिता । राक्षसा निवसन्त्यस्यामपरद्रोहिणः सदा ॥ जातिमात्रेण रक्षांसि वृत्तैः पुण्यजना इमे ॥' इति । काशीखण्डेऽपि— 'अत्यन्तश्रुतिवर्त्मानो जाता वर्णान्तरेष्वपि । नाद्रियन्तेऽन्नपानानामस्मृत्युक्तं कदाचन ॥ परदारपरद्रव्यपरद्रोहपराङ्मुखाः । जाता जातौ निकृष्टायामपि पुण्यानुरागिणः । द्विजातिभक्त्युत्पन्नार्थैरात्मानं पोषयन्ति ये ॥ सदा सङ्कुचिताङ्गाश्च द्विजसम्भाषणादिषु । आहूता वक्त्रवदना वदन्ति द्विजसन्निधौ ॥ जय जीव भगो नाथ स्वामिन्निति हि वादिनः । तीर्थस्नानपरा नित्यं नित्यं देवपरायणाः ॥ द्विजेषु नित्यं प्रणताः स्वनामाख्यानपूर्वकम् । अस्तेयसत्याहिंसा[श्च]सर्वेषां धर्महेतवः ॥ अवश्येषु सदोद्युक्ता ये जाता यत्र कुत्रचित् । सर्वभोगसमृद्धास्ते वसन्त्यत्र पुरोत्तमे ॥' इति ॥

वरुणलोकैश्वर्यं च उद्योगे— 'भवनं पश्य वारुण्यं यदेतत्सर्वकाञ्चनम् । यत्प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे ॥' इति ॥

काशीखण्डेऽपि— 'एतस्योत्तरतो लोको वरुणस्यायमद्भुतः । अभ्यषिञ्चत तं तत्र वारुणे परमे पदे ॥ रत्नानामब्धिजातानामब्धीनां सरितामपि । सरसां पल्वलानां च वाप्यम्बुस्रोतसां पुनः ॥ जलाशयानां सर्वेषां प्रतीच्याश्चापि वै दिशः । अधीश्वरः पाशपाणिर्भवेत्सर्वामरप्रियः ॥ इत्थं वरुणलोकस्य स्वरूपं ते निरूपितम् ।' इति ॥

सभापर्वण्यपि— 'दिव्यरत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता । नीलपीतासितश्यामैः सितैर्लोहितकैरपि ॥ अवदातैस्तथा गुल्मैः पुष्पमञ्जरिधारिभिः । तस्यां तथा शकुनयो नानारूपा मृदुस्वनाः ॥ सा सभा सुखसंस्पर्शा न शीता न च घर्मदा । वेश्मासनवती रम्या सिता वरुणपालिता ॥ यस्यामास्ते स वरुणो वारुण्या सह भारत । दिव्यरत्नाम्बरधरो भूषणैरुपशोभितः ॥ स्रग्विणो भूषिताश्चापि दिव्यमाल्यप्रकर्षिणः ।' इति ॥

वायुलोकैश्वर्यमपि काशीखण्डे— 'इमां गन्धवतीं रम्यां पुरीं वायोर्विलोकय । वारुण्या उत्तरे भागे महाभाग्यनिधेर्द्विज ॥ अस्यां प्रभञ्जनो नाम जगत्प्राणो दिगीश्वरः । आराध्य श्रीमहादेवं दिक्पालत्वमवाप्तवान् ॥ इति गन्धवतीपुर्याः स्वरूपं ते निरूपितम् ।' इति ॥

कुबेरैश्वर्यं सभापर्वणि— 'दिव्यहेममयैरङ्गैर्विद्युद्भिरिव चित्रिता । तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः ॥ स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुण्डलः । दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते । दिव्यपादोपधाने च निषण्णः परमासने ॥ मन्दारा-

णामुदाराणां वनानि परिलोडयन्। सौगन्धिकानां चादाय गन्धान् गन्धवहः शुभः ॥ अनिशं गीतवादित्रैर्नृत्यैर्दिव्यैश्च सा सभा। अशून्या रुचिरा भाति गन्धर्वाप्सरसां गणैः ॥ निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ। सर्वान्निधीन्पुरस्कृत्य उपास्तां वै धनेश्वरम् ॥' इति ॥

ईशानैश्वर्यं च काशीखण्डे— 'अलकायाः पुरोभागे पूरैशानी महोदया। अस्यां वसन्ति सततं रुद्रभक्तास्तपोधनाः ॥ असङ्ख्याताः सहस्राणि ये रुद्रा अधिभूतलम्। तेऽस्यां पुर्यां वसन्त्यैश्यां सर्वभोगसमृद्धयः ॥' इति ॥

इन्द्रलोकैश्वर्यं वनपर्वणि— धर्मपुत्रं प्रत्यर्जुनः— 'ततः शक्रस्य भवनमपश्यममरावतीम्। दिव्यैः कामफलैर्वृक्षै रत्नैश्च समलङ्कृताम् ॥ न तत्र सूर्यस्तपति न शीतोष्णे न च क्लमः। न बाधते तत्र रजस्तत्रास्ति न जरा नृप ॥ न तत्र शोको दैन्यं वा दौर्बल्यं चोपलक्ष्यते। दिवौकसां महाराज न ग्लानिररिमर्दन ॥ न क्रोधलोभौ तत्रास्तां शुभर्धीनां [सुरादीनां] विशांपते। नित्यं तुष्टाश्च ते राजन् प्राणिनः सुरवेश्मनि। नित्यपुष्पफलास्तत्र पादपा हरितच्छदाः ॥ पुष्करिण्यश्च विविधाः पद्मसौगन्धिकायुताः। शीतलश्च सुखो वायुः सुगन्धो जीवनः शुचिः। सर्वरत्नविचित्रा च भूमिः पुष्पविभूषिता। मृगद्विजाश्च बहवो रुचिरा मधुरस्वनाः ॥ विमानगामिनश्चात्र दृश्यन्ते बहवोऽम्बरे। ततोऽपश्यं वसून् रुद्रान्साध्यांश्च समरुद्गणान् ॥ आदित्यानश्विनौ चैव तान्सर्वान्प्रत्यपूजयम् ॥' इति ॥

आनुशासनिकेऽपि— 'ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् । मणिस्तम्भसहस्राढ्यं गन्धर्वनगरोपमम् ॥ विमानप्रतिमांश्चापि प्रासादान् शैलसन्निभान् । शीतलानि च तोयानि क्वचिदुष्णानि भारत ॥ आसनानि विचित्राणि शयनप्रवराणि च । पर्यङ्कान् रत्नसौवर्णान् परार्घ्यास्तरणानि च ॥ भक्ष्यं भोज्यमनन्तं च तत्र तत्रोपकल्पितम् । पर्वतान् रत्नसानूंश्च नलिनीश्च सपङ्कजाः ॥ क्वचिदप्सरसां सङ्घान् गन्धर्वाणां च भारत । कान्ताभिरपरांस्तत्र परिष्वक्तान्ददर्श ह ॥' इति ॥

काशीखण्डेऽपि— 'अश्वमेधसहस्रस्य लभ्यं विनिमयेन यत् । किं तेन तुल्यमन्यत्स्यात् पवित्रमथवा महत् ॥ अर्चिष्मती संयमनी पुण्यवत्यमलावती । गन्धवत्यलकैशी च नैतत्तुल्या महर्द्धिभिः ॥ अयमेव सहस्राक्षस्त्वयमेव दिवस्पतिः । शतमन्युरयं देवो नामान्येतानि नान्यतः ॥ सप्तापि लोकपाला ये त एनं समुपासते । नारदाद्यैर्मुनिवरैरयमाशीर्भिरीड्यते ॥ निष्प्रत्यूहं क्रतुशतं यः कश्चित्कुरुतेऽवनौ । जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् । असमाप्तक्रतुशता वसन्त्यत्र महीभुजः ॥ ज्योतिष्टोमादिभिर्यज्ञैर्ये यजन्त्यपि ते द्विजाः ॥' इति ॥

ब्रह्मलोकैश्वर्यं सभापर्वणि— 'सुसुखा सा सभा राजन्न शीता न च घर्मदा । न क्षुत्पिपासे न ग्लानिं प्राप्य तां प्राप्नुवन्त्युत ॥ नानारूपैः कृता वर्णैः सुविचित्रैः सुभास्वरैः । स्तम्भैर्न च धृता सा तु शाश्वती न च सा क्षरा ॥ दिव्यैर्नानाविधैर्भावैर्भासद्भिरमितप्रभैः । अति चन्द्रं च सूर्यं च शिखिनं च

ब्जधरां दक्षे वामे पद्माभयान्विताम् ॥ भृङ्गारामृतधाराभिर्गज-
तुण्डाभिषेचनीम् । वामदक्षिणहस्ताभ्यां दधतिं[तीं]श्रीफलाम्बुजे ।
हेमाभां सघटेभाभ्यां प्लाव्यमानां महाश्रियम् ॥' इति ॥

इतीव तद्गृहमभिगम्य शोभनं
सविस्मयो नगमिव चारुशोभनम् ।
पुनश्च तत्परमसुगन्धि सुन्दरं
हिमात्यये नगमिव चारुकन्दरम् ॥

ततः स तां कपिरभिपत्य पूजितां
चरन्पुरीं दशमुखबाहुपालिताम् ।
अदृश्य तां जनकसुतां सुपूजितां
सुदुःखितः पतिगुणवेगनिर्जिताम् ॥

ततस्तथा बहुविधभावितात्मनः
कृतात्मनो जनकसुतां सुवर्त्मनः ।
अपश्यतोऽभवदतिदुःखितं मनः
सुचक्षुषः प्रविचरतो महात्मनः ॥

इति सप्तमः सर्गः ।

अथ अष्टमः सर्गः ॥

अष्टमे—ततो वातात्मजस्त्रिभुवनमहनीयतमानुपमनिर्माण-
धुरीणगीर्वाणशिल्पिनूतनसर्वयत्ननिर्माणं सद्यः समुदिततरुणारु-
णसाराधिमण्डलदण्डनानिधिप्रचण्डमल्पक्रितहिमकराकिरणावलीन्दु-

कान्तनिष्यन्दमानशिशिरनीरशीकरसंप्लाव्यमानपरिसरं रंहोनिह्नुतपवनमन्तःप्रवेशसर्वस्वं स्वस्तरुतलसुस्थितनिस्तुलदिव्याङ्गनापाङ्गपेपीयमानं मणिमयशिखरोज्जृम्भितबहुविधरश्मिपरम्परानितान्तविध्वंसितध्वान्तं भवनमधिवसन्तम्

वसन्तपुष्पोत्करचारुदर्शनं
वसन्तमासादपि कान्तदर्शनम् ।
स पुष्पकं तत्र विमानमुत्तमं
ददर्श तद्वानरवीरसत्तमः ॥

वहन्ति यं कुण्डलशोभितानना
महाशना व्योमचरा निशाचराः ।
विवृत्तविध्वस्तविशाललोचना
महाजवा भूतगणाः सहस्रशः ॥

अत्र सभायां विमानस्य भूतै राक्षसैश्चोह्यमानत्वं प्रतिपादितम् । तथा च सभापर्वणि— 'तां तु तत्र मयेनोक्ताः किङ्करा नाम राक्षसाः । सभामष्टौ सहस्राणि रक्षन्ति च वहन्ति च ॥ अन्तरिक्षचरा घोरा महाकाया महाबलाः । रक्ताक्षाः पिङ्गलाक्षाश्च शङ्कुकर्णाः प्रहारिणः ॥' इति ॥

इति अष्टमः सर्गः ।

अथ नवमः सर्गः ॥

नवमे— सीतागवेषणाय निशाचरभवनान्यवलोकयन्ननिलात्मजस्तन्मध्यगमर्धयोजनविस्तृतं योजनायाममनवरतमात्तायुध-

यातुधानानीकैः संरक्ष्यमाणं द्वित्रिचतुर्विषाणैः प्रतप्तकार्तस्वरकृतबाण-वज्राङ्कुशविभूषणैर्लोकविद्रावणैर्मदवारणैर्निबिडितपर्यन्तकान्तम्

राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् ।
आहृताभिश्च विक्रम्य राजकन्याभिरावृतम् ॥

तन्नक्रमकराकीर्णं तिमिङ्गिलझषाकुलम् ।
वायुवेगसमाधूतं पन्नगैरिव सागरम् ॥

तस्य हर्म्यस्य मध्यमभूमिभागे विधातुरुपभोगायापूर्व-मिव विश्वकर्मनिर्मितं तपःसमाधिसमाराधितपितामहवरप्रसाद-लब्धं कुबेरस्य तत्पुष्पकाभिधानं नाम विविधवैडूर्यनिर्व्यूहसङ्कीर्ण-मभूतपूर्वोपमं महद्विमानमधिरुह्य मधुरतररसभक्ष्यभोज्यपानसौ-रभ्यादिविषयैर्नासारसनादीन्द्रियाणि सन्तर्पयन् ज्वलदहिमकरां-शुभिरानीलविमलोपलखचितसोपानपरम्परां मणिमयवेदिवितान-वातायनशातकुम्भस्तम्भगन्धोत्करसौगन्धिकगन्धफलिमाकालिकाग-न्धिगन्धवहस्तनन्धयबन्धुरां रावणपरमविहारास्पदीभूतां काञ्चन-मयीं विशालां शालामवलोक्य—

या हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने ।
सा रावणगृहे सर्वा नित्यमेवानपायिनी ॥

या च राज्ञः कुबेरस्य यमस्य वरुणस्य च ।
तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विह ॥

स्वर्गोऽयं देवलोकोऽयमिन्द्रस्येयं पुरी भवेत् ।
सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥

परा सिद्धिः उत्कृष्टतपःफलभूतो ब्रह्मलोक इत्यर्थः। अन्यैः श्लोकैर्विविधान्नपानभक्ष्यभोज्यगीतवादित्रस्त्रीसौख्यादिप्रतिपादकैरग्निमसर्गस्थितश्लोकैश्च इन्द्रादिलोकपालानां ब्रह्मणश्च यादृशमैश्वर्यं तादृशमैश्वर्यं रावणगृहे तिष्ठतीत्युक्तम्। तेषामैश्वर्यं च भारतादौ। तत्राग्निलोकैश्वर्यं (तादृशमैश्वर्यं च) काशीखण्डे–

'इमामर्चिष्मतीं पश्य वीतिहोत्रपुरीं शुभाम्। जातवेदसि ये भक्तास्ते वसन्त्यत्र सुव्रताः॥ अग्निहोत्ररता विप्राः तथाग्निब्रह्मचारिणः। पञ्चाग्निव्रतिनो ये वै तेऽग्निलोकेऽग्नितेजसः॥ जाठराग्निविवृद्ध्यर्थे यो दद्यादाग्नेयमौषधम्। मन्दाग्नये स पुण्यात्मा वह्निलोके वसेच्चिरम्॥ यज्ञोपस्करवस्तूनि यज्ञार्थं द्रविणं तु वा। यथाशक्ति प्रदद्याद्यः सोऽर्चिष्मत्यां वसेच्चिरम्॥ अग्निरेको द्विजातीनां निश्श्रेयसकरः परः। गुरुर्देवो व्रतं तीर्थं सर्वमग्निर्विनिश्चितम्। अपि वेदं विदित्वा यस्त्यक्त्वा वै जातवेदसम्॥ अन्यत्र बध्नाति रतिं ब्राह्मणो न स वेदवित्।' इति। यमैश्वर्यमपि भारते— तेजस्विनी सभा राजन् बभूव शतयोजना। विस्तारायामसम्पन्ना भूयस्यपि च पाण्डव॥ अर्कप्रभाभा भ्राजिष्णुः सर्वतः कामचारिणी। नैवातिशीता नात्युष्णा मनसश्च प्रहर्षिणी॥ न शोको न जरा तस्यां क्षुत्पिपासे न चाप्रियम्। न च दैन्यं क्लमो वापि प्रतिकूलं न चाप्युत॥ सर्वे कामाः स्थितास्तस्यां ये दिव्या ये च मानुषाः॥ रसवच्च प्रभूतं च भक्ष्यं भोज्यमरिन्दम। लेह्यं चोष्यं च पेयं च हृद्यं स्वादु मनोहरम्॥ पुण्यगन्धाः स्रजश्चात्र नित्यं कामफलद्रुमाः। शीतलानि च तोयानि सुखोष्णानि च भारत॥ सर्वे भास्वरदेहाश्च सर्वे च

चलस्वभावा दुस्सेव्या दुर्ग्राह्या भावतस्तथा । प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः ॥ स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः । तेन नारद नारीणां सतीत्वमुपजायते ॥ शम्बरस्य च या माया या माया नमुचेरपि । बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ न हि स्त्रीभ्यः परं तात पापीयः किञ्चिदस्ति हि । अग्निर्हि प्रमदा दीप्ता मायाश्च मयजा विभो ॥ क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ।' इति ॥

मनुरपि— 'नैता रूपं परीक्षन्ते नासां वयसि निश्चयः । विरूपं वा सुरूपं वा पुमानित्येव भुञ्जते ॥ पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥' इति। ननु तर्हि दुष्टत्वे परित्याज्या एव स्युः, 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायादिति चेन्न । तासां परित्यागे प्रत्यवायश्रवणात्, धर्मावाप्तेः प्रत्यवायपरिहारस्य च तदधी-नत्वाच्चापरिहार्या एव ताः । प्रत्यवायस्तावत्स्मृतौ— 'अदुष्टां विनतां भार्यां यौवने यः परित्यजेत् । सप्तजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः ॥' इति ॥

धर्मसाधनत्वं च मानवे—

'प्रजनार्थे महाभागाः पूजार्हा गृहदीप्तयः । स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥ उत्पादनमपत्यस्य जातस्य परिपा-लनम् । प्रत्यहं लोकयात्रा च प्रत्यक्षं स्त्रीनिबन्धनम् ॥ अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा । दाराधीनस्तथा स्वर्गः पितृणा-मात्मनश्च ह ॥' इति । प्रत्यवायपरिहारस्य भार्याधीनत्वं च—

'नापुत्रस्य लोकोऽस्ति' 'प्रजया पितृभ्यः' इति शास्त्रावगतापुत्रत्वप्रयुक्तप्रत्यवायपरिहारस्य भार्याधीनत्वात्। तथा च भारते जरत्कारूपाख्याने— 'लोकात्पुण्यादिह भ्रष्टाः सन्तानप्रक्षयाद्विभो। प्रणष्टं नस्तपःपुण्यं न हि नस्तन्तुरस्ति वै॥ जरत्कारुरिति ख्यातो वेदवेदाङ्गपारगः। न तस्य भार्या पुत्रो वा बान्धवो वास्ति कश्चन॥ तस्माल्लम्बामहे गर्ते नष्टसंज्ञा ह्यनाथवत्। सन्तानप्रक्षयात्त्वस्मिन्पतामो नरकेऽशुचौ॥' इति। अतः अपरित्यागेन रक्षणीया एव, अरक्षणे दोषश्रवणात्। तथा च मनुः—

'द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः।' इति।

रक्षणे च गुणमाह मनुः— 'सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः। इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्। यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि॥ स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च। स्वं च धर्मं प्रजां चैव जायां रक्षन्हि रक्षति॥' इति। आपस्तम्बोऽपि— 'इदानीमेवाहं जनकः स्त्रीणामीर्ष्यामि नो पुरा। यदा यमस्य सादने जनयितुः पुत्रमब्रुवन्॥ रेतोधाः पुत्रं नयति परेत्य यमसादने। तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः॥' इति। याज्ञवल्क्योऽपि— 'यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रियो रक्ष्या विशेषतः॥' इति। तद्रक्षणं च वधबन्धादिभिरशक्यं न कर्तव्यम्। तथा चानुशासनिके— 'न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन। न ज्ञातिकुलसम्बन्धात्स्त्रियस्तिष्ठन्ति भर्तृषु॥ नाना वा वधबन्धैर्वा क्लेशैर्वा विविधैस्तथा। न शक्या रक्षितुं नार्यस्ता हि नित्यमतन्द्रिताः॥' इति॥

निर्बन्धमे स्वस्यानर्थमाह **मनुः**—

'पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः। रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥' अस्यार्थः— पौंश्चल्यात् पुंमात्रदर्शनेन मैथुनेच्छावत्त्वात् स्वभावतो निःस्नेहत्वाच्च भर्त्रादिभिर्यत्नतो रक्षिता अपि पुरुषेच्छया भर्तृषु विकुर्वते मरणादिविक्रियां कुर्वते इति। वधबन्धनादि न कर्तव्यमित्यत्रापि **मनुः**— 'शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्। न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥ जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः। तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥' इति। अतस्तासां समाधानेन रक्षणं कर्तव्यम्। तदपि **मानवे**— 'तस्मादेताः सदाभ्यर्च्या भूषणाच्छादनाशनैः। भूतिकामैर्नरैर्नित्यं सत्कारेणोत्सवेन च ॥ पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा। पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥ यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। यत्रैतास्तु न पूज्यन्ते सर्वास्ता निष्फलाः क्रियाः ॥' इति। **स्मरदीपिकायामपि**— 'सत्सम्प्रदानैर्मधुरैर्वचोभिस्सा रक्षितव्या तरुणी सदैव। अरक्षिता ह्यात्मपतेस्त्रिवर्गं नष्टं करोत्यन्यजनानुरागात् ॥' इति। प्रीतिरपि न केवलं भूषणाच्छादनादिभिः, अपि तर्हि रत्यैव। तथा **चानुशासनिके**—

'न कामभोगान्विपुलान्नालङ्कारान्न संश्रयान्। तथैव बहुमन्यन्ते यथा रत्यामनुग्रहम् ॥' इति। तादृशरतिकरणं च दिवा निषिद्धम्, 'प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते' इति श्रुतेः। 'अहन्यसंवेशनम्' इति स्मृतेश्च।

अतो रतिं विना प्रकारान्तरेण दिवा सन्तोषजननोपायमाह मनुः— 'अर्थस्य सङ्ग्रहे चैनां व्यये चैव नियोजयेत् । शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥' इति । रात्रौ प्रीत्युत्पादनप्रकारमाह (तच्छेषे) बोधायनः— 'तस्य सह पत्न्या पूर्वरात्रावुपसंवेशनम्, अर्धरात्रादधः शयनमा ब्राह्ममुहूर्तात्' इति ॥

इत्थमलङ्करणसहशयनादिमात्रेण पुरुषापेक्षया अष्टगुणितकामयुक्तायाः स्त्रियाः न तृप्तिः कर्तुं शक्या । किन्तु शुक्लकृष्णपक्षभेदेन प्रथमादितिथिभेदेन पद्मिन्यादिजातिभेदेन च चन्द्रकलास्थानं शास्त्रतो निश्चित्य तत्तत्स्थानेषूचितक्रियया कलाद्रावणेन सन्तोषणीया । तदुक्तम्— 'प्रागेव पुंसः सुरते न यावन्नारी द्रवेद्भोगफलं न तावत् । अतो बुधैः कामकलाविदग्धैः कार्यः प्रयत्नो वनिताद्रवत्वे ॥ कामशास्त्रस्य तत्वज्ञा जायन्ते सुन्दरीप्रियाः । एतच्छास्त्रमजानन्तो रमन्ते पशुवत्स्त्रियम् ॥' इति । जातिभेदेन तिथिभेदेन च चन्द्रकला अनङ्गरङ्गे— तत्रादौ पद्मिन्याश्चन्द्रकलोच्यते— 'कण्ठे संश्लिष्य गाढं मृदुकरजचयं गण्डपाल्यां नितम्बे पृष्ठे पार्श्वोदरे वै विदधदथ रदैः खण्डयन्दन्तवासः । प्रेम्णा चुम्बन्ललाटं वपुषि च जनयन् रोमहर्षं नितान्तं सीत्कारप्रायवक्त्रां प्रतिपदि नलिनीं द्रावयेत्तां विदग्धः ॥' [अथ चित्रिण्याश्चन्द्रकला—] 'कण्ठे संपरिरभ्य बाहुलतया नाभिं लिखन्पाणिजैर्दष्ट्वा चापि रदच्छदं सपुलकं गृह्णन्नुरोजद्वयम् । कुर्वन्मन्मथमन्दिरे करिकरक्रीडायितं बुद्धिमानष्टम्यां स्मरवारिनिर्झरवतीं कुर्वीत चित्रप्रियाम् ॥' इति ॥

पराङ्मुखस्य भर्तुः पृष्ठप्रदेशं कुचाभ्यामाविद्धय आलिङ्गन्त्या नायिकाया भर्तृकृतं परावृत्ताभ्यां भुजाभ्यामालिङ्गनं विद्धकमित्युच्यते । तदपि तत्रैव— 'स्थितं पतिं मीलितनेत्रयुग्मं पश्चात्प्रविद्धयेद्वनिता कुचाभ्याम् । गृह्णात्यसौ तामपि विद्धकाख्यमालिङ्गनं तन्मुनिभिः प्रदिष्टम् ॥' इति ॥

नायिकाया ऊरुद्वयस्य नायकोरुकृतपीडनमूरूपगूढमित्युच्यते । तदुक्तं तत्रैव—'उद्दामकामोन्नमिताङ्गनाया ऊरुद्वयं स्वोरुयुगेन यत्र । आपीडयेत्कान्त उदीरितं तदूरूपगूढं परिरम्भणं हि ॥' इति ॥

समानतल्पस्थिता नायिका स्वाभिमुखं नायकं परस्पराङ्गैकतापादनाय दृढमालिङ्गति यत्तन्नीरक्षीरमित्युच्यते । तदुक्तं चानङ्गरङ्गे– 'अथैकतल्पे पतिसंमुखस्था कान्तं समालिङ्गति यत्र गाढम् । मिथः प्रवेशं कुरुतो निजाङ्गैः स्यात्क्षीरनीरं परिरम्भणं हि ॥' इति ॥

ऋजुतया स्थितस्य पत्युर्नायिकया संवेष्टयालिङ्गनं वल्लरीवेष्टितमित्युच्यते । [तदपि] तत्रैव — 'वल्लीव वृक्षं सरलाङ्गयष्टिं पतिं समालिङ्गति यत्र कान्ता । चुम्बेत रागात्कृतमन्दसीत्का प्रोक्तं बुधैर्वल्लरिवेष्टितं तत् ॥' इति ॥

उदितेष्वपि सुव्यक्तं न तासां योषितां तदा ।
विवेकः शक्य आधातुं भूषणाङ्गाम्बरस्रजाम् ॥

युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ।
समदा मदनेनैव मोहिताः काश्चिदागताः ॥

न तत्र काश्चित्प्रमदाः प्रसह्य
वीर्योपपन्नेन गुणेन लब्धाः ।
न चान्यकामापि न चान्यपूर्वा
विना वरार्हां जनकात्मजां ताम् ॥

न चाकुलीना न च हीनरूपा
नादक्षिणा नानुपचारयुक्ता ।
भार्याऽभवत्तस्य न हीनसत्वा
न चापि कान्तस्य न कामनीया ॥

बभूव बुद्धिस्तु हरीश्वरस्य
यदीदृशी राघवधर्मपत्नी ।
इमा यथा राक्षसराजभार्याः
सुजातमस्येति हि साधुबुद्धेः ॥

पुनश्च सोऽचिन्तयदार्तरूपो
ध्रुवं विशिष्टा गुणतो हि सीता ।
अथायमस्यां कृतवान्महात्मा
लङ्केश्वरः कष्टमनार्यकर्म ॥

इति नवमः सर्गः ।

अथ दशमः सर्गः ।

दशमे — तत्र सीतामनन्वेक्षमाणो हनुमान् हाटकस्फटिक-निर्मलवैडूर्यादिविविधमणिगणकिरणोत्करदेदीप्यमाने समुपस्थित-

कुमुदबान्धवबन्धुदिव्यश्वेतातपत्रे उभयपार्श्वसमवस्थितवृन्दारकसुन्दरीकरपल्लवविलसच्चामरद्वयसंवीज्यमाने विलसदशोककुसुमदामसंवीते दशाङ्गगुग्गुलुकालागरुमुखगन्धबन्धुरधूपसंचारे मृगमदघनसारसौरभनिर्भरपाटीरद्रवपूरितमणिचषकपरम्परापर्यन्ते प्रफुल्लमल्लिकामाधवीकुसुमपरिकल्पितकोमलास्तरणे शयने शयानम्—

लोहिताक्षं महाबाहुं महारजतवाससम् ।
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना ॥

क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् ।
प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् ॥

आसाद्य परमोद्विग्नः सोऽपासर्पत भीतवत् ।

अनेन राज्ञां तेज इतराभिभावकं भवतीति सूचितम् । तथा च कालिदासः— 'द्वारे नियुक्तपुरुषानुमतप्रवेशः सिंहासनान्तिकचरेण सहोपसर्पन् । तेजोभिरस्य विनिवर्तितदृष्टिपातैर्वाक्यादृते पुनरिव प्रतिवारितोऽस्मि ॥' इति ॥

राजधर्मेऽपि— 'यस्मादेषां सुरेन्द्राणां सम्भवत्यंशको नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ तपत्यादित्यवत्त्वेष चक्षूंषि च मनांसि च । न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥' इति ॥

ततो वेदिकान्तरमास्थाय तदीयविक्रमसंचितां भूतिम्,

ऐरावतविषाणाग्रैरापीडितकृतव्रणौ ।
वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥

संहतौ परिघाकारौ वृत्तौ करिकरोपमौ ।
यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥

भुजौ चालोक्य विस्मितमानसस्तद्गृहमुखान्निष्क्रम्य तत्र–

मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः ।
तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥

अङ्गहारैस्तथैवान्या कोमलैर्नृत्तशालिनी ।
विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥

काचिद्वीणां परिष्वज्य प्रसुप्ता सम्प्रकाशते ।
महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥

अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा ।
प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥

पटहं चारुसर्वाङ्गी पीड्य शेते शुभस्तनी ।
चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥

काचिद्वंशं परिष्वज्य सुप्ता कमललोचना ।
रहः प्रियतमं गृह्य सकामेव च कामिनी ॥

विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी ।
निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥

अन्या कनकसङ्काशैर्मृदुपीनैर्मनोरमैः ।
मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥

ऊर्ध्वमाचक्रमे धीमान्प्रहृष्टः कुरुनन्दनः। सोऽदर्शनपथं यातो मर्त्यानां भूमिचारिणाम् ॥ ददर्शाद्भुतरूपाणि विमानानि सहस्रशः ॥ न तत्र सूर्यः सोमो वा द्योतते न च पावकः। स्वयैव प्रभया तत्र द्योतन्ते पुण्यलब्धया ॥ ताराख्पाणि यानीह दृश्यन्ते द्युतिमन्ति वै। दीपवद्विप्रकृष्टत्वात्तनूनि सुमहान्त्यपि ॥ तानि तत्र प्रभास्वन्ति रूपवन्ति च पाण्डवः। ददर्श स्वेषु धिष्ण्येषु दीपयन्ति स्वयार्चिषा ॥ तत्र राजर्षयः सिद्धा वीराश्च निहता युधि। तपसा च जितस्वर्गाः संपेतुः शतसङ्घशः ॥ गन्धर्वाणां सहस्राणि सूर्यज्वलनतेजसाम्। गुह्यकानामृषीणां च तथैवाप्सरसां गणाः ॥ लोकानात्मप्रभान्पश्यन्फाल्गुनो विस्मयान्वितः। पप्रच्छ मातलिं प्रीत्या स चाप्येनमुवाच ह। एते सुकृतिनः पार्थ स्वेषु धिष्ण्येष्ववस्थिताः ॥ यान्दृष्टवानसि विभो तारारूपाणि भूतले।' इति ॥

ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम्।
प्रभा वर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥

व्यावृत्तकचपीनस्रक्प्रकीर्णवरभूषणाः।
पानव्यायामकालेषु निद्रापहृतचेतसः ॥

व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः।
पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ॥

अकुण्डलधराश्चान्या विच्छिन्नमृदितस्रजः।
गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥

D. 17

चन्द्रांशुकिरणाभाश्च हाराः कासांचिदुत्कटाः ।
हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥

अपरासां च वैडूर्याः कादम्बा इव पक्षिणः ।
हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥

हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ।
आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥

किङ्किणीजालसङ्काशास्ता हेमविपुलाम्बुजाः ।
भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥

मृदुष्वङ्गेषु कासांचित्कुचाग्रेषु च सुस्थिताः ।
बभूवुर्भूषणानीव शुभा भूषणराजयः ॥

अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः ।
उपर्युपरि वक्त्राणां व्याधूयन्ते पुनः पुनः ॥

ताः पताका इवोद्धूताः पत्नीनां रुचिरप्रभाः ।
नानावर्णाः सुवर्णानां वक्त्रमूलेषु रेजिरे ॥

ववल्गुश्चात्र कासांचित्कुण्डलानि शुभार्चिषाम् ।
मुखमारुतसंसर्गान्मन्दं मन्दं सुयोषिताम् ॥

शर्करासवगन्धैश्च प्रकृत्या सुरभिः सुखः ।
तासां वदननिश्वासः सिषेवे रावणं तदा ॥

रावणाननशङ्काश्च काश्चिद्रावणयोषितः ।
मुखानि स्म सपत्नीनामुपाजिघ्रन् नः पुनः ॥

अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः ।
अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥

बाहूनुपनिधायान्याः पारिहार्यविभूषितान् ।
अंशुकानि च रम्याणि प्रमदास्तत्र शिश्यिरे ॥

अन्या वक्षसि चान्यस्यास्तस्याः काश्चित्पुनर्भुजम् ।
अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा भुजौ ॥

ऊरुपार्श्वकटीपृष्ठमन्योन्यस्याः समाश्रिताः ।
परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥

अन्योन्यस्याङ्गसंस्पर्शात्प्रीयमाणाः सुमध्यमाः ।
एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ॥

अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा ।
मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥

लतानां माधवे मासि फुल्लानां वायुसेवनात् ।
अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥

व्यतिवेष्टितसुस्कन्धमन्योन्यभ्रमराकुलम् ।
आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत् ॥

अत्र रावणे अत्यन्तासक्तमनसः स्त्रियो मदपारवश्यात्परस्परं रावणं मन्यमाना अन्योन्यालिङ्गनादिभिर्द्विष्यमा(णमपि) [णा अपि]सपत्नीनां हितमेवाचरितवत्य इत्युक्तम् ॥

तच्चालिङ्गनं सुरतारम्भे कर्तव्यम् । तथा चानङ्गरङ्गे —

'मतिमानुपभोगपूर्वकं सुरतं संविदधीत कान्तया । परिरम्भणमेव पण्डितैः प्रथमं[तेषु]तच्च निगद्यतेऽष्टधा ॥' तद्भेदाश्च तत्रैव— 'वृक्षाधिरूढं तिलतण्डुलाख्यं लालाटिकं जाघनविद्धके च । ऊरूपगूढाह्वयदुग्धनीरे तच्चाष्टमं वल्लरिवेष्टितं स्यात् ॥' इति ॥

तत्र एकेन पदेन भर्तुः पदं पदान्तरेण तदूरुं चाधिरुह्य यत्परिरम्भणं तद्वृक्षाधिरूढमित्युच्यते । तथा चानङ्गरङ्गे— 'चरणकमलमेकेनाङ्घ्रिणाक्रम्य भर्तुः अपरपदसरोजेनाश्रयन्ती तदूरुम् । तरुमिव भुजवल्ल्यापीड्य चुम्बेन्नताङ्गी कथितमिह मुनीन्द्रैस्तद्धि वृक्षाधिरूढम् ॥' इति ॥

अन्योन्यविपर्यासेन भुजाभ्यां गुह्यप्रदेशे परिरम्भणं तिलतण्डुलमित्युच्यते । तदुक्तं तत्रैव— 'भुजगुह्यविपर्ययं मिथो घटयेद्यन्मिथुनं सुनिश्चलम् । तिलतण्डुलसंज्ञितं तदा परिरम्भं कथयन्ति सूरयः ॥' इति ॥

परस्परं ललाटाक्षिकपोलवक्त्रहृद्बाह्वादीनामवयवानां घट्टनेनालिङ्गनं लालाटिकमित्युच्यते । तदपि तत्रैव—'मिथो ललाटाक्षिकपोलवक्त्रहृद्बाहुवल्लीर्मिथुनं घटेत । रसातिरेकाद्यदि निस्तरंगं लालाटिकं तत्प्रवदन्ति सन्तः ॥' इति ॥

भार्यया भर्तुः श्रोणीदेशपरिरम्भणं जाघनमित्युच्यते । तदपि तत्रैव— 'जघनपरिसरस्थं श्रोणिदेशं स्वभर्तुर्निजभुजलतिकाभ्यां गाढमालिङ्ग्य रागात् । लुलितवसनकेशा चुम्बनं यत्र कुर्यात्स्फुटमिह परिरम्भं जाघनं तं वदन्ति ॥' इति ॥

अथ शङ्खिन्याश्चन्द्रकला— 'बाहुभ्यां परिरभ्य गाढमधरं दन्तैर्दशन्निर्दयं दोर्मूले खरपाणिजक्षतचयं यच्छन्व्यथेष्टं भृशम्। सङ्कुवैश्छुरितं कुचद्वयतटे नूनं तृतीयास्थलं मुक्तानङ्गजलां स्वकीयवशगां कुर्यान्नरः शङ्खिनीम्॥' इति। अथ हस्तिन्याश्चन्द्रकला— 'नयने परिचुम्ब्य कक्षयोर्नखराघातरतः स्मरालये। रचयन्करिकेलिमानयेत्स्ववशं शम्भुतिथौ द्विपाङ्गनाम्॥' इति॥

पक्षभेदेन पद्मिन्यादीनां साधारण्येन चन्द्रकलास्थानं तद्द्रावणप्रकारश्चानङ्गरङ्गे— 'सीमन्ताक्ष्यधरे कपोलगलके कक्षे कुचोरस्स्थले नाभिश्रोणिवरांगजानुविषये गुल्फे पदेऽङ्गुष्ठके। शुक्लाशुक्लविभागतो मनसिजस्तिष्ठेत्क्रमाद्योषितां वामाङ्गेष्वध ऊर्ध्वतोऽभिगमनान्मासस्य पक्षद्वये॥ सीमन्ते करजक्षतं च नयने गण्डे च संचुम्बनं दन्तेनाधरखण्डनं च नखरैः कक्षांसकण्ठान् लिखेत्। श्रोणिं चापि कचं करेण सुदृढं गृह्णीत नाभौ पुनः संदद्यात्तु चपेटकं स्मरगृहे मातङ्गलीलायितम्॥ कुर्याद्वक्षसि ताडनं च शनकैर्मुष्ट्यासकृद्बुद्धिमान् जान्वङ्गुष्ठपदेषु गुल्फविषये दौरात्म्यतो घातनम्। इत्थं चन्द्रकलाप्रदीपनपरा रागान्वितां भोगिनीं नीत्वा स्वीयवशं कुरङ्गनयनां विन्दन्ति सौख्यं परम्॥' इति। 'इति प्रसिद्धाः कतिचित्प्रदिष्टाः क्रमान्मया बाह्यरतप्रचाराः। प्रसिद्धभावा बहुशः परत्र न दर्शिता विस्तरशङ्कयैव॥' तथा च सन्निधानेऽलङ्करणाभिमतरत्याचरणादिभिः प्रीतिजननेन संरक्षणीयाः। असन्निधाने रक्षणप्रकारमाहापस्तम्बः— 'असम्भवेप्सुः परेषां स्थूलाढारिकाजीवचूर्णानि कारयित्वा उत्तरया सुप्तायाः संबाधे उपवपेत्।

सिद्ध्यर्थे बभ्रूमूत्रेण प्रक्षालयीत’ इति। तत्रानाकुला—“सम्भवो मैथुनम्। दृश्यते च ‘कामंमाविजनितोः सम्भवाम’ इति। तदभावेप्सुरसम्भवेप्सुः परेषां पुरुषाणामसम्भवमिच्छन् स्थूलाढारिकायाः सरीसृपविशेषायाः शतचरणाभिधायाः जीवन्त्याश्चूर्णानि कर्मकरैः कारयित्वा तानि चूर्णानि संबाधे उपस्थे स्वपन्त्या भार्याया उपवपेत् उत्तरया ऋचा ‘अवज्यामिव धन्वने’ इत्येतया। एवं सति संबाध उपभोगयोग्यो न भवति। ‘सिद्ध्यर्थे बभ्रूमूत्रेण प्रक्षालयीत’। सिद्ध्यर्थे कार्यसिद्ध्यर्थे उपभोगयोग्यतायामपेक्षितायां योषित इत्यर्थः। तदा बभ्रूमूत्रेण संबाधस्य प्रक्षालनं कर्तव्यम्। इदमत्र भेषजमित्यर्थः। बभ्रूः कपिलवर्णा गौः॥’

इत्थमहनि रात्रौ प्रवासे च प्रीतिजननपूर्वकतया कृते संरक्षणे च परस्परसन्तोषात्त्रिवर्गाभिवृद्धिर्भवति। तथा च मनुः—‘सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च। यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥’ इति। ‘यत्रानुकूलदाम्पत्यं त्रिवर्गस्तत्र एधते।’ इति च। एवं च उत्कृष्टधर्मभूतस्त्रीरक्षणायाभिमतरत्या प्रीतिजननं तत्तज्जात्युचितचेष्टा-[परिज्ञान]मन्तरा नेति तदर्थतया तज्जातिनिरूपणं धर्मोपयुक्तं भवत्येवेति। एवंतात्पर्येण महर्षिणा कृतं पद्मिन्यादिजातिनिरूपणं धर्मोपयुक्तं भवत्येवेति युक्तमेव॥

सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता।
शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता॥

स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ।
यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ॥

प्रध्यायत इवापश्यत्प्रदीपांस्तत्र काञ्चनान् ।
धूर्तानिव महाधूर्तैर्देवनेन पराजितान् ॥

अत्र काञ्चनस्तम्भान्निश्चलत्वेन प्रध्यायत इव स्थितान्महाधूर्तैर्द्यूते वंचितान् कृत्याकृत्यविवेकविधुरान्निश्चेष्टान्धूर्तानिव दीपानपश्यदित्युक्त्या द्यूतस्य सकलानर्थहेतुत्वमुक्तम् । तथा च कामन्दके—

'महतोऽपि क्षणान्नाशो धनस्य ह्रीविमुक्तता । निःसत्यता निष्ठुरता क्रोधो वाक्छलखण्डनम् । लोभो धर्मक्रियालोपः कर्मणामप्रवर्तनम् ॥ सत्समागमविच्छित्तिरसाद्भिः सह वर्तनम् । अर्थनाशक्रियावश्यं नित्यं वैरानुबन्धिता ॥ सत्यप्यर्थे निराशत्वमसत्यपि च साशता । प्रतिक्षणं क्रोधहर्षौ सन्तापश्च प्रतिक्षणम् ॥ प्रतिक्षणं च संक्लेशः साक्षिप्रश्नः प्रतिक्षणम् । स्नानादिगात्रसंशुद्धिपरिभोगेष्वनादरः ॥ अव्यायामोऽङ्गदौर्बल्यं शास्त्रस्याप्रत्यवेक्षणम् । गूहनं मूत्रशकृतोः क्षुत्पिपासोपपीडनम् ॥ इत्यादींस्तत्र निपुणा द्यूतदोषान्प्रचक्षते । पाण्डवो धर्मराजस्तु लोकपाल इवापरः ॥ द्यूतेन ह्यसता दीव्यन्कलत्रमपहारितः । नलश्च राजा द्यूतेन हृते राज्ये सहोदरैः ॥ धर्मदारान्वने त्यक्त्वा परकर्माकरोत्प्रभुः । तुल्यो भुवीन्द्रतुल्यस्य यस्य नास्ति धनुर्धरः ॥ स रुक्मी रुक्मशैलाभो द्यूतदोषाद्गतः क्षयम् । राजा काशिकरूशानां दन्तवक्त्रोऽपि मन्दधीः ॥ तीव्रा-

द्यूतकृताद्दोषाद्दन्तभङ्गमवाप्तवान् । द्यूतादनर्थसंरम्भो द्यूतात्स्नेहक्षये महान् ॥ पक्षाणां संहतानां च द्यूताद्भेदः प्रवर्तते । इति केवलदोषं हि द्यूतं राजा परित्यजेत् ॥' इति ॥

काञ्चनप्रदीपवरनार्याभरणरावणवारवाणप्रभाभिः प्रदीप्तामिव तां मन्वानस्तत्र विचित्रतरकुथासमासीनं निशाकरं ताराप्रकरमिव रावणमभितः समुज्ज्वलद्वरनारीसहस्रमवलोक्य—

याश्च्यवन्तेऽम्बरात्ताराः पुण्यशेषसमावृताः ।
इमास्ताः सङ्गताः कृत्स्ना इति मेने हरिस्तदा ॥

अनेन पुण्यवतां नक्षत्रलोके नक्षत्ररूपेणावस्थानम् , क्षीणे पुण्ये भूलोके सम्भवश्चोक्तः । तथा च तैत्तिरीयश्रुतौ—'सुकृतां वा एतानि ज्योतीँषि यन्नक्षत्राणि' इति ॥

मोक्षधर्मेऽपि—'व्यस्तमेकं चतुर्धा हि ब्राह्मणा आश्रमं विदुः । तं सन्तो विधिवत्प्राप्य गच्छन्ति परमां गतिम् ॥ गृहेभ्य एव निष्क्रम्य वनमन्ये समाश्रिताः । गृहमेवाभिसंश्रित्य ततोऽन्ये ब्रह्मचारिणः ॥ त एते भुवि(दिवि)दृश्यन्ते ज्योतिर्भूत्वा द्विजातयः। नक्षत्राणीव धिष्ण्येषु बहवस्तारकागणाः ॥ आनन्त्यमुपसम्प्राप्ताः सन्तोषादिति वैदिकम् । यद्यागच्छन्ति संसारं पुनर्योनिषु तादृशाः। न लिप्यन्ते पापकृत्यैः कदाचित्कर्मयोनितः ॥' इति ॥

वनपर्वण्यर्जुनं प्रति मातलिः—'(एते सुकृतिनः पार्थ स्वेषु धिष्ण्येष्ववस्थिताः । यान्दृष्टवानसि विभो तारारूपाणि भूतले ॥)

भुजपार्श्वान्तरस्थेन कक्षगेन कृशोदरी ।
पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥

डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा ।
प्रसुप्ता तरुणं वत्समुपगूह्येव भामिनी ॥

काचिदाडम्बरं नारी भुजसंयोगपीडितम् ।
कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥

कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी ।
वसन्ते पुष्पशबला मालेव परिमार्जिता ॥

पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ ।
उपगूह्याबला सुप्ता निद्राबलपराजिता ॥

अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना ।
अन्यामालिङ्ग्य सुश्रोणीं प्रसुप्ता मदविह्वला ॥

आतोद्यानि विचित्राणि परिष्वज्यापराः स्त्रियः ।
निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥

तासामेकान्तविन्यस्ते शयानां शयने शुभे ।
ददर्श रूपसम्पन्नामपरां स कपिः स्त्रियम् ॥

मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् ।
विभूषयन्तीमिव तत्स्वश्रिया भवनोत्तमम् ॥

गौरीं कनकवर्णाभामिष्टामन्तःपुरेश्वरीम् ।
कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥

स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः ।
तर्कयामास सीतेति रूपयौवनसंपदा ॥

हर्षेण महता युक्तो ननन्द हरियूथपः ।

आस्फोटयामास चुचुम्ब पुच्छं
ननन्द चिक्रीड जगौ जगाम ।
स्तम्भानरोहन्निपपात भूमौ
निदर्शयन् स्वां प्रकृतिं कपीनाम् ॥

इति दशमः सर्गः ।

अथ एकादशः सर्गः ॥

एकादशे— ततो हनूमान् परित्यज्य तादृशीं बुद्धिम्—

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी ।
न भोक्तुं नाप्यलङ्कर्तुं न पानमुपसेवितुम् ॥

नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् ।
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥

अन्येयमिति निश्चित्य पानभूमौ चचार सः ।

ततस्तत्रत्यमयूरकुक्कुटवराहवार्ध्राणसहरिणशल्यकचकोर-मांसानि, उच्चावचानि पेयानि, विविधानि भक्ष्याणि, शर्करासव-माध्वीकपुष्पासवफलासवान् , विकचकुसुमवासितानि जलानि,

अर्धभक्षितानि पक्कानि फलानि च पश्यन् मदपारवश्यांच्च परस्परमाश्लिष्य सुप्तानां स्तोकविस्रस्तवस्त्राभरणानां सुरभिचन्दनानुलिप्तकुचकलशानां नारीणां मुखपङ्कजान्यप्यवलोकयन्——

जगाम महतीं चिन्तां धर्मसाध्वसशङ्कया ।
परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ॥

इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ।
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥
अयं चात्र मया दृष्टः परदारपरिग्रहः ।

अनेन परदारावलोकनं धर्मलोपकरमित्युक्तम् । तथा च प्राचीनाः — ‘ उदर्कफलमिच्छद्भिः सद्भिर्नासौ विलोक्यते । चतुर्थीचन्द्रलेखेव परस्त्रीफालपट्टिका ॥ ’ इति ॥

इति चिन्तयतो धर्मैकतानमानसस्य आञ्जनेयस्य कार्यनिश्चयदर्शिनी पुनश्चिन्ता समजायत——

कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ।
न हि मे मनसः किञ्चिद्वैकृत्यमुपपद्यते ॥

अनेन उपभोग्यत्वबुद्ध्या परस्त्र्यवलोकनमेव दोषाधायकमित्युक्तम् । तथा च **गौतमः** — ‘ स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायाम ’ इति । वर्जयेदिति शेषः । तदिदानीं सीतां प्रमदासु शुद्धया बुद्ध्या मार्गमाणेन मया युक्ततरमेवं कृतमिति तर्कयामि ॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥

अनेन सर्वेन्द्रियाणां मन एव प्रेरकमित्युक्तम् । तथा च कामन्दके— 'विषयामिषलोभेन मनः प्रेरयतीन्द्रियम । तन्निरुन्ध्या प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ॥' इति । ज्ञानवासिष्ठेऽपि- 'मनः कृतं कृतं राम न शरीरकृतं कृतम् । येनैवालिङ्ग्यते कान्ता तेनैवालिङ्ग्यते सुता ॥' इति ॥

यस्य सत्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ।
न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥

इत्यभिधाय तामपश्यन्नेव ततोऽपक्रम्यान्यत्र विचेतुं प्राक्रमत ॥

इति एकादशः सर्गः ।

अथ द्वादशः सर्गः ॥

द्वादशे— अपक्रम्य तस्माद्देशाल्लतागृहचित्रगृहनिशागृहेषु सीतामपश्यन् पुनरेवं चिन्तयामास । नूनमियं शीलरक्षणतत्परा मैथिली निहताशेन रावणेन निहता भवेत् । यतः सुनिपुणं विचिन्वतोऽपि मम दर्शनपथं नावतरति । अथवा, अतिविकृतनिशाचरीदर्शनजनितभयेन विनष्टा भवेत् । अहमिह सर्वथा विफलपरिश्रमोऽस्मि । तदिदानीमनवलोक्य जनकतनयाम्, अनवाप्य च पौरुषम्, अङ्गदजाम्बवत्प्रमुखवलीमुखयूथपमुखावलोकनात्सुतीक्ष्णकोपस्य सुग्रीवस्य समीपगमनाच्चातिक्रान्तकालस्य मम वरं प्रायोपवेशनम् । अथवावशिष्टप्रदेशानुत्साहमवलम्ब्य विचिनोमि ॥

उदीरितोऽसौ । यद्येतदेवाभिमुखं प्रयुञ्ज्यात्तदा बुधा मण्डलकं वदन्ति ॥' इति । मूर्धोरुगुह्यकुचदेशेषु द्वित्र्यंगुलादधिकपरिमाणं रेखाद्वयं तरुणमित्युच्यते । तदपि तत्रैव— 'द्वित्र्यङ्गुलादधिक एव नखप्रहारो मूर्धोरुगुह्यकुचदेशसमर्पितो यः । रेखाद्वयं मदनकेलिकलाविदग्धाः प्राहुस्तदेव तरुणं हि नवत्रपाढ्यम् ॥' इति । चूचुकाग्रे अङ्गुष्ठमाधाय अधःप्रदेशे सर्वनखैः कृतं क्षतं मयूरपादम् । सर्वनखैः कुचाग्रे क्रियमाणं शाशमित्युच्यते । तथा चानङ्गरङ्गे— 'रेखा कृता सर्वनखैरधस्तादङ्गुष्ठमाधाय तु चूचुके या । मयूरपादं किल तां वदन्ति शाशं तु तां सर्वनखैः कुचाग्रे ॥' इति । कुचगुह्यपृष्ठेषूत्पलपत्राकृतितया क्रियमाणं रेखात्रयं उत्पलपत्रमित्युच्यते । तच्च तत्रैव— 'रेखात्रयं पृष्ठकुचेऽथ गुह्ये कृतं भवेदुत्पलपत्रवद्यत । अन्वर्थसंज्ञं प्रवदन्ति ताद्धि भर्तुः[स्मर्तुं] प्रवासावसरे दिशन्ति ॥' इति ॥

नखक्षतस्य देशकालावुक्तावनङ्गरङ्गे— 'ग्रीवाकरोरुजघनस्तनपृष्ठकक्षहृत्पार्श्वगण्डविषये नखराः खराः स्युः । माने नवीनसुरते विरहे प्रवासे द्रव्यक्षये च विरतौ च सदा प्रयोज्याः ॥' इति । नखलक्षणमपि तत्रैव— 'नीरस्यता निर्मलतोज्ज्वलत्वं वर्धिष्णुता च स्फुरितत्वमेव । अमार्दवं चेति गुणा नखानां बुधैः षडुक्ताः सुरतप्रसङ्गे ॥' इति ॥

परस्परानुरागाय दन्तक्षतस्य स्थलविशेषे कर्तव्यतां दर्शयति स एव— 'चुम्बप्रदेशेषु रदा विधेयाः प्रष्ठाननान्तर्जघनानि हित्वा ।' इति । क्षते प्रशस्तान्दन्तांश्चाह स एव— 'दन्ताः प्रशस्ता अतिखर्वरूक्षाः करालबाह्या मलिनाश्च निन्द्याः ।' इति ॥

तत्र दन्तक्षतं सप्तविधम्— गूढकम्, उत्सूनकम्, प्रवाल-मणिः, [बिन्दुः]तिलबिन्दुः, उन्मण्डनम्, क्रोडचक्रं चेति। तत्र व्रणं विनैव लौहित्यमात्रापादकं दन्तक्षतं गूढकम्। गण्डाधरयोर्व्यक्तरेखं दन्तपीडनमुत्सूनकमित्युच्यते। (तथा)चानङ्गरङ्गे— 'अधरस्थितरागमात्रकं रद[लेख्यं]रेखं किल गूढकं विदुः। रदनच्छदगण्डपीडनादिदमुत्सूनकमुच्यते बुधैः॥' इति। क्षतपीडनादिकं विनैव दन्तोष्ठसंयोगः प्रवाळमणिरित्युच्यते। तथा चानङ्गरङ्गे— 'दन्तोष्ठयोर्योगविशेषसाध्यः प्रवाळपूर्वो मणिरेवमुक्तः। अभ्यासयोगेन च दंपतिभ्यां संसाध्यते नान्यविनोदतस्तु॥' इति। ललाटाधरयोः कामिनीदन्तद्वयकृतं क्षतं बिन्दुः। सर्वदन्तैः कृतं तिलबिन्दुरित्युच्यते। तथा चानङ्गरङ्गे— 'अधरे तिलके च कामिनीरदयुग्मेन विडम्बने [विखण्डने] कृते। रति [इति] बिन्दुरुदीरितोऽखिलैर्दशनैः स्यात्तिलबिन्दुनामकः॥' इति। कपोलवक्षोगलफालदेशेषु दशनाग्रलेख्यमुन्मण्डनमित्युच्यते। तथा चानङ्गरङ्गे— 'कपोलवक्षोगलफालदेशे गण्डस्थले स्याद्दशनाग्रलेख्यम्। उन्मण्डनं स्याद्धि तदङ्गनानामङ्गेषु शोभां लभते नितान्तम्॥' इति। भर्त्रा स्वप्रस्थानसमये स्वस्मृत्यर्थंतया कान्ताशरीरे कृतमखर्वसान्द्रदशनक्षतं क्रोडचक्रमित्युच्यते। तदुक्तमनङ्गरङ्गे— 'अखर्वसान्द्रा दशनावली या कान्ताशरीरे क्रियते स्वभर्त्रा। प्रस्थानकाले स्मृतिहेतु पश्चात्तत्क्रोडचक्रं प्रवदन्ति तज्ज्ञाः॥' इति। अत्यन्तमधुरशर्कराविकारे फाणिताभिधे कटुमरीचिचूर्णप्रक्षेपवत्, इतरकाले क्लेशकरमपि नखदन्तक्षतादिकं रतिकाले प्रयुक्तं सुखकरमित्युक्तं श्रीहर्षेण-

'अस्तभावमधिगच्छतोस्तयोः संमदेषु करजव्रणार्पणा । फाणितेषु मरिचावचूर्णना सा स्फुटं कटुरपि स्पृहावहा ॥' इति ॥

ततः कृत्रिमदीर्घिकाः सौवर्णवितर्दिवेदिकाः फलभर-नमितान्वृक्षविशेषांश्चावलोकयन्—

ददर्श हरिशार्दूलो रम्यं जगति पर्वतम् ।
ददर्श च नगात्तस्मान्नदीं निपतितां कपिः ॥

अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ।
जले निपतिताग्रैश्च पादपैरुपशोभिताम् ॥

वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः ।
पुनरावृत्ततोयां च ददर्श स महाकपिः ॥

प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ।

अत्र कोपेन नायकं परित्यज्य गच्छन्ती बन्धुकृतप्रसाद-नेन प्रसन्ना कलहान्तरितैव नायिका दृष्टान्तत्वेनोक्ता । तल्लक्षणं च प्रतापरुद्रीये— 'कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता । कलहान्तरिता ज्ञेया सदा सुलभकोपना ॥' इति ॥

सा च त्रिविधा— स्वीया परकीया सामान्या चेति । तत्र स्वीयापि त्रिविधा—मुग्धा, मध्यमा, प्रगल्भा, चेति । तल्लक्षणमपि प्रतापरुद्रीये— 'उदययौवना मुग्धा लज्जा-विजितमन्मथा । लज्जामन्मथमध्यस्था मध्यमोदितयौवना ॥ स्मरमन्दीकृतव्रीडा प्रौढा संपूर्णयौवना ।' इति । मुग्धायाः कलहान्तरितायाश्चेष्टा रसमञ्जर्याम्— 'अनुनयति पतिं न

लज्जमाना कथयति नापि सखीजनाय किंचित् । प्रसरति मलयानिलेन वोढा वहति परं तु चिराय शून्यमन्तः ॥' इति । मध्यमायाः कलहान्तरितायाश्चेष्टा च— 'विरमति कथनं विना न खेदः सति कथने समुपैति कापि लज्जा । इति कलहमधोमुखी सखीभ्यो लपितुमनालपितुं समाचकांक्ष ॥' इति । प्रगल्भायाः कलहान्तरितायाश्चेष्टापि— 'अकरोः किमु नेत्रशोणिमानं किमकार्षीः करपल्लवावरोधम् । कलहं किमधाः क्रुधा रसज्ञे हितमर्थं न विदन्ति दैवदुष्टाः ॥' इति ॥

परकीया कलहान्तरिता यथा— 'भर्ता यस्य कृते गुरुर्लघुरभूद्गोष्ठी कनिष्ठीकृता धैर्यं कोशगृहं गतं सहचरी नीतिः कृता दूरतः । निर्मुक्ता तृणवत्त्रपा परिचिता स्रोतस्विनी विन्दुवत्स क्रोधादवधीरितो हतधिया मातर्बलीयान्विधिः ॥' इति ॥

सामान्या कलहान्तरिता यथा— 'यत्पंकेरुहलक्ष्म पाणिकमले भाग्यालये यद्गुरुर्यस्तं(?) वा मम यल्ललाटफलके भाग्याक्षरं वेधसा । तत्सर्वं सखि यो यथार्थमकरोत्तस्मिन्प्रकोपः कृतो धिक्मां धिङ्मम जीवितं धिगतनुं धिक् चेष्टितं धिग्वयः ॥' इति । समाधानप्रकारश्च रघुवंशे— 'त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः । परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥' इति । रसतरंगिण्यामपि— "ग्रामेऽस्मिन्मदनाधिकोज्ज्वलतनुर्वाग्मी वलद्भूषणोदारो मन्मथशास्त्रतन्त्रविभवज्ञानी स्थितः कः पुमान् । इत्येवं स्वसखीजनेन कथनात्संबोधिता कामिनी तं पश्यामि कदेति तत्परवशा मार्गे पुनर्वर्तते ॥' इति ॥

वनपर्वण्यपि— 'ततस्तु याते वार्ष्णेये पुण्यश्लोकस्य दीव्यतः । पुष्करेण हृतं राज्यं यच्चान्यद्वसु किंचन ।। शिष्टा ते दमयन्त्येका सर्वमन्यज्जितं मया । उत्सृज्य सर्वगात्रेभ्यो भूषणानि महायशाः ।। एकवासा ह्यसंवीतः सुहृच्छोकविवर्धनः । निश्चक्राम ततो राजा त्यक्त्वा सुविपुलां श्रियम ।। ' इति ।।

सभापर्वण्यपि धर्मपुत्रं प्रति शकुनिः— 'गवाश्वं बहुधेनूकमपर्यन्तमजाविकम् । गजाः कोशो हिरण्यं च दासीदासाश्च [सर्व च] सर्वशः ।। एष नो ग्लह एवैको वनवासाय पाण्डवाः । यूयं वयं वा विजिता वसेम वनमाश्रिताः ।। त्रयोदशं च वै वर्षमज्ञाताः स्वजनैस्तथा । अनेन व्यवसायेन दीव्याम पुरुषर्षभ ।। प्रतिजग्राह तं पार्थः ग्लहं जग्राह सौबलः । जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम् । अजिनैः संवृतान् दृष्ट्वा हृतराज्यानरिन्दमान् । प्रस्थितान्वनवासाय ततो दुःशासनोऽब्रवीत् ।। ' इति ।।

निर्धूतकेशी युवतिर्यथा मृदितवर्णिका ।
निष्पीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ।।

तथा लांगूलहस्तैश्च चरणाभ्यां च मर्दिता ।
बभूवाशोकवनिका प्रभग्नवरपादपा ।।

अत्र हनूमत्संचरणेन मर्दिताया अशोकवनिकाया वर्णनार्थतया दृष्टान्तत्वेनोपात्ताया उपभुक्तनायिकाया लुलितकेशत्वादिप्रतिपादनादुपभोगसमये नायिकानायकयोः परस्परा-

नुरागसिद्धयै केशग्रहणालिङ्गनचुम्बननखक्षतदन्तक्षतादिकं कर्तव्य-मिति सूचितम् ॥

तत्र केशग्रहणमुक्तमनङ्गरङ्गे— 'स्निग्धा घनाः कुंचित-नीलवर्णाः केशाः प्रशस्तास्तरुणीजनानाम् । रागप्रवृद्धयै विधिनैव मन्दं ग्राह्या नरैश्चुम्बनदानकाले ॥' इति । केशग्रहणविधिश्च चतुर्विधः, समहस्तकरताङ्गवज्रकभुजङ्गवल्लिकाकामावतंसभेदात्। तत्र नायिकाचुम्बनार्थं कराभ्यां नायककृतं चिकुरग्रहणं समहस्तकम् । तदेव एकहस्तेन कृतं रताङ्गवज्रकमित्युच्यते । तथा चानङ्गरङ्गे- 'चिकुरान्परिकृष्य चुम्बते करयुग्मेन पतिः प्रियां यदि । समहस्त-कमित्यथैकतो यदि हस्तेन रताङ्गवज्रकम् ॥' इति । रतिसमये संवेष्टय केशग्रहणं भुजङ्गवल्लिकेत्युच्यते । तदप्यनङ्गरङ्गे— 'परिवेष्टय करेण कुन्तलान्मदनार्तो यदि धारयेत्प्रियाम् । रतिकेलिकलापको-विदाः कथयन्तीह भुजङ्गवल्लिकाम् ॥' इति । रतिप्रारम्भे परस्पर-चुम्बनाय परस्परालकग्रहणं कामावतंस इत्युच्यते । तथा चानङ्गरङ्गे— 'कर्णप्रदेशस्थकचान्निगृह्य परस्परं चुम्बति यत्र नारी । पतिश्च रागात्सुरतावतारे कामावतंसस्य कचग्रहः स्यात् ॥' इति ॥

रत्यर्थतया परिरम्भानन्तरकर्तव्यचुम्बनप्रदेशानाह अन-ङ्गरङ्गे— 'अधराक्षिकपोलमस्तकं वदनान्तःस्तनयुग्मकन्धरम् । विहितानि पदानि पण्डितैः परिरम्भादनु चुम्बनस्य हि ॥' इति ॥

तच्च चुम्बनं नवविधम्—निमितम्, स्फुरितम्, घट्टितकम्, तिर्यक्, उत्तरोष्ठम्, पीडितम्, अनुवक्त्रम्, संपुटम्, प्रतिबोधम्,

समोष्ठं चेति । तत्र कोपाच्चुम्बनमनङ्गीकुर्वत्याः कान्तायाः बलात्कृतं चुम्बनं निमितमित्युच्यते । तथा चानङ्गरङ्गे—
'नारीमुखान्ते वदनं स्वकीयं समानयेद्यत्र बलेन कान्तः । सा नैव चुम्बेदतिकोपयुक्ता स्याच्चुम्बनं तन्निमिताभिधानम् ॥' इति । कान्तपरिचुम्बिताधरा नायिका कान्तस्य मुखे स्वमुखं निवेशयति, स्वयं न चुम्बति, तत्स्फुरितमित्युच्यते । तदपि तत्रैव— 'दयितस्य निवेश्य वक्त्रके निजवक्त्रं परिचुम्बिताधरम् । न पिबेदबला तदाननं स्फुरिताख्यं परिचुम्बनं तदा ॥' इति । यत्र कान्ता स्वकरपल्लवेन दयितलोचनयुगलमाच्छाद्य स्वजिह्वां कान्तानने प्रवेश्य चुम्बति, तत् घण्टिकमित्युच्यते । तदपि तत्रैव— 'करेण कान्तस्य निमील्य नेत्रे जिह्वां मुखान्तर्विनिधाय यत्र । चुम्बेद्विलोला तरलायताक्षी तद्घण्टिकाख्यं कवयो वदन्ति ॥' इति । पश्चादवस्थितो नायकः कान्ताचुबुकं करेण परिगृह्य साचीकृतवदनो यत्र चुम्बति, तत्तिर्यगित्युच्यते । तदपि तत्रैव—'करेण कान्ताचुबुकं गृहीत्वा दशेत्पतिः पश्चिमभागवर्ती । प्रियाधरं यत्र तु तिर्यगाख्यं प्रोक्तं कवीन्द्रैः खलु चुम्बनं तत् ॥' इति । यत्र कान्ता मदनार्त्या कान्तस्याधरं चुम्बति, तदानीं कान्तकृततदीयोत्तरोष्ठचुम्बनं उत्तरोष्ठमित्युच्यते । तदपि तत्रैव— 'दन्तैर्गृहीत्वा मदनातिलोलाधरं विचुम्ब्याशु दशेत्स्वभर्तुः । कान्तस्तदीयं कथितं मुनीन्द्रैरित्युत्तरोष्ठं परिचुम्बनं हि ॥' इति । कान्ता यत्र कान्तस्याधरं संपुटितकराङ्गुलीभिर्गृहीत्वा चुम्बति, तत्पीडितमित्युच्यते । तदपि तत्रैव— 'आदाय दन्तच्छदमाशु पत्युः कराङ्गुलीसंपुटकेन नारी । जिह्वाग्रदेशेन धयेद्दशेच्च तच्चुम्बनं पीडितसंज्ञितं स्यात् ॥' इति । पुटिताधरेण कान्तेन चुम्बिताधरा कान्ता स्वाधरसंपुटेन तमपि

यत्र चुम्बति, तदनुवक्त्रम , संपुटम् , केलिजिह्वाननजं प्रोच्यते। तच्च तत्रैव— 'प्रियाधरं स्वाधरसंपुटेन पिबेत्पतिः सापि तथैव भर्तुः। तत्संपुटाख्यं त्वनुवक्त्रसंज्ञं स्यात्केलिजिह्वाननजं तदेव ॥' इति। चिरं सम्प्राप्तनिद्रां कान्तां प्रतिबोधयितुं गतः कान्तो यत्र चिरं चुम्बति तत्प्रतिबोधमित्युच्यते। तच्च तत्रैव— 'सम्प्राप्तनिद्रां रहसि स्वकान्तां चिरं गतश्चुम्बति यत्र भर्ता। प्रोक्तं कवीन्द्रैः प्रतिबोधसंज्ञं तच्चुम्बनं सर्वरसातिरेकम् ॥' इति। कान्तस्य ओष्ठयोर्जिह्वायां च स्वकीयोष्ठौ जिह्वां च निवेश्य यत्र चुम्बति तत्समोष्ठमित्युच्यते। तच्च तत्रैव— 'अधरोष्ठयुगेन कामिनी पतिवक्त्रोष्ठयुगं स्वजिह्वया। परिपीड्य विचुम्ब्य नृत्यती कथितं तद्धि समोष्ठसंज्ञितम् ॥' इति ॥

कामिनीनामतिसौख्यावहं नखक्षतं सुरतसमये कर्तव्यमित्युक्तमनङ्गरङ्गे— 'नखं प्रयुक्तं प्रणयाद्रसज्ञैर्यदेतदेवास्ति मनोभवस्य। सर्वस्वमन्यत्तु सुखस्य हेतुर्नातोऽस्ति किंचिद्वरकामिनीनाम् ॥' इति ॥

तच्च सप्तविधम्— क्षुरितम् , अर्धचन्द्रम् , मण्डलकम् , तरुणम् , मयूरपादम , शशपादम्, उत्पलपत्रं चेति। तत्र गण्डकुचान्तरेषु संपूर्णनखविलेखनं क्षुरितमित्युच्यते। तथा चानङ्गरङ्गे— 'अव्यक्तरेखं कृतरोमहर्षं समर्पितं गण्डकुचान्तरेषु। यत्कर्म संपूर्णनखप्रभूतं विज्ञास्तदेव क्षुरितं वदन्ति ॥' इति। ग्रीवाकुचे वक्रनखक्षतं अर्धचन्द्रम। पुनस्तदभिमुखप्रयुक्तं मण्डलकमित्युच्यते। तथा च तत्रैव— 'ग्रीवाकुचे वक्रनखप्रहारो दत्तोऽर्धचन्द्राख्य

अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥

इति द्वादशः सर्गः ।

अथ त्रयोदशः सर्गः ॥

त्रयोदशे—ततो हनूमानपनुद्य विषादम्, अवरुह्य विमानाद्भूयोऽपि लङ्कानिलयानखिलानालयानवलोकयन् सीतामनवलोक्य पुनश्चिन्तां ततान । सम्पातिवचनादुल्लङ्घ्य जलधिमुपगतेन सर्वशः सुनिपुणं विचिन्वता क्वचिदपि नालोक्यते सीता । अतो मन्ये सत्वरमुदन्वदुल्लङ्घनमाचरतो रावणस्याङ्कतो मध्येसमुद्रं निपतिता । अथवा, निरालम्बेऽम्बरे निशाचरेण नीयमानया तत्कृतभुजनिपीडनमसहमानया तया जीवितं परित्यक्तं भवेत् । तदधुना कथमिममुदन्तं रघुनन्दनाय निवेदयामि ॥

निवेद्यमाने दोषः स्याद्दोषः स्यादनिवेदने ।
कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥

अत्र निवेदने दोषः समनन्तरं वक्ष्यमाणः सर्वविनाशरूपः, स्वामिकार्यस्य वृत्तस्यानिवेदने पापं भवतीति सूचितम् । तथा **चानुशासनिके**— 'कृत्वानाचक्षतः कर्म कर्म यच्च त्वया कृतम् । (?) तेनैव हि भवेयुस्ते लोकाः पापकृतो यथा ॥' इति ॥

कथं वा व्यर्थीकृतार्णवोल्लङ्घनश्रमस्य पुनः प्रतिनिवृत्तस्य मम मुखादिमं वृत्तमाकर्ण्य सुकुमारौ राजकुमारौ जीवितं न

हास्यतः । तदाकर्ण्य भरतशत्रुघ्नसुमित्राकौसल्यादयो नागरिकाः सुग्रीवप्रमुखाश्च वानरास्ताररुमादिमा वानरनायिकाश्च ॥

कुमारोऽप्यङ्गदः कस्माद्धारयिष्यति जीवितम् ।
भर्तृजेन तु दुःखेन ह्यभिभूता वनौकसः ।
शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥

सान्त्वेनानुप्रदानेन मानेन च यशस्विना ।
लालिताः कपिराजेन प्राणांस्त्यक्ष्यन्ति वानराः ॥

अनेन प्रभुणा पालितैः सेवकैः स्वाम्यर्थे प्राणत्यागपर्यन्तं यतितव्यमिति सूचितम् । तथा च **मन्त्रवर्णः**— 'क स्या वो मरुतः स्वधासीत् । यन्मामेकं समधत्ताहिहत्ये ।' इति । **अस्यार्थः**— वः युष्मभ्यं दत्ता स्या सा स्वधा अन्नं कासीत् । यद्यस्मात् मामेकं अहिहत्ये वृत्रवधार्थे सङ्ग्रामे समधत्त संघटितवन्त इति । अत्र तात्पर्यमत्या उक्तार्थो बोध्यः । **वनपर्वण्यपि**— 'अवश्यं राजपिण्डस्तैर्निर्वेश्य इति मे मतिः । यस्मात्त्यक्ष्यन्ति सङ्ग्रामे प्राणानपि सुदुस्त्यजान् ॥' इति । अतः प्रतिनिवृत्ते मयि काकुत्स्थवानरकुलनाशो निरसंशयं भविता । सोऽहमिहैव परिमितकन्दमूलफलाहारः प्राणान् संधार्य सुचिरं तिष्ठामि ॥

विनाशे बहवो दोषा जीवन् भद्राणि पश्यति ।
तस्मात्प्राणान्धरिष्यामि ध्रुवो जीवति संगमः ॥

अत्र बुद्धिपूर्वं प्राणत्यागे प्रत्यवायः । जीवतश्च श्रेयो भवतीत्युक्तम् । तथा **चादिपर्वणि** और्वे— 'आत्महा च पुमांस्तात न लोकांल्लभते शुभान् । ततोऽस्माभिः समीक्ष्यैव नात्म-

नात्मा निपातितः ॥' इति । जीवतः श्रेयो भवति इत्येतदाप-द्धर्मे मार्जारं प्रति मूषिकः— 'द्रव्याणि सन्ततिश्चैवं सर्वं भवति जीवतः ।' इति । तत्रैव विश्वामित्रोपाख्याने— 'सर्वोपायैरुपायज्ञो दीनमात्मानमुद्धरेत् । एतां बुद्धिं समास्थाय जीवितव्यं सदा भवेत् ॥' इति ॥

इति दुरन्ताचिन्तार्णवावगाहनेन व्याकुलमतिर्मारुतिः सकलश्रमापनोदनचतुरायामशोकवनिकायां निर्विघ्नं सीतां विचेतुमिष्टदेवतानमस्कारमकरोत्—

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥

ब्रह्मा स्वयम्भूर्भगवान्देवाश्चैव दिशन्तु मे ।
सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रधृक् ॥

वरुणः पाशहस्तश्च सोमादित्यौ तथैव च ।
अश्विनौ च महात्मानौ मरुतः शर्व एव च ॥

सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ।
दास्यन्ति मम ये चान्ये ह्यदृष्टाः पथि गोचराः ॥

इति त्रयोदशः सर्गः ।

अथ चतुर्दशः सर्गः ॥

चतुर्दशे—इत्यभिसन्धाय मुहूर्तमभीष्टदेवतां सीतां च मनसा संस्मरन्सकलजीवलोकहृदयानन्दकरेण वसन्तसमयेन विजृम्भमाणतरुणारुणप्रवालकुसुमप्रकरैरुन्मदकोकिलकुलवाचालितै-श्चम्पकपरागपुञ्जपिञ्जरितप्रान्तैः पादपैरुपशोभिताम्, अशोक-चम्पकसालोद्दालकचूतनागपुन्नागैश्च समावृतां निष्टप्तकनकमयतरुनि-करप्रभाप्रकाशिततया समुदयदरुणकिरणारुणितामिव शोभमानां विहङ्गकुरङ्गमृगसङ्घसमाकुलतया विचित्रितामिव संलक्ष्यमाणां तामनुप्राविशत्। स्वानुप्रवेशसंक्षुभितसुप्तोत्थितशुकपिकादिखगोत्पत-नसमयसमाहततरुशिखरविसृत्वराविकचकुसुमनिरन्तरशरीरम् —

दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ।

तेन च पवनसमानवेगेन कम्पिताः—

निर्धूतपत्रशिखराः शीर्णपुष्पफला द्रुमाः ।
निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥

अनेन अक्षद्यूतासक्तस्य सर्वस्वापहारो भवति इति सूचितम्। अत एव महात्मनोऽपि धर्मपुत्रस्य सर्वैश्वर्यविनाशः। **सभापर्वणि**— 'यच्चैषां द्रविणं किंचिद्या चैषां ये च पाण्डवाः। सौबलेन ह तत्सर्वं धर्मेण विजितं वसु ॥ पाण्डवानां च वासांसि द्रौपद्याश्चाप्युपाहर। तच्छ्रुत्वा पाण्डवास्सर्वे स्वानि वासांसि भारत। अवकीर्योत्तरीयाणि सभायां समुपाविशन्॥' इति ॥

अथ ससम्भ्रममितस्ततः परिभ्रमन्नभ्रंकषविटपनिबिडितगहनप्रपञ्चां मन्दमारुतान्दोलितस्कन्धावबद्धकाञ्चनकिङ्किणीशतसन्नादिततया अशोकतरुताडनरणितरमणीयतररमणीमणिमणिनूपुरप्रकरसहस्रमुखरितामिव शोभमानां विकसन्मुकुलपरिमलपुञ्जितालिजालझंकारसुभगामविरलकुसुमधूलिवालुकापुलिनधवलितधरातलां विकचकुसुमपुञ्जपातसूचितवनदेवतालताप्रेंखोलनां विसृत्वरप्रभापिञ्जरितप्रान्ततया काञ्चनमहीमिव तत्प्रदेशान्कुर्वतीं काञ्चन काञ्चनमयीं शिंशुपामवलोकयामास । आरुह्य च तामितस्ततो दत्तदृष्टिः पुनरप्येवं चिन्तां ततान पवनतनयः—नूनं प्रियवियोगमसहमाना जानकी मनोविनोदनाय चम्पकचन्दन[वकुल] वनभूषितामशोकवनिकां कारण्डवचक्रवाकसहस्रसमाकुलां विकचकमलकुवलयामोदमेदुरितजलां नलिनीम्—

सन्ध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी ।
नदीं चैनां शिवजलां सन्ध्यार्थे वरवर्णिनी ॥

नन्वत्र सीता सन्ध्योपासनायागमिष्यतीत्युक्तम् ; तदसङ्गतम् । सन्ध्या तावदर्घ्यप्रदानगायत्रीजपादित्योपस्थानात्मिका । गायत्र्यादिसन्ध्यामन्त्राश्च अधीता एव कर्मणि विनियोक्तव्याः । अध्ययनं च उपनीतेन माणवकेन गुरुकुलवासभिक्षाचरणादिनियमपूर्वकमेव कर्तव्यम् । उपनयनादिकं च 'अष्टवर्षं ब्राह्मणमुपनयीत' 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिशास्त्रात् पुंसामेवावगम्यते । सन्ध्योपासनादिकमपि, 'सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च' 'अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम् । सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ॥' इत्यादिसन्ध्योपासनादिविधिषु,

'उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः । आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥' इत्याचार्यकर्तृकशिक्षणविधिषु[च] पुल्लिङ्गनिर्देशेन पुंसामेवावगम्यते न तु स्त्रीणाम् । किं च 'न स्त्रीशूद्रौ वेदमधीयाताम्' इति स्त्रीणामध्ययनं साक्षादेव प्रतिषिद्धम् । एवं च उपनयनाध्ययनसंध्योपासनरहितानां स्त्रीणामधिकाराभावेन सीतायाः कथं सन्ध्योपासनमुक्तमिति चेत्— न ।

पूर्वोदाहृतोपनयनसन्ध्योपासनमन्त्राध्ययनविधिभिः पुल्लिङ्गनिर्देशेन स्त्रीणां प्राप्त्यभावेऽपि युगभेदेन सन्ध्योपासनप्रापकप्रमाणान्तरेण सन्ध्योपासनादेः प्राप्तिसम्भवात् । तथा च यमः– 'पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते । अध्यापनं च वेदानां सावित्रीवचनं तथा ॥ पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः । स्वगृहे चैव कन्यायाः भैक्षचर्यं विधीयते ॥ वर्जयेदजिनं चीरं जटाधारणमेव च ॥' इति ॥

न केवलं स्त्रीणामध्ययनम्, अपि तर्हि, अपूर्वमन्त्रद्रष्टृत्वरूपं ऋषित्वमपि । [तच्च]शाकलसंहितानुक्रमणिकापरिभाषायाम्– 'अथर्षयः शतर्चिन आद्ये मण्डले' इत्यधिकृत्य, 'गोधा घोषा विश्ववारा अपालोपनिषन्निषत् । ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः । इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ॥ लोपामुद्रा च नद्यश्च यमी नारी च शाश्वती । श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा ॥ रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ।' इति गोधाघोषादीनां ब्रह्मवादिनीनां

ऋषित्वेन परिगणनात्। ऋषित्वं च मन्त्रोच्चारयितृत्वमेवेति तत्रैव प्रतिपादितम्— 'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता' इति। उदाहृतं च— 'अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्सङ्ख्याऋषिदैवतच्छन्दांस्यनुक्रमिष्यामः' इत्युपक्रम्य 'सत्येन सप्तचत्वारिंशत्सावित्री सूर्यात्मदैवतं आनुष्टुभम्। पञ्चभिः सोममस्तौत्पराभिः स्वविवाहं सप्तदश्या देवान्परयाग्नि सोमार्कौ परया चन्द्रमसं परया नृणां विवाहं मन्त्रा आशीःप्राया उदीर्ष्वेति द्वाभ्यां देवगन्धर्वविश्वावसून् तुष्टाव' इत्यादि। अत्र सत्येनेति सूक्तप्रतीकम्। सप्तचत्वारिंशदिति ऋक्सङ्ख्या। सावित्रीति ऋषिः। सूर्यात्मदैवतमिति देवता। आनुष्टुभमिति छन्दः। तत्र च ऋषिः सावित्री पञ्चभिः सोमं पराभिः ऋग्भिः स्वविवाहम् इति अपूर्वतया स्वदृष्टैर्मन्त्रैः विभज्य सोमादीनां स्तुतिं कृतवतीति प्रतिपादनादपूर्वमन्त्रद्रष्टृत्वरूपं ऋषित्वमुक्तम्। न चैतत्स्त्रीणां मन्त्रानधिकारे सूर्यासावित्र्योर्युज्यते। तथा छन्दोगानामार्षेयब्राह्मणेऽपि— 'इन्द्राण्याः साम इन्द्राण्याश्चैव साम' इति स्त्रिया इन्द्राण्या ऋषित्वं प्रतिपादितम्। अत एव स्त्रीणां ब्रह्मवादिनीनां ब्रह्मविद्याग्रहणोपदेशसंवादादिकं बृहदारण्यके अवगम्यते— 'अथ ह गार्गी वाचक्नवी पप्रच्छ' इत्यादौ। न चैवं सति पूर्वोदाहृतोपनयनाध्ययनादिप्रतिषेधपर्यवसायिवचनानां का गतिरिति वाच्यम्। तेषां वचनानां सद्योवधूविषयत्वात्। तथाहि—

स्त्रियो द्विविधाः— ब्रह्मवादिन्यः सद्योवध्वश्चेति। तत्र ब्रह्मवादिनीनामुपनयनवेदाध्ययनादिकमस्त्येव। सद्योवधूनां तु अध्ययनाद्यभावः। तथा च हारीतः— 'द्विविधाः स्त्रियो

ब्रह्मवादिन्यः सद्योवध्वश्चेति । तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्येति । सद्योवधूनामुपनते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्यः' इति । एतदभिप्रायेणैव याज्ञवल्क्यभार्याद्वैविध्यमुक्तं बृहदारण्यके— 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च । तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव । स्त्रीप्रज्ञैव तर्हि कात्यायनी ।' इति ॥

सद्योवधूनामपि अध्ययननिषेधः न सर्वमन्त्राध्ययनविषयः । किं तु कर्मानुपयुक्तमन्त्राध्ययनविषयः । अन्यथा 'अथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयमिति निनीय मुखं विमृज्योत्तिष्ठति । पुष्टिमती पशुमती प्रजावती गृहमेधिनी भूयासमिति उदकमुदुक्ष(न्तुदुक्ष)न्ती वाचयति' इत्यादिविधिबाधापत्तेः । अत एव तालवृन्तनिवासिना कर्मोपयुक्तमन्त्राध्ययनमुक्तम्— 'प्रागग्न्याधेयात् कर्माङ्गमन्त्राध्ययनम्' इति ॥

एतदप्यध्ययनमुपनयनसापे(क्षित)[क्ष]मिति कृत्वैव उपनयनस्थानापन्नो विवाह इत्युक्तं मनुना— 'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः ।' इति । हारीतस्त्वाह— 'सद्योवधूनामुपनते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्यः' इति । अत्र कथंचिदित्यनेन विवाहप्राक्कालीनमुपनयनममन्त्रकमित्यवगम्यते । विवाहप्राक्कालीनसंस्काराणाममन्त्रकत्वं मनुराह— 'अमन्त्रका तु कार्येयं स्त्रीणामावृदशेषतः । संस्कारार्थं[थं शरीरस्य] मशेषस्य यथाकालं यथाक्रमम् ॥ वैवाहिको विधिः स्त्रीणां संस्कारो

राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ।
वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव ॥

चन्द्रलेखां पयोदान्ते शारदाभ्रैरिवावृताम् ।
क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ॥

सीतां भर्तृवशे युक्तामयुक्तां राक्षसीवशे ।
अशोकवनिकामध्ये शोकसागरमाप्लुताम् ।
ददर्श हनुमान्देवीं लतामकुसुमामिव ॥

सा मलेन च दिग्धाङ्गी वपुषा चाप्यलङ्कृता ।
मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥

[सुन्दर० स०१७]

इति नियमतोऽवस्थानप्रतिपादनाच्च, प्रवासादिना असन्निहित-भर्तृकया पुनर्भर्तृदर्शनपर्यन्तमनेन व्रतेनास्थेयमिति सूचितम् । तथा च याज्ञवल्क्यः— 'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥ गते देशान्तरं पत्यौ गन्धमाल्याञ्जनान्यपि । दन्तकाष्ठं च ताम्बूलं वर्जयेद्वनिता सती ॥' इति । संग्रहेऽपि— 'मुदिता मुदितेऽत्यन्तं प्रोषिते मलिनाम्बरा । कार्यार्थं प्रोषिते क्वापि सर्वमण्डनवर्जिता ॥' इति । भारते लुब्धकपोतीयेऽपि— 'प्रोषिते दीनवदना क्रुद्धे च प्रियवादिनी' इति । आनुशासनिकेऽपि— 'प्रवासं यदि मे याति भर्ता कार्येण केनचित् । सुमनोवर्णकापेता भवामि व्रतचारिणी ॥' इति ॥

अत एव नलेन भर्त्रा वियुक्ता दमयन्ती अनेन व्रतेनैव स्थितवतीति प्रतिपादितम् वनपर्वणि नलोपाख्याने—'मलपंकाभिलिप्तांगीं मृणालीमिव तां भृशम् । पौर्णमासीमिव निशां राहुग्रस्तनिशाकराम ॥ पतिशोकाकुलां बालां शुष्कस्रोतां नदीमिव । विध्वस्तपर्णकमलां वित्रासितविहंगमाम । हस्तिहस्तपरिक्षिप्तां व्याकुलामिव पद्मिनीम् ॥ सुकुमारीं सुजातांगीं रत्नगर्भगृहोचिताम् ॥ दह्यमानामिवोष्णेन मृणालीमिव चो [मचिरो] द्धृताम् । रूपौदार्यगुणोपेतां मण्डनार्हाममण्डिताम ॥ चन्द्रलेखामिव नवां व्योम्नि नीलाभ्रसंवृताम् । कामभोगैः प्रियैर्हीनां हीनां बन्धुजनेन च ॥ देहं धारयतीं दीनां भर्तृदर्शनकाङ्क्षया । भर्ता नाम परं नार्या भूषणं भूषणैर्विना । एषा विरहिता तेन शोभनापि न शोभते ॥ दुष्करं कुरुतेऽत्यर्थं हीनो यदनया नलः । धारयत्यात्मनो देहं न शोकेनावसीदति ॥ इमामसितकेशान्तां शतपत्रायतेक्षणाम् । सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ॥' इति ॥

इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ।
कारुण्येनानृशंस्येन शोकेन मदनेन च ॥

स्त्री प्रणष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥

अत्र 'स्त्री प्रणष्टेति कारुण्यात्' इति प्रतिपादनात्, स्त्रीत्वे जातिमात्रे दया कर्तव्येति सूचितम् । अत एव क्रूरहृदयोऽपि व्याधः कलिदोषेण भर्तृवियुक्तां वने चरन्तीमजगरग्रस्तां दमयन्तीमवलोक्य करुणया रक्षितवानिति प्रतिपादितं वनपर्वणि—

'आक्रन्दितमभिश्रुत्य जवेनाभिससार ह । तां स दृष्ट्वा तथा ग्रस्तामुरगेणायतेक्षणाम् ॥ मोक्षयित्वा स तां व्याधः प्रक्षाल्य सलिलेन ह । समाश्वास्य कृताहारामथ पप्रच्छ भारत ॥' इति ॥

'आश्रितेत्यानृशंस्यतः' इत्यनेन आश्रितासंरक्षणे प्रत्यवाय उक्तः। तथा च महाप्रस्थानिके— 'भक्तत्यागं प्राहुरत्यन्तपापं तुल्यं लोके ब्रह्महत्याकृतेन' इति। प्रतिप्रदानं शरणागतस्य स्त्रियो वधो ब्राह्मणस्वापहारः । मित्रद्रोहस्तानि चत्वारि शक्र भक्तत्यागश्चैव समं मतं मे ॥' इति ॥

'पत्नी नष्टेति शोकेन' इत्यत्र धर्मसहायभूतायाः भार्याया नाशः शोकहेतुत्वेन प्रतिपादितः, 'पत्युर्नो यज्ञसंयोगे' इति पतिशब्दाद्यज्ञसंयोगे गम्यमाने नकारविधानेन पत्नीशब्दस्य धर्मसहायभूतस्त्रीवाचकत्वात् । भार्याया धर्मसहायत्वं चापकर्मे— 'धर्मार्थकामकालेषु भार्या पुंसः सहायिनी । तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ॥ नास्ति भार्यासमो लोके सहायो धर्मसंग्रहे ।' इति ॥

'प्रियेति मदनेन च' इत्यनेन प्रियावियोगे प्रियस्य प्रियवियोगे प्रियायाश्च मदनकृता विविधा अवस्था भवन्तीति सूचितम् । प्रतिपादिताश्च सीताविप्रयुक्तरामस्य विविधावस्थाः— 'धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ नैव सा नूनमथवा हिंसिता चारुहासिनी । कृच्छ्रं प्राप्तं न मां नूनं यथोपेक्षितुमर्हति ॥ क्वचिदुद्भ्रमते वेगात्क्वचिद्विभ्रमते बलात् । क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥' [अरण्य० स० ६०]

'न मांसं राघवो भुङ्क्ते न चापि मधु सेवते। वन्यं सुविहितं नित्यं भक्तमश्नाति पंचमम् ॥ नैव दंशान्न मशकान्न कीटान्न सरीसृपान्। राघवोऽपनयेद्गात्रात्त्वद्गतेनान्तरात्मना ॥ नित्यं ध्यानपरो रामो नित्यं शोकपरायणः। नान्यच्चिन्तयते देवि स तु कामवशं गतः ॥ अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः। सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥ दृष्ट्वा फलं वा पुष्पं वा यच्चान्यत्सुमनोहरम्। बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते ॥ स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः। दृढव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ तवादर्शनजेनार्ये शोकेन समभिप्लुतः। न शर्म लभते रामः सिंहार्दित इव द्विपः॥' [सुन्दर० स ३६] क्व गच्छसि वरारोहे मामुत्सृज्य सुमध्यमे। त्वया विरहितश्चाहं त्यक्ष्ये जीवितमात्मनः ॥' [अरण्य० स० ६१] इत्यादिभिः ॥

तथा प्रियविरहात् सीताया अपि अवस्थाः प्रतिपादिताः— 'सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका ॥' [सुन्दर० स० ३६] 'रामेति रामेति विचिन्त्य बुद्ध्या तथैव वाचा ब्रुवती तमेव। तस्यानुरूपां च कथां तमर्थं तथैव पश्यामि तथा शृणोमि ॥ अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा। विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥' [सुन्दर० स०३२] समीपं राजसिंहस्य रामस्य विदितात्मनः। संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम्। दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम ॥' [सुन्दर० स०१९] स्वप्नो न चायं न च मेऽस्ति निद्रा शोकेन दुःखेन

स्यास्यति चिरं गत एष नराधमः ॥ अधर्मतो महर्षीणां बाह्-नाद्व हतः शुभे ।' इति । प्राचीना अपि— 'दौर्मन्त्र्या-न्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् । ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयान्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्ध-नम् ॥' इति ॥

'विहतामिव श्रद्धाम्' इत्यनेन, नास्तिक्यबुद्धया धर्मेषु श्रद्धा विहता भवतीत्युक्तम् । तथा च विष्णुपुराणे— 'मायामोहः स तान् दैत्यान्धर्ममत्याजयाद्द्विज । नानाप्रकारं वचनं स तेषां युक्तियोजितम् । तथा तथावदद्धर्मं तत्यजुस्ते यथा यथा ॥ मायामोहेन ते दैत्याः प्रकारैर्बहुभिस्तथा । व्युत्थापिता यथा नैषां त्रयीं कश्चिदरोचयत ॥' इति ॥

'आशां प्रतिहताम्' इत्यनेन विषयालाभेन, विहताशा कृशा भवतीति सूचितम् । तथा च राजधर्मे— 'सत्कृत्य नोप-कुरुते परं शक्त्या यथार्हतः । सक्ता या सर्वभूतेषु साशा कृश-तरी मया ॥ एकपुत्रः पिता पुत्रे नष्टे वा प्रोषितेऽपि वा । प्रवृत्तिं यो न जानाति साशा कृशतरी मया ॥ प्रसवे चैव नारीणां वृद्धानां पुत्रकारिता । तथा नरेन्द्र धनिनां साशा कृशतरी मया ॥ प्रदानकांक्षिणीनां च कन्यानां वयसि स्थिते । श्रुत्वा कथां तथायुक्तां साशा कृशतरी मया ॥' इति ॥

'सोपसर्गां यथा सिद्धिम्' इत्यनेन सिद्धोऽपि योगी प्रसक्तमुपसर्गं निरस्यैव मोक्षभाग्भवतीत्युक्तम् । तथा च

पातञ्जलसूत्रम् 'स्थान्युपमन्त्रणे संगस्मयाकरणं पुनरनिष्टप्रसङ्गात्।' इति। चत्वारः खल्वमी योगिनः— प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति। तत्राद्यः संयमे प्रवृत्तमात्रः न किंचिज्जानाति। संयमेन भूतेन्द्रियाणि साक्षात्कृत्य तज्जिगीषुर्द्वितीयः। भूतेन्द्रियजयी पुरुषमाचिख्यासुस्तृतीयः। संप्राप्तपुरुषख्यातौ परवैराग्यसंपन्नश्चतुर्थः। सोऽसौ भगवान्महानुभावो जीवन्मुक्तो विघ्नशंकाकलङ्कशून्यः। तृतीयः जितभूतेन्द्रियत्वात् महेन्द्रादिभिरक्षोभ्यः। आद्यस्तु देवनिमन्त्रणायोग्यः। अतः परिशेषाद्द्वितीयः स्थानिभिः शक्रादिभिः शक्यते प्रार्थयितुम्— 'भो योगिन् इहास्यताम्। स्वर्गादिस्थाने रम्यताम्। कमनीयेयं कन्यका, दिव्योऽयं भोगः, रसायनमिदं जरामृत्युनिवारणम्, इदं कामगं यानम्' इति। एवं प्रार्थने संग आसक्तिः, 'अहो मम योगप्रभावः' इति स्मयश्च न कर्तव्यः। किं तु इत्थं दोषं तत्र भावयेत्— 'घोरेषु संसाराङ्गारेषु अहं पापच्यमानः कथंचित्क्लेशादिध्वान्तध्वंसकं योगप्रदीपमवापम्। तस्यैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः। स खल्वहं लब्धालोकः कथमेतैर्वञ्चितः पुनः पुनः प्रदीप्तस्य संसारहुतभुजः स्वात्मानमिन्धनीकुर्याम्। अतः स्वस्ति वः स्वप्नसमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्यः। [इति]। एवं निश्चितमतिः पुरुषधौरेयः समाधिं भावयेत्। यदि तत्र संगस्मयौ भवेतां तदास्य योगभ्रष्टस्य पुनरनिष्टं प्रसज्येत। अतः संगस्मययोरकरणं कैवल्यान्तरायानिवारणकारणमित्यर्थः। अन्यत्रापि सूत्रे अन्तराया उक्ताः—'ते समाधावुपसर्गा व्युत्थाने सिद्धयः' इति। ते प्रातिभादयः समाधावपवर्गफले उपसर्गाः

विघ्ना भवन्ति । अतो मोक्षमाकाङ्क्षता ते उपेक्षणीयाः । यदि तत्रापेक्षा स्यात्, तदा मोक्षात् भ्रष्टः कथं कृतकृत्यतामियात् । न ह्यात्मप्रत्ययमन्तरेण कृतकृत्यता समस्ति । न चैते स्वात्मज्ञाने उपकुर्वन्ति । अपि तु व्युत्थाने सिद्धयो भवन्ति । एतदेवाभिप्रेत्योक्तम्— 'द्रव्यमन्त्रक्रियाकालशक्तयः साधु सिद्धिदाः । परमात्मपदप्राप्तौ नोपकुर्वन्ति काश्चन ।। सर्वेच्छालाभसंशान्तावात्मलाभोदयो हि यः । स कथं सिद्धिवांछायां मग्नचित्तेन लभ्यते ।।' इति । [अतो] निरस्तसमस्तप्रतिबन्धस्यैव मोक्षप्राप्तिः ।।

'बुद्धिं सकलुषामिव' इत्यनेन, कामक्रोधादिना कालुष्ये सति पुरुषोऽनयप्रवृत्त्या विनष्टो भवति इति सूचितम् । तथा चोद्योगे— 'बुद्धौ कलुषभूतायां विनाशे समुपस्थिते । अनयो नयसंकाशो हृदयान्नापसर्पति ।। ' इति ।।

'अभूतेनापवादेन कीर्तिं निपतितामिव' इत्यनेन, मिथ्यापवादोऽपि अपकीर्तिकरः । अतः कीर्तिनाशद्वारा पातित्यहेतुः सर्वयत्नेनापि अपवादोऽवश्यं परिहर्तव्य इति ।।

अत एवोत्तररामायणे— अभूतापवादपरिहाराय प्राणसमापि सीता परित्यक्तेति प्रतिपादितम्—'पौरापवादः सुमहांस्तथा जनपदस्य च । वर्तते मयि बीभत्सा सा मे मर्माणि कृन्तति ।। एवं शुद्धसमाचारा देवगन्धर्वसंनिधौ । लंकाद्वीपे महेन्द्रेण मम हस्ते निवेशिता ।। अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम् । अतो गृहीत्वा वैदेहीमयोध्यामहमागतः ।। अयं च मे महान्वादः शोकश्च परिवर्तते । पौरापवादः सुमहांस्तथा जनपदस्य

च ॥ अकीर्तिर्यस्य जायेत लोके भूतस्य कस्यचित् । पतत्येवाधमाल्लोकान् यावच्छब्दस्तु कीर्त्यते ॥ अकीर्तिर्निन्द्यते देवैः कीर्तिर्देवेषु पूज्यते । कीर्त्यर्थं च समारम्भः सर्व एव महात्मनाम् ॥ न हि पश्याम्यहं भूतं किंचिद्दुःखमतोऽधिकम् । श्वस्त्वं प्रभाते सौमित्रे विषयान्ते समुत्सृज ॥' इति ॥

'आम्नायानामयोगेन विद्यां प्रशिथिलामिव'। आम्नायः पुनः पुनरभ्यासः । तदभावे विद्या शिथिला भवतीति सूचितम् । तथा चोद्योगे विदुरः— 'अनाम्नायमला वेदाः' इति । तथा— 'शास्त्रं सुनिश्चितधिया परिचिन्तनीयमाराधितोऽपि नृपतिः परिसेवनीयः । अंकागतापि युवतिः परिरक्षणीया शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥' इति च ॥

'संस्कारेण यथा हीनाम्' इत्यनेन व्याकरणाद्य[न]नुशिष्टः स्वरहीनः शब्दः विवक्षितार्थप्रतिपादनासमर्थ इति सूचितम् । तथा च शीक्षायाम्— 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥' इति ॥

इत्थं सीतया स्नानप्रसाधनादिकं विना नियमेन क्लेशेन च स्थितमिति कृत्स्नप्रकरणेन प्रतिपादनात्, अग्रे—

निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ।
क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥

चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ।
भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषिताम् ॥

वैदिकः स्मृतः । पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥' इति । तथा च सद्योवधूनां स्वकर्तव्यकर्माङ्गमन्त्राध्ययनमस्त्येव ॥

अत्र चैवं व्यवस्था— कलियुगे सद्योवध्व एव । इतरयुगत्रये सद्योवध्वो ब्रह्मवादिन्यश्च, 'पुराकल्पेषु' इति यमवचनात् । तथा च त्रेतायुगवर्तिन्याः सीतायाः सन्ध्योपासनाद्यधिकारः सम्भवतीति महर्षिणा वाल्मीकिना प्रतिपादितं सन्ध्योपासनादिकं युक्तमेवेति ॥

इति चतुर्दशः सर्गः ।

अथ पञ्चदशः सर्गः ।

पञ्चदशे— तत्र स्थितः पवनतनयः सन्तानकल्पलतापादपैर्नन्दनवनश्रियमिवानुकुर्वन्तीं कोकिलकलहंसकारण्डवचक्रवाकोपेताभिर्विकचकाञ्चनमयोत्पलाभिः पद्मिनीभिरुपशोभितां मधुकरभरभुग्नगर्भकेसररजःकुसुमोपहाररमणीयविविधतरुलतां क्वचिदुन्मदमयूरकेकारवभीतभुजङ्गमुक्तसुरभिचन्दनवनां बकुलैलालवङ्गलवलीलताकुसुमसौरभलोभविभ्रमदलिकुलमुखरितदिङ्मुखां कुसुमितकर्णिकारपरिगतप्रान्ततया उद्यदर्ककिरणगणैरिव प्रकाशितां विकचधवलकुसुमनिकरकरम्बिततया सतारामिव नभःस्थलीमनेकवर्णकुसुमविचित्रतया स्फुरदुरुरत्ननिकरस्य जलनिधेः श्रियमिवादधानामशोकवनिकां परितो विचिन्वन्नविदूरे सहस्रस्तम्भमण्डपमतिधवलतया दर्पणमिव त्रैलोक्यलक्ष्म्याः स्फटिकभूमि-

पातञ्जलसूत्रम् 'स्थान्युपमन्त्रणे संगस्मयाकरणं पुनरनिष्टप्रसङ्गात्।' इति । चत्वारः खल्वमी योगिनः— प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति । तत्राद्यः संयमे प्रवृत्तमात्रः न किंचिज्जानाति। संयमेन भूतेन्द्रियाणि साक्षात्कृत्य तज्जिगीषुर्द्वितीयः । भूतेन्द्रियजयी पुरुषमाचिख्यासुस्तृतीयः। संप्राप्तपुरुषख्यातौ परवैराग्यसंपन्नश्चतुर्थः । सोऽसौ भगवान्महानुभावो जीवन्मुक्तो विघ्नशंकाकलङ्कशून्यः । तृतीयः जितभूतेन्द्रियत्वात् महेन्द्रादिभिरक्षोभ्यः । आद्यस्तु देवनिमन्त्रणायोग्यः । अतः परिशेषाद्द्वितीयः स्थानिभिः शक्रादिभिः शक्यते प्रार्थयितुम्— 'भो योगिन् इहास्यताम् । स्वर्गादिस्थाने रम्यताम् । कमनीयेयं कन्यका, दिव्योऽयं भोगः, रसायनमिदं जरामृत्युनिवारणम्, इदं कामगं यानम्' इति । एवं प्रार्थने संग आसक्तिः, 'अहो मम योगप्रभावः' इति स्मयश्च न कर्तव्यः। किं तु इत्थं दोषं तत्र भावयेत्— 'घोरेषु संसाराङ्गारेषु अहं पापच्यमानः कथंचित्क्लेशादिध्वान्तध्वंसकं योगप्रदीपमवापम् । तस्यैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः । स खल्वहं लब्धालोकः कथमेतैर्वञ्चितः पुनः पुनः प्रदीप्तस्य संसारहुतभुजः स्वात्मानमिन्धनीकुर्याम् । अतः स्वस्ति वः स्वप्नसमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्यः । [इति] । एवं निश्चितमतिः पुरुषधौरेयः समाधिं भावयेत् । यदि तत्र संगस्मयौ भवेतां तदास्य योगभ्रष्टस्य पुनरनिष्टं प्रसज्येत। अतः संगस्मययोरकरणं कैवल्यान्तरायानिवारणकारणमित्यर्थः । अन्यत्रापि सूत्रे अन्तराया उक्ताः—'ते समाधावुपसर्गा व्युत्थाने सिद्धयः' इति । ते प्रातिभादयः समाधावपवर्गफले उपसर्गाः

विघ्ना भवन्ति । अतो मोक्षमाकाङ्क्षता ते उपेक्षणीयाः । यदि तत्रापेक्षा स्यात्, तदा मोक्षात् भ्रष्टः कथं कृतकृत्यतामियात् । न ह्यात्मप्रत्ययमन्तरेण कृतकृत्यता समस्ति । न चैते स्वात्मज्ञाने उपकुर्वन्ति । अपि तु व्युत्थाने सिद्धयो भवन्ति । एतदेवाभिप्रेत्योक्तम्— 'द्रव्यमन्त्रक्रियाकालशक्तयः साधु सिद्धिदाः । परमात्मपदप्राप्तौ नोपकुर्वन्ति काश्चन ॥ सर्वेच्छालाभसंशान्तावात्मलाभोदयो हि यः । स कथं सिद्धिवांछायां मग्नचित्तेन लभ्यते ॥' इति । [अतो] निरस्तसमस्तप्रतिबन्धस्यैव मोक्षप्राप्तिः ॥

'बुद्धिं सकलुषामिव' इत्यनेन, कामक्रोधादिना कालुष्ये सति पुरुषोऽनयप्रवृत्त्या विनष्टो भवति इति सूचितम् । तथा चोद्योगे— 'बुद्धौ कलुषभूतायां विनाशे समुपस्थिते । अनयो नयसंकाशो हृदयान्नापसर्पति ॥' इति ॥

'अभूतेनापवादेन कीर्तिं निपतितामिव' इत्यनेन, मिथ्यापवादोऽपि अपकीर्तिकरः । अतः कीर्तिनाशद्वारा पातित्यहेतुः सर्वयत्नेनापि अपवादोऽवश्यं परिहर्तव्य इति ॥

अत एवोत्तररामायणे— अभूतापवादपरिहाराय प्राणसमापि सीता परित्यक्तेति प्रतिपादितम्—'पौरापवादः सुमहांस्तथा जनपदस्य च । वर्तते मयि बीभत्सा सा मे मर्माणि कृन्तति ॥ एवं शुद्धसमाचारा देवगन्धर्वसंनिधौ । लंकाद्वीपे महेन्द्रेण मम हस्ते निवेशिता ॥ अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम् । अतो गृहीत्वा वैदेहीमयोध्यामहमागतः ॥ अयं च मे महान्वादः शोकश्च परिवर्तते । पौरापवादः सुमहांस्तथा जनपदस्य

च ॥ अकीर्तिर्यस्य जायेत लोके भूतस्य कस्यचित् । पतत्येवाधमान्लोकान् यावच्छब्दस्तु कीर्त्यते ॥ अकीर्तिर्निन्द्यते देवैः कीर्तिर्देवेषु पूज्यते । कीर्त्यर्थं च समारम्भः सर्व एव महात्मनाम् ॥ न हि पश्याम्यहं भूतं किंचिद्दुःखमतोऽधिकम् । श्वस्त्वं प्रभाते सौमित्रे विषयान्ते समुत्सृज ॥' इति ॥

'आम्नायानामयोगेन विद्यां प्रशिथिलामिव'। आम्नायः पुनः पुनरभ्यासः । तदभावे विद्या शिथिला भवतीति सूचितम् । तथा चोद्योगे विदुरः— 'अनाम्नायमला वेदाः' इति । तथा— 'शास्त्रं सुनिश्चितधिया परिचिन्तनीयमाराधितोऽपि नृपतिः परिसेवनीयः । अंकागतापि युवतिः परिरक्षणीया शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥' इति च ॥

'संस्कारेण यथा हीनाम्' इत्यनेन व्याकरणाद्य[न]नुशिष्टः स्वरहीनः शब्दः विवक्षितार्थप्रतिपादनासमर्थ इति सूचितम् । तथा च शीक्षायाम्— 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥' इति ॥

इत्थं सीतया स्नानप्रसाधनादिकं विना नियमेन क्लेशेन च स्थितमिति कृत्स्नप्रकरणेन प्रतिपादनात्, अग्रे—

निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ।
क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥

चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ।
भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषिताम् ॥

वैदिकः स्मृतः । पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥'
इति । तथा च सद्योवधूनां स्वकर्तव्यकर्माङ्गमन्त्राध्ययनमस्त्येव ॥

अत्र चैवं व्यवस्था— कालियुगे सद्योवध्व एव । इतरयुगत्रये सद्योवध्वो ब्रह्मवादिन्यश्च, 'पुराकल्पेषु' इति यमवचनात् । तथा च त्रेतायुगवर्तिन्याः सीतायाः सन्ध्योपासनाद्यधिकारः सम्भवतीति महर्षिणा वाल्मीकिना प्रतिपादितं सन्ध्योपासनादिकं युक्तमेवेति ॥

इति चतुर्दशः सर्गः ।

अथ पञ्चदशः सर्गः ।

पञ्चदशे— तत्र स्थितः पवनतनयः सन्तानकल्पलतापादपैर्नन्दनवनाश्रियमिवानुकुर्वन्तीं कोकिलकलहंसकारण्डवचक्रवाकोपेताभिर्विकचकाञ्चनमयोत्पलाभिः पद्मिनीभिरुपशोभितां मधुकरभरभुग्नगर्भकेसररजःकुसुमोपहाररमणीयविविधतरुलतां काचिदुन्मदमयूरकेकारवभीतभुजङ्गमुक्तसुरभिचन्दनवनां बकुलैलालवङ्गलवलीलताकुसुमसौरभलोभविभ्रमदलिकुलमुखरितदिङ्मुखां कुसुमितकर्णिकारपरिगतप्रान्ततया उद्यदर्ककिरणगणैरिव प्रकाशितां विकचधवलकुसुमनिकरकरम्बिततया सतारामिव नभःस्थलीमनेकवर्णकुसुमविचित्रतया स्फुरदुरुरत्ननिकरस्य जलनिधेः श्रियमिवादधानामशोकवनिकां परितो विचिन्वन्नविदूरे सहस्रस्तम्भमण्डपमतिधवलतया दर्पणमिव त्रैलोक्यलक्ष्म्याः स्फटिकभूमि-

गृहमिव वसुन्धरादेव्या। कैलासगिरिमिवापरमवतीर्णमूर्जितं प्रासा-
दमवलोकयामास ॥

ततो मलिनसंवीतां राक्षसीभिः समावृताम् ।
उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥

ददर्श शुक्लपक्षादौ चन्द्रलेखामिवामलाम् ।
मन्दं प्रख्यायमानेन रूपेण रुचिरप्रभाम् ॥

पिनद्धां धूमजालेन शिखामिव विभावसोः ।
पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ॥

सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम् ।
व्रीडितां दुःखसंतप्तां परिम्लानां तपस्विनीम् ॥

ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ।
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ॥

शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ।
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।
स्वगणेन मृगीं हीनां श्वगणाभिवृतामिव ॥

नीलनागाभया वेण्या जघनं गतयैकया ।
नीलया नीरदापाये वनराज्या महीमिव ॥

सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ।
तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ॥

तर्कयामास सीतेति कारणैरुपपादिभिः ।

पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥

कुर्वतीं प्रभया देवीं सर्वा वितिमिरा दिशः ।
तां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥

सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ।
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥

भूमौ सुतनुमासीनां नियतामिव तापसीम् ।
निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव ॥

शोकजालेन महता विततेन न राजतीम् ।
संसक्तां धूमजालेन शिखामिव विभावसोः ॥

तां स्मृतीमिव संदिग्धां ऋद्धिं निपतितामिव ।
विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥

सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ।
अभूतेनापवादेन कीर्तिं निपतितामिव ॥

रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ।
अबलां मृगशावाक्षीं वीक्षमाणां समन्ततः ॥

बाष्पाम्बुप्रतिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा ।
वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥

मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् ।
प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥

तस्य संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु ।
आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥

दुःखेन बुबुधे सीतां हनूमाननलङ्कृताम् ।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् ।
तर्कयामास सीतेति कारणैरुपपादिभिः ॥

अत्र 'तां स्मृतीमिव संदिग्धाम' इत्यनेन, पूर्वानुभूतपदार्थे संस्कारोद्बोधकाभावे झटिति स्पष्टतरा स्मृतिर्न भवतीत्युक्तम्। तदुक्तं प्राचीनैः—'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनाविरलभावः क्षितिरुहाम् । बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति॥' इति । स्मृतिवाक्यमिवेति वा । अत एव पुरुषदोषवर्जितेन परमेश्वरेण प्रणीतत्वादेव कात्स्न्येन वेदः प्रमाणम् । लौकिकं तु किंचिदेवेति । तथा स्मृतेः श्रुतिमूलकत्वालोभमूलकत्वादिनिर्णयाभावे स्मृतिवाक्यात् नार्थसत्ता निश्चयरूपा जायत इत्युक्तम् ॥

'ऋद्धिं निपतितामिव' इत्यनेन, अनयादधर्माच्च महत्यपि ऋद्धिर्गच्छतीति सूचितम् । तथा चोद्योगे नहुषोपाख्याने --
'विमाने योजयित्वा च ऋषीन्नियममास्थितान् । तेनाभूद्धततेजाश्च निःश्रीकश्च महीपतिः ॥' इति । कामन्दकेऽपि—'धर्माद्वैजवनो राजा चिराय बुभुजे भुवम् । अधर्मादेव नहुषः प्रतिपेदे रसातलम् ॥' इति । उद्योगेऽपि— 'न भेतव्यं त्वया देवि नहुषाद्दुष्टचेतसः । न ह्येष

च पीडितायाः । सुखं हि मे नास्ति यतोऽस्मि हीना तेनेन्दुपूर्ण-प्रतिमाननेन ॥' [सुन्दर० स० ३२] 'ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा । भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा ॥ आमन्त्रये जनस्थाने कर्णिकारान्सुपुष्पितान् । क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ यानि कानिचिदप्यत्र सत्वानि निवसन्त्युत । सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम् । विवशापहृता सीता रावणेनेति शंसत ॥' [अरण्यं० स० ४९] 'सर्वथा तेन हीनाया रामेण विदितात्मना । तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ जीवितं त्यक्तुमिच्छामि शोकेन महतावृता ।' [सुन्दर० स० २५] 'उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती ।' [सुन्दर० स० २६] प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ उद्बध्य वेण्युद्ग्रथितेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ।' [सुन्दर० स० २८] इति ॥

इत्थं परस्परवियोगप्रयुक्ता बह्व्योऽवस्था नायिकानायकयोः सन्ति । ताश्च संक्षेपतो दशविधा इत्युक्तं लक्षणकारैः— 'चक्षुः-प्रीतिर्मनःसङ्गः संकल्पोऽथ प्रजागरः । अरतिः संज्वरः कार्श्यं लज्जात्यागो भ्रमो मृतिः । दशावस्था भवन्त्येता विप्रलम्भेऽभिलाषजे ॥' इति ॥

तासां लक्षणमुदाहरणं च काव्यदर्पणे— 'चक्षुःप्रीतिस्तु कथिता तदेकालोकने रतिः । पश्यन्त्यनिमिषं कान्तमासीच्चित्रार्पितेव सा ॥' इति । यथा वा नैषधे— 'लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः । चक्षुर्जलैरार्जितमात्म-

चक्षूरागं स धत्ते रचितं त्वया नु ॥'- इति। आदरनिर्निमेषो नृपः साश्रुपातमालेख्यसमर्पितां त्वां पश्यन्नात्मनि चक्षुषोश्च रागं धत्ते। स चक्षुर्जलकृतो वा त्वत्कृतो वेति संदेहः। अत्र यद्यपि आत्मगतो रागस्त्वद्धेतुकः, चक्षुर्गतश्च जलहेतुक इति व्यवस्थितमेव; तथापि श्लिष्टरागशब्दमाहिम्ना एकीकृत्य तत्र हेतुद्वयसंभावनया संदेहाभिधानम् ॥

यथा वा— 'पातुर्दशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ते। ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥' अत्रापि निर्निमेषया दृशा आलेख्यमयीं त्वां द्रष्टुर्नेत्रगतेन निमेषाभावेन (च) अश्रुणि विषये ममेदं ममेदमिति कलहोऽस्तीत्यर्थः। आभ्यां चक्षुःप्रीतिरुक्ता ॥

इदं च श्रवणप्रीतेरप्युपलक्षणम्। यथा— 'सखीजनानां सरसोक्तिगुंफेष्वनुत्तराया हरिणेक्षणायाः। त्वद्वर्णनाकर्णनसौमनस्यमकुण्ठतायां श्रवसः प्रमाणम् ॥' अत्रापि सखीजनानां सरसोक्तिषु उत्तरमनुक्त्वा बाधिर्यमभिनयन्त्या नायिकायाः श्रवसः अकुण्ठितत्वं नायकस्य तव वर्णनाकर्णनजनितसौमनस्येन निर्णीयते ॥

अथ मनःसङ्गः— 'मनःसङ्गस्तु मनसस्तदेकायत्तता सदा। नपुंसकमिति ज्ञात्वा तां प्रति प्रेरितं मनः। तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥' यथा वा— 'त्वं हृद्गता भैमि बहिर्गतापि प्राणायिता नासिकयास्यगत्या। न चित्रमाक्रामति तत्र चित्तमेतन्मनो यद्भवदेकवृत्ति ॥' त्वं बहिर्गतापि हृद्गता। अस्य

नलस्य त्वं कया गत्या केन प्रकारेण प्राणायिता नासि । सर्वप्रकारेणापि प्राणायितैव । अतः नासाद्वारेण आस्यगत्या मुखद्वारेणान्तर्बहिः संचरता प्राणेन तुल्यत्वादन्तर्बहिरवस्थानमुचितमित्यर्थः । तत्र भवत्याः प्राणतुल्यत्वे चित्रं आश्चर्यो रसः चित्तं नाक्रामति । 'कथमियं प्राणायिता' इति चित्तस्य आश्चर्यकरं न भवतीत्यर्थः । यतः एतस्य नलस्य मनो भवदेकवृति भवदेकजीवनम् । जीवितभूतस्य प्राणायितत्वे किं चित्रमित्यर्थः ॥

अथ सङ्कल्पः— 'सततं तद्गतां चिन्तां सङ्कल्पं संप्रचक्षते । दुर्लभा वल्लभा नूनं रागोऽपि मम कोऽप्यसौ । नेक्षे च दूतीं निपुणां न जाने भवितव्यताम् ॥' इति । यथा वा— 'अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयाम् । श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतामवाप्य ॥' दूरदीर्घां नलस्य संकल्पसोपानततिं त्वमजस्रमारोहसि । नलश्च अधिकश्वासं मुंचतीति यत् तत् तव ध्यानात् त्वन्मयतामवाप्य त्वदभेदं प्राप्यैव । कथमन्यथा अन्यस्यायासेनान्यस्य श्वासदोषो भवेत् इति ॥

यथा वा— 'हृत्तस्य यां मन्त्रयते रहस्त्वां तां व्यक्तमामन्त्रयते मुखं यत् । तद्वैरिपुष्पायुधमित्रचन्द्रसख्यौचिती सा खलु तन्मुखस्य ॥' नलः गूढतया मनसा यां त्वां चिन्तयति तामेव तदीयं मुखं व्यक्तभाषणेन प्रकाशयतीति यत् सा[तन्मुखस्य] रहस्यार्थप्रकाशकस्य नलमुखस्य नलशत्रुमदनमित्रचन्द्रसदृशत्वेन तत्सख्यौचिती नलमुखस्य नलशत्रुमदनमित्रचन्द्रसदृशत्वेन नलशत्रुत्वात्तदीयरहस्यार्थभेदनं युक्तमेव ॥

अथ प्रजागरः— 'प्रजागरस्तच्चिन्ताभिर्निद्राक्षतिरहर्निशम् । निमेषसंकथाशून्यं निशि नीलोत्पलश्रियम् । अपनिद्रं दिवाम्भोजशोभामेति तदीक्षणम् ॥' इति । यथा वा— 'स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती । आलिङ्ग्य या चुम्बति लोचने सा निद्राधुना न त्वदृतेऽङ्गना वा ॥' अत्र च शय्यायां शयित्वा स्थितस्य नलस्य मनो मोहे निमज्य मोहयित्वा निद्रा त्वदन्याङ्गना वालिङ्ग्य लोचने न चुम्बतीति प्रतिपादनान्निद्रात्याग उक्तः ॥

अथारतिः— 'अरतिस्तु भवेद्द्वेषो हृद्येष्वपि च वस्तुषु । चन्द्रं कलयते तन्वी चक्रवाकीव पावकम् ॥' इति ॥

अथ संज्वरः— 'संज्वरस्तनुसंतापभरः स्मरशरोद्भवः । तापस्तस्या यदि रविश्चन्दनादपि शीतलः ॥' इति ॥

अथ कार्श्यम्— 'कार्श्यं तु स्मरसंतापविहिता तनुता तनोः । ऊर्मिकां कंकणं तच्च तनुतेऽङ्गदमद्य सा ॥' यथा वा— 'स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि । अनङ्गतामप्ययमाप्यमानः स्पर्धां न साधं विजहाति तेन ॥' स्मरेण स वृथैव निस्तक्ष्य लावण्यशेषां कृशतामनायि । सोऽपि यतः अनङ्गतामवाप्यापि स्पर्धां न विजहाति इति प्रतिपादनात् कार्श्यमुक्तम् । अतः तत्कृततक्षणप्रयासो व्यर्थ इति ॥

अथ लज्जात्यागः— 'लज्जात्यागस्तु कन्दर्पसंतापेन त्रपाक्षतिः । स्वप्नेऽद्य तेन पृष्टापि भूयो नावोचमुत्तरम् । किन्नु कुप्येत मय्येष इति पृच्छति सा सखीम् ॥' इति । यथा

अथ अष्टादशः सर्गः ॥

अष्टादशे— इति विचिन्तयति हनूमति चरमगिरिशिखरोपकण्ठं प्राप्तुमुत्कण्ठिते निशीथिनीनाथे—

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ।
शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ॥

अनेनापररात्रे अध्ययनं कर्तव्यमिति सूचितम् । तथा च रात्र्यां विभागेन अध्ययनानध्ययनकालं दर्शयता आपस्तम्बाचार्येणापररात्रे अध्येतव्यमिति सूचितम्— 'आ निशाया जागरणम् । अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः । मनसा वा स्वयम् । ऊर्ध्वमर्धरात्रादध्यापनम् । नापररात्रमुत्थायानध्याय इति संविशेत् । काममपशयीत । मनसा वाधीयीत ।' इति । दक्षोऽपि— 'प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यो नयेत् । यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥' इति ॥

अथ मङ्गळवादित्रशब्दैः श्रोत्रमनोहरैः ।
प्राबुध्यत महाबाहुर्दशग्रीवो महाबलः ॥

अनेन मङ्गलध्वनिभिः राजा प्रबोधनीय इत्युक्तम् । तच्च प्रागयोध्याकाण्डे प्रपंचितम् ॥

ततः प्रबुद्धो दशवदनः स्रक्समाल्याम्बरधरः कुसुमशरशरप्रहारेण कलुषितसमस्तेन्द्रियः सीतामवलोकयितुमशोकवनिकामेव प्रविवेश । अथ कांचनदीपिकावालव्यजनतालवृन्तच्छत्रमण्डला-

मछत्रचामरपानपात्रखङ्गखेटादिविविधोपकरणकलितकरतलाः सरभसचलनेन निद्रामदपारवश्येन च व्यावृत्तहारकेयूराः मृदितवर्णकविगलितधम्मिल्लपरिमृष्टविशेषकैर्विश्लिष्टकुसुममालिकाभिश्च प्रकटितविविधरतिभेदाः सीतासमासक्तमनसं मन्दं मन्दं प्रयान्तं पौलस्त्यमनुजग्मुः ॥

अथ हनुमानतिबलपराक्रममागच्छन्तम्—

दीपिकाभिरनेकाभिः समन्तादवभासितम् ।
गन्धतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः ॥

कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् ।
रावणमवलोक्य शिंशुपापत्रसंछन्नगात्रो बभूव ॥

अत्र गन्धतैलावसिक्ताभिरित्युक्तथा राजभिर्गन्धतैलावसिक्तदीपिकाः कर्तव्या इति सूचितम् । तथा भीष्मपर्वणि दुर्योधनम्— 'प्रदीपैः कांचनैस्तत्र गन्धतैलावसेचितैः । परिवव्रुर्महात्मानं प्रज्वलद्भिः समन्ततः ॥' इति ॥

इति अष्टादशः सर्गः ।

—

अथ एकोनविंशः सर्गः ॥

एकोनविंशे—

ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ।
आच्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ।
उपविष्टा विशालाक्षी रुदती वरवर्णिनी ।

अनेन स्त्रीभिः परपुरुषसन्निधौ स्वशरीरं गोपनीयमिति सूचितम् । तथा च श्रुतिः—'अधः पश्यस्व मोपरिसंतरां पादकौ हरमातिकशल्पकौ दृशन् स्त्री हि ब्रह्मा बभूविथ' इति ॥

शंखोऽपि— ''न नाभिं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदपावृतम्' इति ॥

दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ।
वेष्टमानामथाविष्टां पन्नगेन्द्रवधूमिव ॥

धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ।
वृत्तशीलकुले जातामाचारवति धार्मिके ॥

पुनः संस्कारमापन्नां जातामिव च दुष्कुले ।
अभूतेनापवादेन कीर्तिं निपतितामिव ॥

आम्नायानामयोगेन विद्यां प्रशिथिलामिव ।
सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ॥

प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ।
आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव ॥
दीप्तामिव दिशं काले पूजामपहृतामिव ॥

इति एकोनविंशः सर्गः ।

अथ विंशः सर्गः ॥

विंशे—

स तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् ।
साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥

अये जनकनन्दिनि, त्वयि समासक्तमानसं त्वदेकशरणं मामवलोक्य भीत्या किमित्यस्थाने लज्जया वक्षोजयुगलमूरुभ्यामाच्छादयितुमिच्छसि । तदलमनेन निरर्थकसमारम्भेण ॥

स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ।
गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥

नन्वत्र राक्षसानां परस्त्रीहरणगमनक्रौर्यादिकं धर्म इत्युक्तम् । तदसंगतम् । 'न परदारान् गच्छेत्' इत्यादिशास्त्रगणप्रतिषिद्धस्याधर्मस्य धर्मत्वासिद्धेः । न खलु विहितो धर्मोऽश्वमेधादिरधर्मो भवति । अधर्मो वा[प्रतिषिद्धो]ब्रह्महत्यादिको धर्मः । न वा राक्षसानामयं धर्म इति किंचिच्छास्त्रमुपलभामहे । प्रत्युत क्रौर्यपरदाराभिमर्शनादिकं राक्षसानामप्यधर्म इत्यवगम्यते । तत्र स्त्रीहरणविषये रावणं प्रति मारीचवाक्यम्— 'परदाराभिमर्शात्तु नान्यत्पापतरं महत्' [अरण्य० स० ३८] इति ॥

तथा उत्तरकाण्डे राक्षसस्य विभीषणस्य वचनम्— 'तत्र पन्नगयक्षाणां मानुषानां च रक्षसाम् । दैत्यानां दानवानां

करालां धूम्रवक्त्रां च पिङ्गाक्षीं विकृताननाम् ।
विकृताः पिङ्गलाः काळीः क्रोधनाः कलहप्रियाः ॥

कालायसमहाशूलकूटमुद्गरधारिणीः ।
वराहमृगशार्दूलमहिषाजशिवामुखीः ॥

गजोष्ट्रहयपादाश्च निखातशिरसोऽपराः ।
एकहस्तैकपादाश्च खरकर्ण्यश्वकर्णिकाः ॥

गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ।
अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः ॥

गजसंनिभनासाश्च ललाटोच्छ्वासनासिकाः ।
हस्तिपादा महापादा गोपादाः पादचूलिकाः ॥

अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ।
अतिमात्रास्यनेत्राश्च दीर्घजिह्वानखास्तथा ॥

अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ।
हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः ॥

शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ।
करालधूम्रकेशीश्च राक्षसीर्विकृताननाः ॥

पिबन्तीः सततं पानं सदा मांससुराप्रियाः ।
मांसशोणितदिग्धांगीर्मांसशोणितभोजनाः ॥

अत्र प्राग्भवेष्वेकैकश्येन सामस्त्येन वा सकृदनुष्ठितानां पापानां फलभूताङ्गवैरूप्यादिप्रतिपादनात् भवान्तरे राक्षस्यो- प्रतिपापिष्ठा इति सूचितम् ॥

D.23

अङ्गवैरूप्यादीनां पापफलत्वं मानवे— 'इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानो नानारूपविपर्ययम् ॥ एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः । जडान्धमूकबाधिरा विकृताकृतयस्तथा ॥ हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः । परस्परादिन्नः स्तेनाः प्रेतान्त्यस्त्रीनिषेवकाः ॥ संयोगं पतितैर्गत्वा परस्यैव च योषितः । अपहृत्य च विप्रस्वं भवन्ति ब्रह्मराक्षसाः ॥ स्वेभ्यः स्वेभ्यश्च कर्मभ्यश्च्युता वर्णा अनापदि । पापान्संसृत्य संसारान् प्रेष्यतां यान्ति दस्युषु ॥ बहून्वर्षगणान्घोरान् नरकान् प्राप्य तत्क्षयात् । संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥ श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् । चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति ॥ मणिमुक्ताप्रवालांश्च हृत्वा लोभेन मानवाः । विविधानि च रत्नानि जायन्ते हेमकर्तृषु ॥ धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः । मधु दंशः पयः काको रसं श्वा नकुलो घृतम् ॥ मांसं गृध्रो रसान्मद्गुस्तैलं तैलपकः खगः । चिरीवाकस्तु लवणं बलाका शकुनिर्दधि ॥ कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः । कार्पासं तान्तवं क्रौञ्चो गोधा गां मद्गुको गुडम् ॥ चुच्छुन्दरी शुभान् गन्धान् पत्रशाकं च बर्हिणः । श्वावित् कृतान्नं विविधमकृतान्नं तु शल्यकः ॥ बको भवति हृत्वाग्निं गृहकारी ह्युपस्करम् । रक्तानि हृत्वा वासांसि जायन्ते जीवजीविकाः ॥ वृको मृगेभं व्याघ्रोऽश्वं फलं पुष्पं तु मर्कटः । स्त्रीमृक्षस्तोकको वारि यानान्युष्ट्रः पशूनजः ॥ यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ।

अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥ स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः । एतेषामेव जन्तूनां पत्नीत्वमुपयान्ति ताः ॥ वान्ताश्युल्कामुखः प्रेतो विप्रो भवति विच्युतः । अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ॥ मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् । चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्च्युतः ॥ यथा यथा निषेवन्ते विषयान्विषयात्मकाः । तथा तथा कुशलता तेषु तेषूपजायते ॥ तेऽभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः । संप्राप्नुवन्ति दुःखानि तासु तास्विह योनिषु ॥ तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनम् । असिपत्रवनादीनि बन्धनच्छेदनानि च ॥ विविधांश्चोपसंबन्धान् काकोलूकैश्च भक्षणम् । संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः ॥ शीतातपाभिघातांश्च विविधानि भयानि च । असकृद्गर्भवासेषु वासं जन्म च दारुणम् ॥ बन्धनानि च कष्टानि परप्रेष्यत्वमेव च । बन्धुप्रियवियोगांश्च संवासं चाप्रियैर्जनैः ॥ द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनम् । जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम् । क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम् ॥ यादृशेन तु भावेन यद्यत्कर्म निषेवते । तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ॥' इति ॥

स्मृत्यन्तरेऽपि— 'कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम् । हिंस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् ॥ लूताहिसरटानां च तिरश्चां चाम्बुचारिणाम् । हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥ तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि । क्रूरकर्मरतानां च क्रमशो गुरुतल्पगः ॥' इति ॥

इत्थं स्वकर्मभिः कुत्सितरूपतया जननवत् राजदोषादपि विरूपाः प्रजायन्ते इति प्रतिपादितं वनपर्वणि-- 'अभिचारान्नरेन्द्राणां धर्मः संकीर्यते महान् । अधर्मो वर्धते वापि संकीर्यन्ते ततः प्रजाः ॥ उरूण्डा वामनाः कुब्जाः स्थूलशीर्षाक्षिकर्णकाः । क्लीबाश्चान्धाश्च बधिरा जायन्ते स्तब्धलोचनाः । पार्थिवानामधर्मित्वात्प्रजानामभवः सदा ॥' इति । तस्मात्स्वयमपि पापं न कुर्यात् , पापिष्ठराष्ट्रवासमपि न कुर्यात् ॥

तादृशीभिश्च शूलमुद्गरपरिघादिविविधायुधहस्ताभिः राक्षसीभिः संनिरुद्धाम्--

इमां तु शीलसंपन्नां द्रष्टुमिच्छति राघवः ।
रावणेन प्रमथितां प्रपामिव पिपासितः ॥

अत्र च पिपासितो दृष्टान्तत्वेनोपात्तः जलालाभेन प्रपामापन्न एव विवक्षितः । आपदि तदनुज्ञानं लघुतया प्रायश्चित्तं च माधवीये— 'प्रपास्वरण्ये कटके च कूपे द्रोण्या जलं केशविनिस्सृतं च । श्वपाकचण्डालपरिग्रहेषु पीत्वा जलं पंचगव्येन शुध्येत् ॥' इति ॥

सेयं सीता मयेदानीं दृष्टा इति विचिन्त्य—

नमस्कृत्वाथ रामाय लक्ष्मणाय च वीर्यवान् ।
सीतादर्शनसंहृष्टो हनूमान् संवृतोऽभवत् ॥

इति सप्तदशः सर्गः ।

वा— 'त्वत्प्रापकात्त्रस्यैति नैनसोऽपि त्वय्येव दास्येऽपि मे लज्जते यत् । स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान् किमस्य ॥' धार्मिको नलः त्वत्प्राप्त्युपायभूतं पातकं दास्यमपि वा लज्जां विनैवाङ्गीकरोति इति यतः तस्मात् धार्मिकस्य कियान्स्वभावोऽपि बाणैरतितक्ष्य लूनो भवेदित्युक्तथा लज्जा-परित्याग उक्तः । यथा वा— 'स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदंकारचये चिकित्सौ । निदानमौनाद्दविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा ॥' अपत्रपिष्णोः लज्जाशीलस्य नलस्य स्मारं ज्वरं मन्मथसंतापं चिकित्सौ प्रतिकर्तुमिच्छौ सिद्धवैद्यसंघे निदानमौनात् रोगनिदानाकथनात् सांक्रामिकी क्षयादिवद्धिशाला लज्जा आविशत् इति लज्जात्याग उक्तः ॥

अथ भ्रमः— 'भ्रमः स्यादयथाज्ञानं त्वन्मयं वेत्ति सा जगत् ।' यथा वा— 'संगमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः ॥ सङ्गे सा पुनरेका त्रिभुवनमपि तन्मयं विरहे ॥' यथा वा— 'प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य । हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥' इति ॥

मरणावस्था तु— 'मृतिस्तु मरणोद्योगः पश्यतीन्दुं ससा-हसा ।' इति । यथा वा— 'सव्यापसव्यत्यजनाद्विरुक्तैः पञ्चे-षुबाणैः पृथगर्पितासु । दशासु शेषा खलु तद्दशा या तया नभः पुष्प्यतु कोरकेण ॥' वामदक्षिणहस्ताभ्यां प्रयोगेण द्विगुणीभूते-र्मन्मथबाणैरर्पितासु संपादितासु दशसु दशासु अवशिष्टा या

दशमी मरणावस्था तया कोरकभूतया नभः पुष्प्यतु । गगनकुसुमायमाना दशमी अवस्था भवतु । कदापि माभूदित्यर्थ इति ॥

केचित्तु उन्मादावस्था मूर्च्छावस्थेति द्वयमाहुः— ‘उन्मादस्तुल्यवृत्तित्वं चेतनाचेतनेष्वपि ।’ इति । तद्यथा— ‘बिभेति रुष्टासि किलेत्यकस्मात्सं त्वां किलोपेत्य हसत्यकाण्डे । यान्तीमिव त्वामनुयात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम् ॥’ ‘मूर्च्छा त्वभ्यन्तरे वृत्तिर्बाह्येन्द्रियनिमीलनात् ।’ ‘भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः । मूर्च्छामयद्वीपमहान्ध्यपङ्के हा हा महीभृद्भटकुञ्जरोऽयम् ॥’ भवद्वियोगे सति अविच्छिन्ना आर्तिधारा दुःखपरंपरा या सा एव यमस्वसा यमुना तस्या मूर्च्छामयद्वीपमहान्ध्यपंके निःशरण्यः महीभृद्भटकुञ्जरो मज्जतीत्यर्थः । तथा च प्रियविरहो विविधावस्थासंपादक इति युक्तमेव ॥

तस्मादत्यन्तासक्तिः क्वापि विषये न निधेया । तथा च विष्णुपुराणे— ‘यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशंकवः ॥’ इति ॥

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ।
एवं सीतां तदा दृष्ट्वा हृष्टः पवनसंभवः ।
जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥

इति पञ्चदशः सर्गः ।

अथ षोडशः सर्गः ॥

षोडशे— ततो हनूमान् प्रशस्य रामभद्रमित्थमचिन्तयत्— अहो विधेरनतिलंघनीयता । यदियं लोकनाथस्य रामभद्रस्य महिष्यपि सीता दुःखार्णवनिमग्ना इति ॥

सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ।

अनेन परकीयव्यसनावलोकनेन महतां व्यथा भवतीति सूचितम् । अत एव अयोध्याकाण्डे रामभद्रस्य गुणप्रतिपादनावसरे उक्तम्— 'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः । उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥' इति ॥

समानाभिजनवयोरूपायाः पतिव्रतायाः जानक्याः कृते रामकृतं खरदूषणप्रमुखरक्षोनिषूदनं वालिनिग्रहणेन सुग्रीवाभिषेचनं अस्या गवेषणाय वानरप्रेषणं च युक्तमेवेति तर्कयामि ॥

यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् ।
अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥

राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा ।
त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलाम् ॥

अनेन रूपवती पतिव्रता स्त्री दुर्लभेति सूचितम् । तदुक्तं प्राचीनैः—'रूपसौभाग्यसंपन्नं प्रेमपात्रं प्रियंवदम् । कुलीनमनुकूलं च कलत्रं कुत्र लभ्यते ॥' इति ॥

अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति ।
राजा राज्यात्परिभ्रष्टः पुनः प्राप्येव मेदिनीम् ॥

अनेनापूर्वधनलाभापेक्षया प्रणष्टवस्तुलाभेन संतोषातिशय उक्तः। तथा च बालकाण्डे—'यथामृतस्य सम्प्राप्तिर्यथा वर्षमनूदके। यथा सदृशदारेषु पुत्रजन्माप्रजस्य च॥ प्रणष्टस्य यथा लाभो यथा हर्षो महोदये।' इति॥

इत्येवमर्थं कपिरन्ववेक्ष्य सीतेयमित्येव निविष्टबुद्धिः।
संश्रित्य तस्मिन्निषसाद वृक्षे बली हरीणां प्रवरस्तपस्वी॥

इति षोडशः सर्गः।

अथ सप्तदशः सर्गः॥

सप्तदशे—अथ (सीतागवेषणव्यग्रस्य हनूमतः) निखिलवस्तुप्रकाशनेन साचिव्यमाचरता विधुमण्डलेन दूरीकृतमहार्णवलङ्घनश्रमो हनूमान्—

स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः।
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा॥

अकर्णां शंकुकर्णां च मस्तकोच्छ्वासनासिकाम्।
अतिकायोत्तमाङ्गीं च तनुदीर्घशिरोधराम्॥

ध्वस्तकेशीं तथाकेशीं केशकम्बलधारिणीम्।
लम्बकर्णललाटां च लम्बोदरपयोधराम्॥

लंबोष्ठीं चुबुकोष्ठीं च लम्बास्यां लम्बजानुकाम्।
ह्रस्वां दीर्घां तथा कुब्जां विकटां वामनां तथा॥

च कन्या जग्राह रावणः ।। विभीषणस्तु ता नारीर्दृष्ट्वा शोकसमाकुलाः । तस्य तां च मतिं श्रुत्वा धर्मात्मा वाक्यमब्रवीत् ।। क्रूरैस्तैस्तैः समाचारैर्यशोऽर्थकुलनाशनैः । धर्षणं प्राणिनां कृत्वा स्वमतेन विचेष्टसे ।। प्राणिनो धर्षयित्वैतास्त्वयानीता वराङ्गनाः । त्वामतिक्रम्य मधुना राजन् कुम्भीनसी हृता ।। तदेतत्कर्मणो ह्यस्य फलं पापस्य दुर्मते । अस्मिन्नेवाभिसंप्राप्तं कुले विदितमस्तु ते ।।' इति ।।

युद्धकाण्डे रावणं प्रति विभीषणवाक्येऽपि— 'अयशस्यमनायुष्यं परदाराभिमर्शनम् । अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ।।' [स.९] इति । तत्रैव मन्दोदरीप्रलापेऽपि— 'पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो । तदैव यन्न दग्धस्तु धर्षयंस्तनुमध्यमाम् ।। अवश्यमेव लभते फलं पापस्य कर्मणः । घोरं पर्यागते काले कर्ता नास्त्यत्र संशयः ।। शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते । विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ।।' [स० ११४] इति ।।

देवब्राह्मणहननादिकमपि राक्षसानामधर्म इति रावणं प्रति कुबेरसंदेशे— 'अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम् । आगम्य च श्रुतोऽधर्मस्तव पापविनिश्चयः ।।' इति । तथा रावणहितोपदेशाय प्रेषणीयं दूतं प्रति कुबेरवचनम्— 'तदधर्मिष्ठसंयोगान्निवर्त कुलदूषणात् । साधुधर्मे व्यवस्थानं क्रियतां यदि शक्यते ।। दृष्टं मे नन्दनं भग्नं ऋषयो मे हताः श्रुताः । देवानां च समुद्योगस्त्वत्तो राजन् श्रुतश्च मे ।। साधु पर्याप्तमेतावत्कृतश्चारित्रसंग्रहः ।।' इति ।।

युद्धकाण्डेऽपि— 'यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः। स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता॥ त्रैलोक्याधिपतिर्ह्येष यदि न स्याद्विकर्मकृत्।' इति। तत्रैव— 'त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा। नाहमर्होऽस्मि संस्कर्तुं परदाराभिमर्शिनम॥' [स० ११४] इति विभीषणेनाभिहितो रामः— 'अधर्मानृतसंयुक्तः काममेष निशाचरः।' इत्यादिना तस्य पापिष्ठत्वमङ्गीकृत्यैव, तवैव यशोऽर्थं संस्कारं कुर्वित्युक्तवान। तत्रैव सुपार्श्ववचनेऽपि— 'कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज। हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य हि। वेदविद्याव्रतस्नातः स्वकर्मनिरतस्सदा॥ स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर।' [सर्ग० ९५] इति॥

तथा च सर्वेषामपि धर्मो धर्म एव, अधर्मोऽप्यधर्म एव इति स्थिते परदाराभिगमनं कथं स्वधर्म इति रावणेनोक्तमिति चेत्— न।

'स्वधर्मो रक्षसाम्' इत्यत्र धर्मशब्दस्य ऐहिकमात्रसौख्यसंपादकपरदारहरणं क्रौर्यादिकं च स्वभाव इत्येतदभिप्रायत्वात्। शरीरपोषणेन सौख्यसंपादनमेव राक्षसानां स्वभाव इत्येतत छान्दोग्ये—'तौ ह शान्तहृदयौ प्रवव्रजतुः। तौ हान्वीक्ष्य प्रजापतिरुवाच— अनुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वा असुरा वा ते पराभविष्यन्तीति। स ह शान्तहृदय एव विरोचनोऽसुरान् जगाम। तेभ्यो हैतामुपनिषदं प्रोवाच— आत्मैवेह महय्य आत्मा परिचर्य आत्मानमेव [इह] महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोति इमं चामुं

चेति । तस्मादप्यद्येह अददानमश्रद्दधानं अयजमानमाहुः— आसुरो बतेत्यसुराणां ह्येषोपनिषत् । प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति संस्कुर्वन्त्येतेन हि अमुं लोकं जेष्यन्तो मन्यन्ते ।' [अ० ८. ख० ८] इति ॥

व्याख्यातं[च]भगवत्पादैः— '(पितुः प्रजापतेरुपदेशं श्रुत्वा) संशान्तहृदय एव सन्विरोचनोऽसुरान् जगाम । गत्वा च तेभ्योऽसुरेभ्यः शरीरात्मबुद्धिर्योपनिषत्तामेतामुपनिषदं प्रोवाच उक्तवान्— देहमात्रमेव आत्मा पित्रोक्त इति । तस्मादात्मैव देहः इह लोके मह्य्यः पूजनीयः । तथा परिचर्यः परिचरणीयः । तथा आत्मानमेव इह लोके[देहं]महयन् परिचरंश्च उभौ लोकाववाप्नोति इमं चामुं च । इहलोकपरलोकयोरेव सर्वे लोकाः कामाश्चान्तर्भवन्ति इति राज्ञोऽभिप्रायः । तस्मात्तत्सम्प्रदायोऽद्याप्यनुवर्तते इहलोके । अददानमदानशीलम् । अश्रद्दधानं [पारलौकिकेषु] सत्कार्येषु श्रद्धारहितम् । यथाशक्त्ययजमानमयजनस्वभावं चाहुः । आसुरः खल्वयं यत एवंस्वभावो बतेति खिद्यमाना आहुः शिष्टाः । असुराणां हि यस्माच्च अश्रद्दधानतादिलक्षणैषोपनिषत् । तया उपनिषदा संस्कृताः सन्तः प्रेतस्य शरीरं कुणपं भिक्षया गन्धमाल्या[न्ना]दिलक्षणया वसनेन वस्त्राच्छादनादि(ना) प्रकारेणालङ्कारेण ध्वजपताकादिकरणेनेत्येवं संस्कुर्वन्ति । एतेन कुणपसंस्कारेणामुं प्रेत्य प्रतिपत्तव्यं लोकं जेष्यन्तो मन्यन्ते ।' इति । ततस्तेषां शरीरसौख्यसंपादनं स्वभाव इति सिद्धमेव ॥

राक्षसानां क्रौर्यं स्वाभाविकमित्येतद्बृहदारण्यके— 'त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्याः

असुराः। उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति। तेभ्यो हैतदक्षरमुवाच द इति। व्यज्ञासिष्टा ३ इति। व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेति ओमिति होवाच व्यज्ञासिष्टेति। अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति। तेभ्यो हैतदेवाक्षरमुवाच द इति। व्यज्ञासिष्टा ३ इति। व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेति। ओमिति होवाच व्यज्ञासिष्टेति। अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति। तेभ्यो हैतदेवाक्षरमुवाच द इति। व्यज्ञासिष्टा ३ इति। व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेति। ओमिति होवाच व्यज्ञासिष्टेति। तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयं शिक्षेत् दमं दानं दयामिति ॥ [अ. ५. ब्रा. २] इति ॥

तद्भाष्यम्— 'अधुना दमादिसाधनत्रयविधानार्थोऽयमारम्भः। त्रयास्त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानि प्राजापत्याः। ते किम्? प्रजापतौ पितरि ब्रह्मचर्यं शिष्यवृत्तेर्ब्रह्मचर्यस्य प्राधान्यात् शिष्याः सन्तः ब्रह्मचर्यमूषुः उषितवन्तः। के ते?, विशेषतो देवा मनुष्याः असुराश्च। ते चोषित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते— तेषां देवा ऊचुः पितरं प्रजापतिम। किमिति? ब्रवीतु कथयतु नः अस्मभ्यं[यत्] अनुशासनं भवानिति। तेभ्य एवमर्थिभ्यो ह एतदक्षरं वर्णमात्रमुवाच— द इति। उक्त्वा च तान् पप्रच्छ पिता किं व्यज्ञासिष्टा ३ इति। मयोपदेशार्थमभिहितस्या[क्षरस्या]र्थं विज्ञातवन्त आहोस्विन्नेति। देवा ऊचुः— व्यज्ञासिष्मेति विज्ञातवन्तो वयम्।

स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः ।
अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥

एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः ।
दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥

अनेन पापिष्ठस्य विनाशप्राप्तौ सर्वेऽपि सज्जना नन्दन्तीति सूचितम् । तथा चोद्योगे नहुषोपाख्याने— 'एवं भ्रष्टो दुरात्मा स देवराज्यादरिन्दम । दिष्ट्या वर्धामहे शक्र हतो ब्राह्मणकण्टकः ॥ ततो देवा भृशं तुष्टा महर्षिगणसंवृताः । पितरश्चैव यक्षाश्च भुजङ्गा राक्षसास्तथा ॥ गन्धर्वा देवकन्याश्च सर्वे चाप्सरसां गणाः । सरांसि सरितः शैलाः सागराश्च विशांपते ॥' इति ॥

द्रोणपर्वण्यपि घटोत्कचवधे— 'वासुदेवस्तु हर्षेण महताभिपरिप्लुतः । ननाद सिंहनादेन व्यथयन्निव पाण्डवान् ॥ विनद्य तु महानादं पर्यष्वजत पाण्डवम् । स विनद्य महानादमभीशून् सन्नियम्य च ॥ ननर्त हर्षसंवीतो वातोद्धूत इव द्रुमः ।' इति । ततः पार्थेन हर्षकारणं पृष्टो भगवान्— 'एष हि ब्राह्मणद्वेषी यज्ञद्वेषी च राक्षसः । यज्ञहर्ता च पापात्मा तस्मादेवं निपातितः ॥' इत्यवादीत् । अतः पापिष्ठस्य नाशः सत्पुरुषसंतोषकर एव ॥

शक्या लोभयितुं नाहमैश्वर्येण धनेन वा ।
अनन्या राघवेणाहं भास्करेण प्रभा यथा ॥

अनेन दुष्टैः प्रलोभनाय प्रदर्शिते ऐश्वर्ये धने वा पतिव्रता स्त्री अन्तःकरणं न प्रयच्छतीति सूचितम् । तथा च पारिजाते आश्वलायनः— 'पुरुषं सेवते नान्यं मनोवाक्कायकर्मभिः। लोभितापि परेणार्थैः सा सती लोकभूषणा ॥ अन्येन प्रार्थिता वापि बलेन विधृतापि वा । वस्त्राद्यैर्वासिता वापि नैवान्यं भजते सती ॥' इति ॥

उपधाय भुजं तस्य लोककान्तस्य सत्कृतम् ।
कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥

अनेन पतिव्रता स्त्री परपुरुषस्पर्शमपि न संमन्यत इति सूचितम् । तथा चात्रैव 'भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर। न स्पृशामि शरीरं तु पुंसो वानरपुङ्गव ॥' इति सीतावचनमुपश्लाघमानस्य हनूमतो वचनम्— 'रामादन्यस्य नार्हामि संस्पर्शमिति जानकि । एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः । का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥' [स० ३८] इति॥

वनपर्वण्यपि द्रौपदीप्रमाथे— 'साताननुप्रेक्ष्य विशालनेत्रा जिघृक्षमाणानवभर्त्सयन्ती । प्रोवाच मा[मा]स्पृशतेति भीता धौम्यं प्रचुक्रोश पुरोहितं सा ॥' इति । आरण्यकाण्डेऽपि— 'परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति वै । पितुर्वियोगात्सौमित्रे स्वराज्यहरणात्तथा ॥' [स० २] इति ॥

अहमौपयिकी भार्या तस्यैव वसुधापतेः ।
व्रतस्नातस्य विप्रस्य विद्येव विदितात्मनः ॥

अनेन व्रतपूर्वकतया आचार्यमुखाद्गृहीता मन्त्राः कर्मणि प्रयुक्ताः सफला भवन्ति । अन्यथा प्रत्यवायकरा इति सूचितम् ।

तथा च छान्दोग्ये— 'आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्' इति ॥

आपस्तम्बोऽपि— 'नियमेषु तपःशब्दः । तदतिक्रमे विद्याकर्म निस्रवति ब्रह्म सहापत्यादेतस्मात् । कर्तपत्यमनायुष्यं च । तस्मादृषयोऽवरेषु न जायन्ते नियमातिक्रमात् । श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनःसम्भवे । यथा श्वेतकेतुः । यत्किंच समाहितोऽब्रह्माप्याचार्यादुपयुङ्क्ते ब्रह्मवदेव तस्मिन् फलं भवति । अथो यत्किंच मनसा वाचा चक्षुषा वा सङ्कल्पयन्ध्यायत्याहाभिविपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ।' इति ॥

तत्रोज्ज्वला— 'नियमेषु तपःशब्दः । 'आचार्याधीनः स्यात्' इत्यादयो ये नियमाः अस्मिन् ब्रह्मचारिप्रकरणे, तपःशब्दस्तेषु द्रष्टव्यः, न कृच्छ्रादिषु । तदतिक्रमे विद्याकर्म निस्रवति ब्रह्म सहापत्यादेतस्मात् । एतेषां नियमानामतिक्रमे विद्याकर्म विद्याग्रहणं ब्रह्म निस्रवति गृहीतं वेदं निस्सारयति एतस्मान्नियमातिक्रमेणाध्येतुः पुरुषात् । न केवलादेतस्मात् । किं तर्हि, सहापत्यात् । अपत्येन सह वर्तत इति सहापत्यः । 'वोपसर्जनस्य' इति सहभावेन रूपम् । अपत्यादपि ब्रह्म निस्सारयति । यद्यप्यपत्यं नियमातिक्रमकारि न भवति, तथापि पितृदोषादेव ब्रह्म निस्सारयति । नियमातिक्रमेण विद्याग्रहणं कुर्वतः पुरुषात्सहापत्यात् गृहीतं ब्रह्म निःसारयति इति ब्रह्मयज्ञादिषूपयुज्यमानमपि अकिंचित्करं भवतीत्ययमर्थो विवक्षितः । स्रवतेस्तु सकर्मकप्रयोगो भाष्ये द्रष्टव्यः— 'स्रवत्युदकं कुण्डिका'

इति । न केवलमकिंचित्करं नियमातिक्रमे विद्याग्रहणम्, प्रत्युत अनर्थकारीत्याह— कर्तपत्यमनायुष्यं च । कर्त इति श्वभ्राभिधो नरक उपलक्ष्यते । पतत्यनेनेति पत्यम् । एवंभूतं विद्याग्रहणं नरकपातहेतुर्भवतीति । अनायुष्यं च अनायुष्करं च । तस्मादृषयोऽवरेषु न जायन्ते नियमातिक्रमात् । अत एव अवरेषु अर्वाचीनेषु कलियुगवर्तिषु ऋषयो न जायन्ते मन्त्रदृशो न भवन्ति, इदानीं नियमातिक्रमस्यावर्जनीयत्वात् । कथं तर्ह्यत्वेऽतिक्रामन्तोऽपि नियमानल्पेनैव कालेनायत्नेन चतुरो वेदान् गृह्णन्ति? युगान्तरे सम्यगनुष्ठितस्य नियमकर्मणः फलविशेषेणेत्याह— श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनःसंभवे । पुनःसंभवः पुनर्जन्म । अत्रोदाहरणम्— यथा श्वेतकेतुः । श्वेतकेतुर्ह्यल्पेनैव कालेन चतुरो वेदानन्वगृह्णात् । तच्च छान्दोग्ये 'श्वेतकेतुर्हारुणेय आस' इत्यादिना प्रतिपादितम् । एवं नियमातिक्रमे दोषमुक्त्वा तदनुष्ठाने सिद्धिमाह— यत्किंच समाहितोऽब्रह्माप्याचार्यादुपयुङ्क्ते ब्रह्मवदेव तस्मिन्फलं भवति । अब्रह्मापि अब्रह्मापि । पररूपम् । अपेर्वा अकारलोपः पिहितपिनद्धादिवत् । वेदव्यतिरिक्तमपि यत्किञ्चिद्विष(यं)-मन्त्रादिकं समाहितो नियमवान् आचार्यादुपयुङ्क्ते गृह्णाति । तस्मात् । [तस्मिन्] ब्रह्मवदेव फलं भवति । निग्रहानुग्रहशक्ति-रपि अस्य भवतीत्याह— अथो यत्किंच मनसा वाचा चक्षुषा वा सङ्कल्पयन्ध्यायत्याहाभिविपश्यति वा तथैव तद्भ-वतीत्युपदिशन्ति । अथो अपि च यत्किंचिदनुग्रहात्मकं निग्रहात्मकं वा संकल्पयन् चिकीर्षन् (ध्यायन्) मनसा निर्दयेन सदयेन वा

अथ एकविंशः सर्गः ॥

एकविंशे—

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ।
आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥

दुःखार्ता रुदती सीता वेपमाना तपस्विनी ।
चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥

तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ।

अनेन परपुरुषं नाभिभाषेत, अत्यन्तावश्यके कार्ये तृणादिकं किंचिदन्तर्धायैव भाषेतेति सूचितम् । तथा च शंखः— 'न परपुरुषमभिभाषेत' इति । स्कान्देऽपि—'पुरुषान्तरनामापि न गृह्णीत कदाचन । तृणमन्तरतः कृत्वा कार्ये भाषेत तादृशे ॥' इति ॥

निवर्तय मनो मत्तः स्वजने क्रियतां मनः ।
न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥

अत्र पतिव्रता स्त्री परपुरुषेण प्रार्थितापि पापकृतः सुसिद्धिरिव दुर्लभेत्युक्तम् । पापकृतां सुसिद्धिः पुण्यफलभूतस्वर्गादिर्न भविष्यतीत्येतद्बोधायनधर्मे— 'न [वै] देवान् पीवरोऽसंयतात्मा रोरूयमाणः ककुदी समश्नुते । चलत्तुन्दी रभसः कामवादी कृशास इत्यणवस्तत्र यान्ति ।' इति । अस्यार्थः— पीवरः स्वशरीरमांसपोषणपरः । असंयतात्मा अनियमितेन्द्रियः । रोरूयमाणो दुर्भाषणपरः । ककुदी अतिस्थूलककुद्मान् इति ॥

अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ।
कुलं सम्प्राप्तया पुण्यं कुले महति जातया ॥

अनेन महाकुलप्रसूतानां विशेषतोऽकार्यं वर्जनीयमिति सूचितम्— तथा च उद्योगे विदुरः— 'यश्चाभिजातः प्रकरोत्यकार्यं यश्चाबलो बलिनां नित्यवैरी । यश्चैव लब्ध्वा न स्मरामीत्युवाच एतान्नयन्ति निरयं पाशहस्ताः ॥' इति । [विराटेऽपि] 'परदारे न ते बुद्धिर्जातु कार्या कथंचन । विवर्जनं ह्यकार्याणामेतत्सत्पुरुषव्रतम् ॥' [इति]

एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ।
राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥

अत्र रावणं पृष्ठतः कृत्वा इत्यसंमुखत्वप्रतिपादनात् परपुरुषमुखावलोकनं न जातु कर्तव्यमिति सूचितम् । तथा च प्राचीनाः — 'पदन्यासो गेहाद्बहिरहिफणारोपणसमो वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः । निजावासादन्यद्भवनमपरद्वीपतुलितं पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥' इति ॥

नाहमौपयिकी भार्या परभार्या सती तव ।
साधु धर्ममवेक्षस्व साधु साधुव्रतं चर ॥

यथा तव तथान्येषां दारा रक्ष्या निशाचर ।
आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥

अनेन परदारा नोपभोग्या इत्युक्तम् । तथा विराटपर्वणि कीचकं प्रति द्रौपदी— 'परदारास्मि भद्रं ते न युक्तं त्वयि

साम्प्रतम् । दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥' इति ॥

अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ।
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥

अनेन पापमप्यविगणय्य परदारप्रवृत्तः ऐहिकमामुष्मिकं च निरवधिकमनर्थं प्राप्नोतीति सूचितम् । तथा चानङ्गरङ्गे— 'आयुःक्षतिर्विकलता ह्युपहास्यता च निन्दार्थहानिलघुता विगतिः परत्र । लङ्केश्वरो जनकजाहरणेन वाली तारापहारकृतयाप्यथ कीचकाख्यः । पाञ्चालिकाहरणतो निधनं जगाम तच्चेतसापि परदाररतिं न काङ्क्षेत् ॥' इति ॥

इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ।
तथा हि विपरीता ते बुद्धिराचारवर्जिता ॥

अनेन सत्संगतिसदनुवर्तनरहितानां भ्रंशो भवतीति सूचितम् । तथा चोद्योगे दुर्योधनं प्रति भगवान्— 'योऽसत्सेवी वृथाचारो न श्रोता सुहृदां तथा । परान्वृणीते स्वान्द्वेष्टि भृशं तपति दुर्मतिः ॥ मुख्यानमात्यानुत्सृज्य यो निहीनान्निषेवते । सुघोरामापदं प्राप्य नोत्तारं सोऽधिगच्छति ॥ सुहृदामर्थकामानां यो न तिष्ठति शासने । प्राज्ञानां कृतविद्यानां स नरः शत्रुनन्दनः ॥ सतां मतमतिक्रम्य योऽसतां वर्तते मते । शोचन्ते व्यसने तस्य सुहृदो न चिरादिव ॥ श्रुत्वा च सुहृदां शास्त्रं न मर्त्यैः प्रतिपद्यते । विपाकान्ते दहत्येनं किंपाकमिव भक्षितम् ॥ योऽर्थकामस्य च वचः प्रातिकूल्यान्न मृष्यते ।

शृणोति प्रतिकूलानि द्विषतां वशमेति सः ॥' इति ॥

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः ।
राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥

अनेन विनाशकाले सुहृद्भिर्हितमुक्तमपि न शृण्वन्तीति सूचितम् । तथा च युद्धकाण्डे—'परेतकल्पा हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्भिरीरितम् ।' इति । सभापर्वण्यपि— 'प्रायः समासन्नपराभवानां धियो विपर्यस्ततरा भवन्ति ।' इति ॥

अकृतात्मानमासाद्य राजानमनये रतम् ।
समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥

तथैव त्वां समासाद्य लङ्का रत्नौघसंकुला ।
अपराधात्तवैकस्य नचिराद्विनशिष्यति ॥

अनेन अविनयदोषेण समृद्धमपि राज्यं नश्यतीति सूचितम् । तथा चोद्योगे दुर्योधनं प्रति विदुरः— 'न राज्यं प्राप्य राज्ञा हि वर्तितव्यमसाम्प्रतम् । श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ यः प्रमाणं न जानाति स्थानवृद्धौ तथा क्षये । कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥ न हि राज्यमशिष्टेन शक्यं धर्मार्थलोभिना । आप्तुमाप्तं तथापीदमविनीतेन सर्वथा ॥ इमां श्रियं प्रज्वलितां भारतीं सर्वराजसु । जीवतो धृतराष्ट्रस्य दौरात्म्याद्भ्रंशयिष्यसि ॥ आत्मानं च सहामात्यं सपुत्रभ्रातृबान्धवम् । सहमित्रमसद्बुद्ध्या जीविताद्भ्रंशयिष्यसि ॥' इति ॥

यद्येवमुच्यतां किं मयोक्तमिति । देवा ऊचुः— दाम्यत अदान्ता यूयं स्वभावतः । अतो दान्ता भवतेति नः अस्मानात्थ कथयसि । इतर आह— ओमिति सम्यक् व्यज्ञासिष्टेति । समानमन्यत । स्वभावतो लुब्धा यूयम्, अतो यथाशक्ति संविभजत दत्तेति नोऽस्मानात्थ । किमन्यद्ब्रूयान्नो हितमिति मनुष्याः । तथासुरा दयध्वमिति । क्रूरा यूयं हिंसादिपराः, अतो दयध्वं प्राणिषु दयां कुरुतेति । तदेतत्प्रजापतेरनुशासनमद्याप्यनुवर्तत एव । यः पूर्वं प्रजापतिः देवादीननुशशास, सः अद्याप्यनुशास्त्येव दैव्या स्तनयित्नुलक्षणया वाचा । कथमेषा श्रूयते दैवी वाक् ? कासौ स्तनयित्नुः ? द द द इति, दाम्यत दत्त दयध्वमिति । एषां वाक्यानां उपलक्षणाय त्रिर्दकार उच्चार्यतेऽनुकृतिर्न तु स्तनयित्नुशब्दः त्रिरेव, संख्यानियमस्य लोके अप्रसिद्धत्वात् । यस्मादद्यापि प्रजापतिर्दाम्यत दत्त दयध्वमित्यनुशास्त्येव, तस्मात्कारणादेतत्त्रयम् । किं तत्त्रयमित्युच्यते— दमं दानं दयामिति शिक्षेदुपादद्यात् प्रजापतेरनुशासनमस्माभिः कर्तव्यमित्येवं मतिं कुर्यात् । तथा च स्मृतिः— 'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥' इति । अस्य हि विधेः शेषः पूर्वः । तथापि देवादीनुद्दिश्य किमर्थं दकारत्रयमुच्चारितवान्प्रजापतिः पृथगनुशासनार्थिभ्यः । ते वा कथं विवेकेन प्रतिपन्नाः प्रजापतेर्मनोगतं समानेनैव दकारमात्रेणेति पराभिप्रायज्ञा विकल्पयन्ति । अत्रैक आहुः— अदान्तत्वाददानत्वादयालुत्वैरपराधित्वमात्मनो मन्यमानाः शंकिता एव प्रजापतावूषुः, किं नो वक्ष्यतीति । तेषां च दकारश्रवणमात्रादेवात्मा-

शंकावशेन तदर्थप्रतिपत्तिरभूत् । लोकेऽपि हि प्रसिद्धम्— पुत्राः शिष्याश्चानुशास्याः सन्तो दोषान्निवर्तयितव्या इति । अतो युक्तं प्रजापतेर्दकारमात्रोच्चारणम् । दमादित्रये च दकारान्वयात् आत्मनो दोषानुरूपेण देवादीनां विवेकेन प्रतिपत्तुं चेति । फलं त्वेतदात्मदोषज्ञाने सति दोषान्निवर्तयितुं शक्यते (व्युत्पन्नाः) अल्पेनाप्युपदेशेन, यथा देवादयो दकारमात्रेणेति । नन्वेतत्त्रयाणां देवादीनामनुशासनं देवादिभिरपि एकैकमेवोपादेयम् ! अद्यत्वेऽपि न तु त्रयं मनुष्यैः शिक्षितव्यम् ।' इत्यादि ॥

परदारहरणाद्यधर्माचरणं राक्षसानां स्वाभाविकमित्येतदपि **युद्धकाण्डे** रामवाक्ये— 'येन मे मरणान्ताय हृता भार्या दुरात्मना । तेन धर्मो न विज्ञातो न वृत्तं न कुलं तथा ॥ राक्षस्या नीचया बुद्ध्या येनैतद्गर्हितं कृतम् ।' इति ॥

अन्यत्रापि— 'असृजद्भगवान्पक्षौ द्वावेव हि पितामहः। सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥ धर्मो हि श्रूयते पक्षो ह्यमराणां महात्मनाम् । अधर्मो रक्षसां पक्षो ह्यसुराणां च रावण ॥ तत्त्वया चरता लोकान् धर्मो विनिहतो महान् । अधर्मः प्रगृहीतश्च तेनास्मद्बलिनः परे ॥ स प्रमादात्प्रवृद्धस्ते ह्यधर्मो ग्रसते हि नः । विवर्धयति पक्षं च सुराणां सुरभावनः ॥ विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्वया । ऋषीणामग्निकल्पानामुद्वेगो जनितो महान् ॥ तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः । तपसा भावितात्मानो धर्मस्यानुग्रहे रताः । मुख्यैर्यज्ञैर्यजन्त्येते नित्यं तैस्तैर्द्विजातयः । जुह्वत्यग्नींश्च विधिवद्वेदांश्चोच्चैरधीयते ॥ अभिभूय च रक्षांसि ब्रह्मघोषानुदैरयन् । दिशो विप्रद्रुतास्सर्वे स्तनयित्नु-

रिवोष्णगे ॥ ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः । आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश ॥ तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः । चर्यमाणं तपस्तीव्रं संतापयति राक्षसान् ॥' (यु. स. ३५) इति ॥

तथा— 'परमापद्गतस्यापि धर्मे मम मतिर्भवेत् ।' इति विभीषणेन प्रार्थितः प्रजापतिः— 'यस्य राक्षसयोनौ ते जातस्यामित्रकर्शन । नाधर्मे जायते बुद्धिरमरत्वं ददामि ते ॥' [उ. स. १०] इति वचनेन स्वभावतोऽधर्मबहुले राक्षसयोनौ संभूतस्यापि विभीषणस्य धर्मबुद्धिमभिवीक्ष्य संतुष्टो वरं दत्तवानिति प्रतिपादनात् विभीषणव्यतिरिक्ताः सर्वेऽपि राक्षसाः स्वभावतोऽधार्मिका इति ब्रह्मवचनेनापि सिद्धम् ॥

ननु राक्षसत्वाविशेषाद्विभीषणस्य कथं वा धार्मिकी बुद्धिरिति चेन्न । तस्य धर्मबुद्धेः पितृवरप्रदानेन जन्मान्तरसुकृतपरिपाकवशेन च (धार्मिकत्व)सम्भवात् । तथा चोत्तररामायणे केकसीप्रार्थनेन विश्रवसो वरप्रदानं प्रतिपादितम्— 'दारुणान् दारुणाकारान् दारुणाभिजनप्रियान् । प्रसविष्यसि सुश्रोणि राक्षसान् क्रूरकर्मणः ॥ सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः । भगवन्नीदृशाः पुत्रास्त्वत्तो वै ब्रह्मवादिनः ॥ अथाब्रवीन्मुनिस्तत्र पश्चिमोऽयं तवात्मजः । मम वंशानुरूपश्च धर्मात्मा च भविष्यति ॥ तेषां क्रूरो दशग्रीवो लोकोद्वेगकरो भवेत् । विभीषणस्तु धर्मात्मा नित्यं धर्मपथे स्थितः ॥' इति ॥

तस्मात् 'स्वधर्मो रक्षसाम्' इत्यत्र धर्मपदं स्वभावपरमेव ।

एवमन्यत्रापि राक्षसानां शास्त्रप्रतिषिद्धेषु धर्मव्यवहारः स्वाभाविकत्वाभिप्राय एव ॥

एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ।
कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥

अत्र परदारेषु बलात्कारकरणस्य राक्षसानां स्वाभाविकत्वेऽपि त्वयि प्रीत्या स्वशरीरजपीडामपि सोढ्वा बलात्कारं न करोमि इत्युक्तिः प्रलोभनार्थैव, न तु पारमार्थिकी । 'अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि । तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् । नारोपये बलात्सीतां वैदेहीं शयने शुभे ॥' [यु स· १३] इति युद्धकाण्डे रावणवचनेन शापप्रयुक्तत्वप्रतिपादनात् । एवमन्यत्रापि (प्रलोभनपराण्येव) ॥

तदिदानीं परिहृत्योपवासादिनियमं विविधवसनाभरणशयनासनपानीयानि विचित्रकुसुममाल्यानि सुरभिचन्दनानि चानुमान्य मामनुगृह्णातु भवती । इदं च यौवनमतिक्रान्तं न पुनः प्रत्यागच्छति । रामोऽपि वनवासादिनियमैस्त्वद्वियोगेन च न जीवेदेव । जीवन्नपि वा सुरासुरविजेतारमप्रतिद्वन्द्वं मां परिभूय कथं त्वां प्राप्तुमर्हति इति । ततः—

पिब विहर रमस्व भुङ्क्ष्व भोगान्
धननिचयं प्रदिशामि मेदिनीं च ।
मयि लल ललने यथासुखं त्वं
त्वयि च समेत्य ललन्तु बान्धवास्ते ॥

इति विंशः सर्गः ।

ध्यायति इत्थमिदमस्यास्त्विति, तत्तथैव भवति । तथा यत्किंचि-त्संकल्पयन् वाचा घोरया मधुरया वा आह— इत्थमिदमस्या-स्त्विति, तत्तथैव भवति । तथा यत्किंचित्संकल्पयन् चक्षुषा घोरेण मैत्रेण वा अभिपश्यति, तत्तथैव भवतीत्युपदिशन्ति धर्मज्ञाः । अतोऽवश्यं धर्मयुक्तेनैवाध्येतव्यम् ' इति ॥

साधु रावण रामेण मां समानय दुःखिताम् ।
वने वाशितया सार्धं करेण्वेव गजाधिपम् ॥

मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता ।
वधं चानिच्छता घोरं त्वयासौ पुरुषर्षभः ॥

अनेन भर्तृवियुक्तायाः पतिव्रतायाः भर्त्रो[र्तृ]प्रापणेन इष्ट-प्राप्तिरनिष्टपरिहारश्च भवतीति सूचितम् । तथा च किष्किन्धा-काण्डे तारा— 'शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा ह्यनन्यः पुरुषस्य दाराः । दारप्रदानाच्च न दानमन्यत्प्रदृश्यते ज्ञानवतां हि लोके ॥ त्वं चापि मां तस्य मम प्रियस्य प्रदास्यसे धर्ममवेक्ष्य वीर । अनेन दानेन न लप्स्यसे त्वमधर्मयोगं मम वीर घातात् ॥' इति ॥

विदितः स हि धर्मज्ञः शरणागतवत्सलः ।
तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥

प्रसादयस्व त्वं चैनं शरणागतवत्सलम् ।
मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि ॥

अनेन सत्पुरुषाः शरणागतं द्रोहिणमपि परिपालयन्तीति सूचितम् । तथा च द्रोणपर्वण्यर्जुनः – 'न चास्मान् शरणं

गच्छेत् कृष्णं वा पुरुषोत्तमम् । भवन्तं वा महाराज श्वोऽस्मि हन्ता जयद्रथम् ॥' इति ॥

युद्धकाण्डेऽपि सुग्रीवं प्रति रामः— 'श्रूयते हि कपोतेन शत्रुः शरणमागतः । अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ स हि तं प्रतिजग्राह भार्याहर्तारमागतम् । कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा । शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना ॥ बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् । न हन्यादानृशंस्यार्थमपि शत्रुं परन्तप ॥ आर्तो वा यदि वा दृप्तः परेषां शरणागतः । अपि प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥' इति ॥

एवं हि ते भवेत्स्वस्ति सम्प्रदाय रघूत्तमे ।
अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण ॥

अनेन महापुरुषापराधनिमित्तं परित्यज्य तमेव शरणं गतश्चेत जीवनं प्राप्नोति, न चेत्समूलं नश्यतीति सूचितम् । तथा च द्रोणपर्वणि शतरुद्रीये— 'असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः । बाहुं सवज्रं तं तस्य क्रुद्धस्यास्तंभयत्प्रभुः ॥ ततः संस्तम्भितभुजः शक्रो देवगणैर्वृतः । जगाम ससुरस्तूर्णं ब्रह्माणं प्रभुमव्ययम् ॥ ते मया सहिता यूयं प्रयाचध्वं तमेव हि । अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा च स महेश्वरम् ॥ अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तं पितामहः । ततः प्रसादयामासुरुमां चन्द्रं च ते सुराः ॥ अभवच्च पुनर्बाहुः प्रकृतिस्थो हि वज्रिणः । तेषां प्रसन्नो भगवान् सपत्नीको वृषध्वजः ॥' इति ॥

वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकाश्चिरम् ।
त्वद्विधं तु न संक्रुद्धो लोकनाथः स राघवः ॥

अनेन अमोघक्रोधहर्षत्वं राज्ञो धर्म इति सूचितम् । तथा च मानवे— 'यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे । मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥' इति । अतथाभूतस्य निन्दा उद्योगे— 'प्रसादो वितथो यस्य कोपश्चापि निरर्थकः । न तं राजानमिच्छन्ति षण्डं पतिमिव स्त्रियः ॥' इति ॥

रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् ।
शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥

इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः ।
इषवो निपातिष्यन्ति रामलक्ष्मणलक्षणाः ॥

रक्षांसि परिनिघ्नन्तः पुर्यामस्यां समन्ततः ।
असंबाधं करिष्यन्ति पतन्तः कङ्कवाससः ॥

अत्र रामकार्मुकशब्दस्याशनिशब्दवदतिभयङ्करत्वप्रतिपादनान्महापुरुषप्रयुक्तं स्वल्पमपि साधनं महत्तरं कार्यं साधयतीति सूचितम् । तथा च विष्णुपुराणे— 'तेषामक्षीणि कर्णांश्च नासिकाश्चैव मायया । निमित्तवेधी स मुनिरैषीकाभिः समार्पयत् ॥ स दृष्ट्वा श्वेतमाकाशमैषीकाभिः समाचितम् । पादयोर्न्यपतद्राजा स्वस्ति मेऽस्त्विति चाब्रवीत् ॥' इति । अत्रैवाग्रे— 'ततस्तं वायसं दर्भैः सोऽम्बरेऽनुजगाम ह । अनुद्रुतस्तदा काको जगाम विविधां गतिम् ॥' इति । प्राचीना अपि— 'रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा निरालम्बो मार्गश्चरणरहितः सार-

थिरपि। रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ॥ विजेतव्या लङ्का चरणतरणीयो जलनिधिर्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः। तथाप्येको रामः सकलमवधीद्राक्षसकुलं क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ॥' इति ॥

राक्षसेन्द्रमहासर्पान् स रामगरुडो महान्।
उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥

अनेन एकोऽपि महापुरुषो बहूनपि शत्रून् समूलमुद्धरिष्यतीति सूचितम्। तथा चोद्योगे सञ्जययाने— 'एकेन पाण्डुपुत्रेण विराटनगरे तदा। भग्ना पलायत दिशः पर्याप्तं तन्निदर्शनम् ॥' इति। तत्रैव— 'भस्म कुर्याज्जगदिदं मनसैव जनार्दनः। न तु कृत्स्नं जगच्छक्तं किंचित् कर्तुं जनार्दने ॥' इति ॥

अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः।
असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥

अनेन पुण्यपुरुषस्य बलात (द्यस्य ?) द्रव्यमन्येनापहृतं चेदपि न गच्छति, किं तु स एव पुनः प्राप्नोतीति सूचितम्। तथा चोद्योगे विदुरः— 'युधिष्ठिरो राजपुत्रो महात्मा न्यायागतं राज्यमिदं च तस्य। स कौरवस्यास्य जनस्य भर्ता प्रशासिता चैव महानुभावः ॥ स सत्यसंधः सततात्रमत्तः शास्त्रे स्थितो बन्धुजनस्य भर्ता। प्रियः प्रजानां सततानुकम्पी जितेन्द्रियः साधुजनस्य भर्ता ॥ क्षमा तितिक्षा दम आर्जवं च सत्यव्रतत्वं

जठरं प्रविशेम वयं शुभे ॥ जातान् कुमारान् स्वानप्सु प्रक्षेप्तुं वै त्वमर्हसि । यथा न चिरकालं नो निष्कृतिस्स्यात्त्रिलोकगे ॥' इति ॥

परवश्यत्वं क्लेशकरमित्येतदपि भारते भीमं प्रति द्रौपदीवचने— 'पार्थिवाः पृथिवीपाल यस्यासन्वशवर्तिनः । स वशे विवशो राजा परेषामद्य वर्तते ॥ सूपकारं विराटस्य वल्लवं त्वां विदुर्जनाः । प्रेष्यत्वं समनुप्राप्तं ततो दुःखतरं नु किम् ॥' इति ॥

इति पञ्चविंश सर्गः ।

अथ षड्विंशः सर्गः ॥

षड्विंशे— अथ बाष्पदूषितलोचना दीर्घमुष्णं विनिश्वस्याधोमुखी सुचिरं विललाप । सकलजीवलोकशरण्यस्य ससागरमहीमहेन्द्रस्य रामभद्रस्य पार्श्ववर्तिन्यपि अशरणेव रावणेन बलादानीय सुदारुणं निर्भर्त्सितास्मि । हा प्रियंवद रामभद्र प्रसीद । दर्शयात्मनो भक्तवत्सलताम । परिपूरय मनोरथम । कथय किमपराद्धं मया, यदहमनाथेव त्वया नावलोकिता । धिङ्मामनार्यामसदृशकारिणीम , याहं रामचन्द्रेण विनाकृता दुरात्मना निशाचरेणेमामवस्थां प्रापितापि जीवामि । प्रियतमविहीनायाः किमनेन मम जीवितेन ॥

कामं खादत मां सर्वा न करिष्यामि वो वचः ।

राक्षसाधमं रावणं वामचरणेनापि न स्पृशामि । यदि नाम रामभद्रो मामिहस्थां जानीयादद्यैव रुक्मपुङ्खैर्विशिखै-

विंशीर्य प्राकारमवमथ्य च रक्षःकुलं रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥

ततो निहतनाथानां राक्षसीनां गृहे गृहे ।
यथाहमेवं रुदती तथा भूयान्न संशयः ॥

चिताधूमाकुलपथा गृध्रमण्डलसंकुला ।
अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ।
अचिरेणैव कालेन प्राप्स्याम्येवं मनोरथम् ॥

अत्रावश्यं लंका भस्मीभविष्यतीति सीतया शापः कृतः। तदनुरूपतया चाचिराल्लंका तथा जाता । अतोऽन्यासामपि पतिव्रतानां शापो दुष्परिहर इति सूचितम् । अत एव पार्वत्याः शापो देवानाममोघ इत्युक्तं बालकाण्डे— 'अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हथ । अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ एवमुक्त्वा सुरान् सर्वान् शशाप पृथिवीमपि । अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥ न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता । प्राप्स्यासि त्वं सुदुर्मेधे मम पुत्रमनिच्छती ॥ शैलपुत्र्या यदुक्तं तन्न प्रजाः स्वासु पत्निषु । तस्या वचनमक्लिष्टं सत्यमेव न संशयः ॥' इति ॥

अकार्यं ये न जानन्ति नैर्ऋताः पापकारिणः ।
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥

अनेनाधर्मातिशयेनोत्कटपातलक्षणो विनाशः सद्य एव भवतीति सूचितम् । तथा चोद्योगपर्वणि नहुषं प्रति अगस्त्यः— 'अधर्मे संप्रवृत्तस्त्वं धर्मं न प्रतिपद्यसे । अदुष्टं दूषयसि मे

यश्च मूर्ध्न्यस्पृशः पदा ॥ यच्चापि त्वमृषीन् मूढ ब्रह्मकल्पान्-दुरासदान् । वाहान् कृत्वा वाहयासि तेन स्वर्गाद्धतप्रभः ॥ ध्वंस पाप परिभ्रष्टः क्षीणपुण्यो महीतले । एवं भ्रष्टो दुरात्मा स देवराज्यादरिन्दम ॥ हृतश्च नहुषः पापो दिष्ट्यागस्त्येन धीमता । दिष्ट्या पापसमाचारः कृतः सर्पो महीतले ॥' इति । कामन्दकेऽपि— 'अधर्माच्चैव नहुषः प्रतिपेदे रसातलम्' इति ॥

तदिदानीमधर्मपरेण निशाचरेण प्रतिज्ञातम्— मासद्वयातिक्रमे प्रातराशायोपकल्पनीयेति । मया किमत्र प्रतिविधातव्यम् । नूनं स रामभद्रो जीवन्तीं मां न जानाति । यदि जानीयात्, मामविचिन्त्य न स्थास्यति । अथवा, मदीयशोकानलदह्यमानमानसः परित्यज्य कलेबरं देवलोकं प्रतियातो भवेत् । अथवा लोकनायकस्य तस्य भार्यया मया न किंचिदपि प्रयोजनमस्ति इति तर्कयामि ॥

दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यपश्यतः ।
नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥

अनेन मध्यमाः पुरुषाः प्रत्यक्षे प्रीतिं कुर्वन्ति, न परोक्षे । तथा चोक्तम्— 'स्नेहः प्रवासाश्रयात्' इति । अधमाः कृतघ्नास्तु परोक्षापरोक्षयोरहितकारिण एव भवन्ति। सन्तस्तु परोक्षापरोक्षयोर्हितकारिण एव भवन्तीति सूचितम् । तथा च **राजधर्मे**— 'कानि लिंगानि दुष्टस्य भवन्ति द्विजसत्तम । कथं दुष्टं विजानीयामेतत्पृष्टो वदस्व मे ॥' इतीन्द्रपृष्टो बृहस्पतिः— 'परोक्षमगुणानाह सद्गुणानवमन्यते । अदृष्टितो विकुरुते दृष्टो नैवाभि-

भाषते ॥ परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः । सत्स्वेतद्वि-
परीतं हि बुध्येथास्त्रिदशेश्वर ॥' इति ॥

नूनं लंका हते पापे रावणे राक्षसाधमे ।
शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥

अनेन विधवाभिरामरणं शरीरशोषणं कर्तव्यमिति सूचितम् । तथा च मनुः— 'कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ॥ एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा ॥ यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥' इति ॥ तदिदानीमपारशोकसागरनिमग्नापि मर्तुं नेच्छामि ।

धन्याः खलु महात्मानो मुनयः सत्यसंमताः ।
जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥

प्रियाच्च संभवेद् दुःखमप्रियादधिकं भयम् ।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥

अनेन शीतोष्णसुखदुःखादिद्वंद्वेषु समबुद्धीनामिह दुःखं न जायते । परमपुरुषार्थप्राप्तिश्च भवतीति सूचितम् । तथा च गीतासु— 'यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् । स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ शक्नोतीहैव यः सोढुं

सीनामसदृशवचनजातमाकर्ण्य विदीर्णहृदया हृदयदयितं ध्यायन्ती जनकनन्दिनी एवमवादीत्—

यदिदं लोकविद्विष्टमुदाहरथ संगताः ।
नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥

अनेन लोकविद्विष्टं पापाधायकं वर्जनीयमिति सूचितम् । तथा च मनुः — 'अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ।' इति ॥

न मानुषी राक्षसस्य भार्या भवितुमर्हति ।
कामं खादत मां सर्वा न करिष्यामि वो वचः ॥

अनेन परमापद्यपि स्वधर्मं न त्यजेदिति सूचितम् । तथा च मनुः— 'न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ।' इति । भारतेऽपि— ' न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ।' इति ॥

दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ।
तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥

अनेन दुर्गतोऽपि भर्ता आदरेण सेव्यो न परित्याज्य इति सूचितम् । तथा च हरिवंशे— 'व्याधितः पतितो वापि दीनो वापि कथंचन । न त्यक्तव्यः स्त्रिया भर्ता धर्म एष सनातनः ॥' इति ॥

यथा शची महाभागा शक्रं समुपतिष्ठति ।
अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥

लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा ।
सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥
सौदासं मदयन्तीव केशिनी सगरं यथा ।
नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥
तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता ।

अत्र दृष्टान्तकथनव्याजेनापि पतिव्रतासंकीर्तनादव्यवधानेन श्रेयसः सीतया प्राप्तत्वात् पतिव्रतासंकीर्तनं श्रेयःप्रदमिति सूचितम् ॥

तथा च **विराटपर्वणि** द्रौपदीं प्रति भीमः— 'पुरा सुकन्या भार्या च भार्गवं च्यवनं वने । वल्मीकभूतं शाम्यन्तमन्वपद्यत भामिनी ॥ नारायणी चेन्द्रसेना रूपेण यदि ते श्रुता । पतिमन्वचरद्वृद्धं पुरा वर्षसहस्रिणम् ॥ दुहिता जनकस्यापि वैदेही यदि ते श्रुता । पतिमन्वचरत्सीता महारण्यनिवासिनम् ॥ रक्षसा निग्रहं प्राप्य रामस्य महिषी प्रिया । क्लिश्यमानापि सुश्रोणी राममेवान्वपद्यत ॥ लोपामुद्रा तथा भीरु वयोरूपसमन्विता । अगस्त्यमन्वयाद्धित्वा कामान्सर्वानमानुषान् ॥ द्युमत्सेनसुतं वीरं सत्यवन्तमनिन्दिता । सावित्र्यनुचचारैका यमलोकं मनस्विनी ॥ अथैताः कीर्तिता नार्यः पापहाराः पतिव्रताः । तथा त्वमपि कल्याणि सर्वैस्समुदिता गुणैः ॥' इति ॥

स्कान्देऽपि बृहस्पतिः— 'पतिव्रतेयं कल्याणि लोपामुद्रा सुधर्मिणी । तथाङ्गच्छायया तुल्या यस्कथा पुण्यकारिणी ॥' इति । **कौस्तुभमयूखयोरपि**— 'अहल्या द्रौपदी सीता तारा

मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम् ॥'
इति ॥

तदनु निशाचरीकृतसंतर्जनभयेन वेपमानतनुलतामश्रुमुखीं शिंशुपामूलमागतां विनताभिधा निशाचरी—

सीते पर्याप्तमेतावद्भर्तृस्नेहो निदर्शितः ।
सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥

इत्यवादीत् । अनेन अतिकारः सर्वत्र गर्हित इत्युक्तम् । तदुक्तम्— 'अति सर्वत्र गर्हितः' इति ॥

इति त्रयोविंशचतुर्विंशौ सर्गौ ।

अथ पंचविंशः सर्गः ॥

पञ्चविंशे— ततः प्रसन्नमानसा रावणं भर्तारमासाद्य भुङ्क्ष्व भोगान् यथेप्सितान् । न चेदद्यैव त्वां व्यापाद्य यथेप्सितं साधयाम इति सर्वाभिर्भर्त्स्यमाना सीता परित्यज्य धैर्यं सुचिरमश्रूणि मुञ्चन्ती तामेवाशोकशाखामालम्ब्य विक्लबहृदया रामलक्ष्मणौ संस्मृत्य सगद्गदमेवमवादीत्—

लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ।
अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥

अनेन मृत्युर्यस्मिन्काले विहितस्तस्मिन्नेव काले जायते, नाकाले इति सूचितम् । तथा च वनपर्वणि नलोपाख्याने

दमयन्ती— ' नाकाले विहितो मृत्युर्मर्त्यानां पुरुषर्षभ । यत्र कान्ता त्वयोत्सृष्टा मुहूर्तमपि जीवति ॥ नाप्राप्तकालो म्रियते श्रुतं वृद्धानुशासनम् ।' इति ॥

कीदृशं तु मया पापं पुरा देहान्तरे कृतम् ।
येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥

अनेन पूर्वजन्मकृतदुष्कृतानुरूपमेव दुःखमिहजन्मनि प्राप्यत इति सूचितम् । तथा च स्मृतिः— ' यथा गवां सहस्रेषु वत्सो विन्दति मातरम् । एवं पूर्वकृतं कर्म कर्तारमनुविन्दति ॥ ' इति । मोक्षधर्मेऽपि— ' निरन्तरं च मिश्रं च फलते कर्म पार्थिव । कल्याणं यदि वा पापं न तु नाशोऽस्य विद्यते ॥ कदाचित्सुकृतं तावत्कूटस्थमिव तिष्ठति । मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते ॥ ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते । सुकृतक्षयाद्दुष्कृतं च तद्विद्धि मनुजाधिप ॥ ' इति ॥

धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ।
न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥

अनेन मनुष्यजन्म क्लेशकरम् , तत्रापि परवश्यत्वमतिक्लेशाधायकमित्युक्तम् । अत एव मानुषा भवतेति वसूनां वसिष्ठशापः, वसूनां च मनुष्यजनिजुगुप्सा, उत्पत्तिश्चेदपि अवस्थानपरिहारायोत्पन्नमात्राणामेव जले प्रक्षेपप्रार्थनं च गङ्गां प्रति प्रतिपादितमादिपर्वणि— ' सन्ध्यां वसिष्ठमासीनं समेत्याभिसृताः पुरा । तेन कोपाद्वयं शप्ता योनौ संभवतेति ह ॥ त्वमस्मान्मानुषी भूत्वा सूष्व पुत्रान् वसून् भुवि । न मानुषीणां

श्रुतमप्रमादः । भूतानुकम्पा ह्यनुशासनं च युधिष्ठिरे राजगुणाः समस्ताः ॥ क्रमागतं राज्यमिदं हि तेषां हर्तुं कथं शक्ष्यति दुर्विनीतः ॥' इति ॥

जनस्थाने हतस्थाने निहते रक्षसां बले ।
अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥

आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः ।
गोचरं गतयोर्भ्रात्रोरपनीता त्वयाधम ॥

न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया ।
शक्यं संदर्शने स्थातुं शुना शार्दूलयोरिव ॥

तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरम् ।
वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य निग्रहः ॥

क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ।
तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥

अनेन बलवद्विरोधिनः समूलनाशो भवतीति सूचितम् । तथा च प्राचीनाः— 'अनुचितकर्मारम्भः स्वजनविरोधो बलीयसि स्पर्धा । प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥' इति ॥

गिरिं कुबेरस्य गतोऽथवालयं
सभां गतो वा वरुणस्य राज्ञः ।
असंशयं दाशरथेर्न मोक्ष्यसे
महाद्रुमः कालहतोऽशनेरिव ॥

अनेन बलवद्विरोधिनोऽन्यः कोऽपि रक्षको न भविष्यतीति सूचितम् । तथा च विराटपर्वणि— 'अन्तर्महीं वा यदि वोर्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि । तथापि तेभ्यो न विमोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः ॥ तेषां प्रियां प्रार्थयनो न ते भुवि गत्वा दिवं वा शरणं भविष्यति । न वर्तते कीचक ते दृशा शुभं या तेन संजीवनमर्थयेत ॥' इति ॥

इति एकविंशः सर्गः ।

अथ द्वाविंशः सर्गः ।

द्वाविंशे— इति जनकदुहितुरनवधिमवधीरणाफणितिमाकर्ण्य कोपसंरक्तलोचनो दशाननः परुषतरमेवमभाषत—

यथा यथा सान्त्वयिता वश्यः स्त्रीणां तथा तथा ।
यथा यथा प्रियं वक्ता परिभूतस्तथा तथा ॥

सन्नियच्छति मे क्रोधं त्वयि कामः समुत्थितः ।
द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥

वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ।
जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥

एतस्मात्कारणान्न त्वां घातयामि वरानने ।
वधार्हामवमानार्हां मिथ्याप्रव्रजिते रताम् ॥

परुषाणीह वाक्यानि यानि यानि ब्रवीषि माम् ।
तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः ॥

अत्र यावद्यावत्कुपितां सान्त्वयति तथा तथा स्त्रीवश्यो भवति। यथा यथा अभिनवप्रीतिं संपादयति, तथा तथा परिभूयते च। अतो निग्रह एव कर्तव्यतया प्राप्तः। तत्र कामपुरुषार्थः प्रतिबन्धको भवति। कामस्यायं स्वभावः— सदोषेऽपि वस्तुनि प्रीतिं पुनः पुनरुत्पादयतीति। ततस्त्वदधीनं कामपुरुषार्थं मत्वा प्रतिपरुषभाषणं चित्रवधार्हामपि त्वां न निगृह्णामि इत्युक्त्या स्त्रीषु अत्यासक्तेरवमानादिसंपादकत्वादतिशयतिरस्कारस्य च कामपुरुषार्थहानिकरत्वादत्यन्तमनासक्त एव मध्यमया वृत्त्या कामपुरुषार्थं सेवेत इति सूचितम्। तथा चानुशासनिके— 'संपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु। अपास्ताश्च तथा राजन् विकुर्वन्ति मनः स्त्रियः॥ सत्कृतासत्कृताश्चापि विकुर्वन्ति मनः सदा। नासां स्नेहो नरैः कार्यस्तथैवेर्ष्या जनेश्वर॥ खेदमास्थाय भुंजीत धर्ममास्थाय चैव ह। निहन्येतान्यथा कुर्वन्नरः कौरवनन्दन॥' इति॥

ततश्च मत्संगममनिच्छन्तीं त्वां मासद्वयानन्तरं प्रातरशनाय कल्पयिष्यन्ति सूदा इति बहुविधमभितर्जिता जानकी रावणेन सहागताभिर्देवगन्धर्वकन्यकाभिर्नेत्रभ्रूवलनादिभिः परिसांत्व्यमाना रावणं साधिक्षेपमित्थमाचचक्षे— धर्मैकनिष्ठस्य महानुभावस्य रामस्य भार्यां दशरथस्नुषां च मां दुष्टेन चक्षुषा पश्यतः साभिलाषं वचनं चेदमुदाहरतस्तव नयनस्फोटनं रसनाविदारणं चाचिरादेव भविष्यति। अहं तु निखिलमपि जगत् स्वतेजसा भस्मसात्कर्तुं समर्थापि—

असन्देशात्तु रामस्य तपसश्चानुपालनात् ।
न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा ॥

अनेन भर्तुराज्ञां विना स्त्रीभिः किंचिदपि न कर्तव्यमिति सूचितम् । एतच्च प्राक् प्रपञ्चितम् ॥

ततस्तद्वचनाकर्णनजनितक्रोधसंरक्तलोचनः—

उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ।
यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥
तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ।

तत इत्थं वदन्तं रावणमालिङ्ग्य धान्यमालिनी—

अकामां कामयानस्य शरीरमुपतप्यते ।
इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥

अनेन परस्परानुराग उभयोः सौख्यप्रदः । अन्यतरानुरागस्तु अन्यतरसन्तापकर इति सूचितम् । तथा च मनुः— 'सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च । यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥' इति । स्मृत्यन्तरेऽपि— 'स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम्' इति । ततश्च वितथप्रयत्नो दशग्रीवो विहाय सीतां भास्वरं स्वं वेश्म प्रविवेश ॥

इति द्वाविंशः सर्गः ।

अथ त्रयोविंशचतुर्विंशौ सर्गौ ॥

त्रयोविंशचतुर्विंशयोः— अथ यथागतं गतवति दशानने रोषभीषणपरुषभाषणवीक्षणानामेकजटाविकटादुर्मुखीप्रभृतीनां राक्ष-

प्राक् शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥' इति ॥

इति षड्विंशः सर्गः ।

अथ सप्तविंशः सर्गः ॥

सप्तविंशे— ततस्तत्रैव शयाना त्रिजटा निशाचरी जानकीतर्जनप्रवृत्ता राक्षसीरवलोक्य ससम्भ्रममिदमाह—अलमनेन जनकनन्दिनीभर्त्सनेन । रामो ह्यतिधवलगजदन्तमयीं शिबिकामास्थाय विरजोऽम्बरधारिणा सौमित्रिणा विमलक्षौमसंवीतया जानक्या च सह सकलसुरासुरसिद्धगन्धर्वैश्च संस्तूयमानो लंकां प्रविष्टो मया स्वप्ने दृष्टः । रावणस्तु नीलाम्बरपरिवृतो रक्तमाल्यानुलेपनो मुण्डितशिराः पुष्पकान्निपतितः खरयानमधिरुह्य विगतवसनः पंकविलिप्तगात्रो वराहशिंशुमारादिवाहनमास्थितैस्तैलपानप्रवृत्तैरिन्द्रजित्कुम्भकर्णप्रमुखैः सह सागरं प्रविष्टः । तेष्वेको विभीषणश्चतुर्भिस्सहामात्यैः परित्यज्य लंकामधिरुह्य च दिव्यं गजं श्वेतच्छत्रावृताननः शुक्लमाल्याम्बरधरो मया विलोकितः । अतो रामः सीतामवाप्स्यति, रावणं च हनिष्यति । सीतायाश्च मुखप्रसादवामाङ्गस्फुरणादिभिः पक्षिस्वनैश्च पुरःस्थितं रामभद्रमवगच्छामि । तदिदानीं सीतामेव शरणं गतानामस्माकं जीवनं भवेदिति तर्कयामि—

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ।
अलमेषा परित्रातुं राक्षसीर्महतो भयात् ॥

इति सप्तविंशः सर्गः ।

अथ अष्टाविंशः सर्गः ॥

अष्टाविंशे— ततः सीता त्रिजटावचनमपि मायोदीरित-मिति शंकया रावणकृतसंतर्जनक्लेशेन च देहपरित्याग एव कृतनिश्चया बहुधा विललाप—

नैवास्ति दोषो मम नूनमत्र वध्याहमस्याप्रियदर्शनस्य ।
भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥

अत्र 'नैवास्ति दोषो मम नूनमत्र' इति परपुरुषांगीकरणा-पेक्षया आत्महत्यापि न दोषायेत्युक्तत्वात् जीवितादपि धर्मरक्षण-माधिकमिति सूचितम् । तथा च **भारते**— 'न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ।' इति । 'मन्त्रमिवाद्विजाय' इत्यनेन, ब्राह्मणो मन्त्रमद्विजाय शूद्राय प्राणात्ययेऽपि न दद्या-दिति सूचितम् । तथा च **श्रुतिः**— 'न शूद्राय मतिं दद्यात्' इति । **स्मृतिरपि**— 'उपदेशो न कर्तव्यो जातिहीनस्य कस्य-चित् । उपदेशे महान् दोष उपाध्यायस्य भाष्यते ॥ महान् क्लेशो हि भवति तस्मान्नोपदिशेदिह ।' इति । **मनुरपि**— 'न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् । सोऽसंवृतं नाम तमः सह तेनैव मज्जति ॥' इति ॥

नूनमयं निशाचरेन्द्रः शल्यकृन्त इव ममाङ्गानि छेत्स्यति ।

दुःखं बतेदं मम दुःखिताया मासौ चिरायाधिगमिष्यतो द्वौ ।
बद्धस्य वध्यस्य यथा निशान्ते राजापराधादिव तस्करस्य ॥

अनेन दिवा लब्धस्य वध्यस्य चोरस्य सद्य एव वधः, रात्रौ लब्धस्य दोषपरिज्ञानाय प्रख्यापनाय च बन्धनादिना उदयपर्यन्तं रक्षितस्य उदयानन्तरं वधः कर्तव्य इति सूचितम्। तथा च मनुः—'तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्वतः। कुर्वीत शासनं राजा सम्यक् सारापराधतः॥ सन्धिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्त्वा नृपो हस्तं तीक्ष्णशूले निवेशयेत॥ अङ्गुली ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे। द्वितीये हस्तचरणौ तृतीये वधमर्हति॥' इति। अस्यार्थः—सन्धिच्छेदं भित्तिच्छेदम्। निवेशयेत आरोपयेत। ग्रन्थिभेदस्य ग्रन्थिमोक्षणेन पटादौ बद्धं सुवर्णादिद्रव्यमपहरतः पुरुषस्य अंगुली अंगुष्ठतर्जन्यौ छेदयेत्। इदं सकृदपहरतः। द्वितीयवारमपहरतो हस्तचरणौ छिन्द्यात्। तृतीये वध एव इति॥

अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे।
पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम्॥

अत्र सीतया पातिव्रत्यं व्यर्थमिति प्रतिपादनं निर्वेदवशात्। वस्तुतस्तु तत्सफलमित्येव सीताया अभिप्रायः। अत एव 'यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः। यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः॥' इत्यग्रेतनं सीताप्रतिज्ञावचनम्, 'दह्यमाने च लाङ्गूले चिन्तयामास वानरः। प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः॥ दृश्यते च महाज्वालो न करोति च मे रुजम्। शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः॥' इति हनूमल्लांगूलदाहाभावरूपफलप्रतिपादनं च संगच्छते इति॥

पितुर्निदेशं नियमेन कृत्वा
वनान्निवृत्तश्चरितव्रतश्च ।
स्त्रीभिश्च मन्ये विपुलेक्षणाभि-
स्त्वं रंस्यसे वीतभयः कृतार्थः ॥

अहं तु राम त्वयि जातकामा
चिरं विनाशाय निबद्धभावा ।
मोघं चरित्वाथ तपो व्रतं च
त्यक्ष्यामि धिक् जीवितमल्पभाग्या ॥

अनेन पुरुषस्य भार्यान्तरमस्ति, स्त्रीणां तु भर्त्रन्तरं नास्तीति सूचितम् । तथा च तैत्तिरीयश्रुतिः— 'यदेकस्मिन्यूपे द्वे रशने परिव्ययति । तस्माद्वे जाये विन्दते । यन्नैकाँ रशनां द्वयोर्यूपयोः परिव्ययति । तस्मान्नैका द्वौ पती विन्दते ।' इति । मनुरपि— 'न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ।' इति ॥

इति अष्टाविंशः सर्गः ।

अथ एकोनत्रिंशः सर्गः ॥

एकोनत्रिंशे—

तथागतां तां व्यथितामनिन्दितां
व्यपेतहर्षां परिदीनमानसाम् ।
शुभाकानिमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्टमिवोपजीविनः ॥

यदि चेद्योधयिष्यामि हर्तारं रामकारणात् ।
व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥

अनेन दूतस्य मुख्यशत्रुहननपूर्वकं कृत्स्नकार्यनिर्वहणमधर्म इति सूचितम् । तथा चोद्योगे भगवद्याने विदुरवाक्ये शक्तेनापि दूतेन कृत्स्नकार्यनिर्वहणमयुक्तमिति प्रतिपादितम्— 'अयमिच्छन् हि तान्सर्वान् युध्यमानान् जनार्दनः । सिंहो मृगानिव क्रुद्धो गमयेद्यमसादनम् ॥ न त्वयं निन्दितं कर्म कुर्यात् कृष्णः कथंचन । न च धर्मादतिक्रामेदच्युतः पुरुषोत्तमः ॥' इति । भगवानपि—'एतान् हि सर्वान् सरथान् निहन्तुमहमुत्सहे । न त्वहं निन्दितं कर्म कुर्यां पापं कथंचन ॥ अद्यैव ह्यहमेतांश्च ये चैताननु भारत । निगृह्य राज्यं पार्थेभ्यो दद्यां किं दुष्करं भवेत् । इदं नाहं प्रवर्तेय निन्दितं कर्म पार्थिव ॥' इति ॥

असत्यानि च युद्धानि संशयो मे न रोचते ।
कश्च निःसंशयं कार्यं प्राज्ञः कुर्यात्ससंशयम् ॥

अनेन निःसंदिग्धतया कार्यसाधनसंभवे संशयिते मार्गे न प्रवर्तितव्यमिति सूचितम् । तथा च कामन्दकः— 'निष्फलं क्लेशबहुलं संदिग्धफलमेव च । न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च ॥' इति ॥

भूताश्चार्था विपद्यन्ते देशकालविरोधिताः ।
विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥
अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते ।
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥

घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ।

अनेन समर्थः कार्यसाधकः असमर्थः कार्यनाशक इत्युक्तम् । अत एव समर्थस्यैव दूतस्य प्रेषणं कर्तव्यम्, नासमर्थस्येत्युक्तं राजधर्मे—'मूढमैन्द्रियकं लुब्धमनार्यचरितं शठम् । अनतीतो पधं(?) हिंस्रं दुर्बुद्धिमबहुश्रुतम् ।। त्यक्तोपात्तं मद्यहितं द्यूतस्त्रीमृगयापरम् । कार्ये महति युञ्जानो हीयते स नृपः श्रिया ।। अप्रकीर्णेन्द्रियं प्राज्ञमत्यन्तानुगतं शुचिम् । शक्तं चैवानुरक्तं च युंज्यान्महति कर्मणि ।। एवमेतैर्गुणैर्युक्तो योऽनुरज्यति भूमिपम् । भर्तुरर्थेष्वसंतप्तं नियुंज्याद्धर्मकर्मणि ।।' इति ।।

न विनश्येत्कथं कार्यं वैक्लब्यं न कथं भवेत् ।
लंघनं च समुद्रस्य कथं नु न वृथा भवेत् ।।

कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत वा ।
इति संचिन्त्य हनूमांश्चकार मतिमान् मतिम् ।।

इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः ।
शुभानि धर्मयुक्तानि वचनानि समर्थयन् ।।

श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन् गिरम् ।
श्रद्धास्यति यथा हीयं तथा सर्वं समादधे ।।

अनेन कर्मणां परिपाकं गुणदोषादिकं च विचार्य कार्यसिद्धिकरं कर्मारभेतेति सूचितम् । तथा चोद्योगे विदुरः—'वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु । परीक्ष्यकारिणं वीरमत्यन्तं श्रीर्निषेवते ।। अनुबन्धानवेक्षेत सानुबन्धेषु कर्मसु । संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ।। अनुबन्धं च संप्रेक्ष्य

बिपाकं चैव कर्मणाम्। उत्थानमात्मनश्चैव धीरः कुर्वीत मानव॥' इति॥

हरिवंशे इन्द्रं प्रति नारदः— 'हितानुबन्धसहितं कार्यं ज्ञेयं सुरेश्वर। विपरीतं च तद्बुद्ध्वा नित्यं बुद्धिमतां वर॥ यत्स्यात्तापकरं पश्चादारब्धं कार्यमीदृशम्। आरम्भेनैव तत्त्याज्यादेष बुद्धिमतां नयः॥' इति। अयमभिप्रायः— अनुकूलफलजनकं कर्म कर्तव्यत्वेन जानीयात्। प्रतिकूलं पश्चात्तापकरत्वान्नारभेत। आरब्धमपि त्यजेत्। [तथा चोक्तं] 'सहसैव तु कार्याणामारम्भो न प्रशस्यते।' इति। प्राचीना अपि— 'उचितमनुचितं वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नतः पण्डितेन। अतिरभसकृतानां कर्मणामा विपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः॥' इति। 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥' इति च॥ कामन्दकेऽपि— 'तस्मिन् कर्मणि सज्येत तदात्वे कटुकेऽपि च। बुद्ध्वैवोपक्रमः श्रेयान् फलनिष्पत्तये सदा॥' इति॥

इति त्रिंशः सर्गः।

अथ एकत्रिंशद्द्वात्रिंशौ सर्गौ॥

एकत्रिंशद्द्वात्रिंशयोः— ततो जनकनन्दिनीप्रत्ययोत्पादनाय

राजा दशरथो नाम रथकुञ्जरवाजिमान्।
पुण्यशीलो महाकीर्तिर्ऋजुरासीन्महायशाः॥

तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ।
रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
रक्षिता जीवलोकस्य धर्मस्य च परंतपः ॥

सोऽयं पितृवचनपरिपालनाय सानुजः सभार्यो वनं प्रविवेश । ततो मुनिसंत्राणाय खरदूषणप्रमुखान्निशाचरान् निषूदयतो रामभद्रस्य भार्या राक्षसेन मायाविनापहृतासीत् । ततो रामभद्रस्ततस्ततः सीतां विचिन्वन् तदलाभजनितक्लेशेन दूयमानमानसो मित्रं सुग्रीवं संप्राप्य तद्भ्रातुर्वालिनो वधम्, तस्य राज्याभिषेकं च विधाय सीतागवेषणाय वानरान् सर्वतः प्रस्थापयामास। अहमपि दाक्षिणस्यां दिशि गवेषणीयान् देशानखिलानपि सम्यगवलोक्यालब्धसीतावृत्तान्तः संपातिवचनेन रावणनिलयं लंकामेकाकितया प्रविष्टोऽस्मि । सेयं क्लिष्टवसनाभरणा चारित्रभूषणसमलंकृता क्रूराभी राक्षसीभिस्तर्जिता च राममेव मनसा ध्यायन्ती जनकतनया शिंशुपामूले मया दृष्टेत्येतावदुक्त्वा विरराम ॥

ततस्तथा वदन्तं हनूमन्तं वानररूपमवलोक्य चकितहृदया जनकतनया चिन्तामेवं ततान—

स्वप्ने मयायं विकृतोऽद्य दृष्टः
शाखामृगः शास्त्रगणैर्निषिद्धः ।
स्वस्त्यस्तु रामाय सलक्ष्मणाय
तथा पितुर्मे जनकस्य राज्ञः ॥

सुदृशां चूचुकयुगं शस्तं श्यामं सुवर्तुलम् ॥ गम्भीरा दक्षिणावर्ता नाभिः स्यात्सुखसंपदे। अष्टादशांगुलततमूरु पीवरमुन्नतम् ॥ सुखाय दुःखाय भवेद्रोमशं विषमं पृथु ॥' इति ॥

मम वर्णो मणिनिभो मृदून्यंगरुहाणि च।
प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणाम् ॥

अत्र पादतलद्वयं तद्दशांगुळयश्च यस्याः समतलं तिष्ठति सा द्वादशभिः प्रतिष्ठितेत्युक्तम्। तथा च सामुद्रिके— 'यस्याः समतलौ पादौ समहीनांगुळी क्रमात्। सर्वं प्रतिष्ठितं भूमौ सा नारी सुखमेधते ॥' इति ॥

समग्रयवमच्छिद्रं पाणिपादं च वर्णवत्।
मन्दस्मितेत्येव च मां कन्यालक्षणिनो विदुः ॥

समग्रयवाकृतिरेखायुक्तत्वमच्छिद्रांगुलियुक्तत्वादिकमुत्तमस्त्रीणां लक्षणमुक्तम्। तथा च सामुद्रिके-- 'शंखपद्मयवच्छत्रमालामत्स्यध्वजादयः। पाणिपादे भवन्त्येव राज्ञां तद्योषितां तथा ॥' इति। स्कान्देऽपि—'मृदु मध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम्।' इति। वाहटेऽपि— 'तनुरक्तोन्नतनखं स्निग्धमाताम्रमांसलम्। दीर्घाच्छिद्राङ्गुलि महत्पाणिपादं प्रतिष्ठितम् ॥' इति। मन्दस्मितत्वं च स्कान्दे—'अलक्षितद्विजं किंचित्किंचित्फुल्लकपोलकम्। स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् ॥' इत्युत्तमस्त्रीलक्षणान्युक्तानि ॥

इत्थमुत्तमस्त्रीलक्षणयुक्तत्वादेव सीता कफप्रकृतिर्देवसत्वा च भवति। तथा च प्राचीनाः— 'सुस्निग्धदन्तनखलोचनपद्मकु-

म्मा मानोन्नता प्रियतमे सुदृढानुरागा । श्यामाथ शीतमृदुमांसलगुप्तगात्रा प्रोक्ता कफप्रकृतिरेव वरा पुरन्ध्री ॥ प्रसन्नवक्त्राम्बुजसौरभाङ्गी सन्तोषयुक्ता शुचिकर्मदक्षा । प्रियंवदा भूरिधना जनाढ्या नारीयमुक्ता खलु देवसत्वा ॥ ' इति ॥

रेखालक्षणान्यपि सामुद्रिके— ' रेखाभिरंगुष्ठतलेंगनानां पुंस्त्रीप्रसूतिर्विपुलाल्पिकाभिः । अच्छिन्नभिन्नाभिरखण्डमायुः खंडं तदन्याभिरमूभिरस्याः ॥ एका तिर्यक् तर्जनीं याति रेखा तर्जन्यंगुष्ठान्तरालं तदन्या । ते द्वे स्यातामायुरैश्वर्यरेखे तत्सौन्दर्ये सुन्दरत्वं तदा स्यात ॥ ' इति ॥

इत्थमन्यत्रापि सीताया मृदुभाषणं मनस औन्नत्यं नयनानन्दकरावयवयुक्तता पापपराङ्मुखबुद्धित्वं चेति प्रतिपादितानि लक्षणानि तत्र तत्र । अर्चितवचनवत्त्वं चात्रैव काण्डे— ' युक्तरूपं त्वया देवि भाषितं प्रियदर्शने । सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥' इति । तथा मनस औन्नत्यमपि—'उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम । राक्षसाधम रामस्य भार्याममिततेजसः ॥ उक्तवानसि यत्पापं क गतस्तस्य मोक्ष्यसे । यथा दृप्तश्च मातंगः शशश्च सहितौ वने ॥ तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ।' इति ॥ दर्शनीयावयवसंस्थानवत्त्वमपि—'त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत । न हि रूपोपमाप्यन्या तवास्ति शुभदर्शने ॥ यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने । तस्मिंस्तस्मिन् पृथुश्रोणि चक्षुर्मम निबध्यते ॥ ' इति ॥

पापपराङ्मुखत्वमपि— ' यदिदं लोकविद्विष्टमुदाहरथ सं-

गताः । नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति च ॥ न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥' इति। युद्धकाण्डेऽपि—'आज्ञप्ता रावणेनैता राक्षस्यो मामतर्जयन्। हते तस्मिन्न कुर्युर्हि तर्जनं वानरोत्तम ॥ न परः पापमादत्ते परेषां पापकर्मणाम् । समयो रक्षितव्यो हि सन्तश्चारित्रभूषणाः ॥ युक्ता रामस्य भवती धर्मपत्नी यशस्विनी ।' इति। एतेषां च उत्तमस्त्रीलक्षणत्वं सामुद्रिके— 'अर्चितं वचनमुन्नतं मनो निर्विशेषसुखदं दृशां वपुः । अस्ति चेदघपराङ्मुखी मतिर्लक्षणैः किमपरैर्नृयोषिताम् ॥' इति ॥

सा वीतशोका व्यपनीततन्द्री
शान्तज्वरा हर्षविवृद्धसत्वा ।
अशोभतार्या वदनेन शुक्ले
शीतांशुना रात्रिरिवोदितेन ॥

अनेन मुखप्रसादो मनःप्रसादश्च शुभसूचक इत्युक्तम् । तथा च ज्योतिर्निबन्धे—'निमित्तराशिरेकतो नृणां मनस्त्वथैकतः' इति ॥

इति एकोनत्रिंशः सर्गः ।

अथ त्रिंशः सर्गः ॥

त्रिंशे— ततो हनूमान् निशाचरीगणसंतर्जनेनातिदीनायाः सीतायास्त्रिजटाकृतं समाश्वासनं निशम्य स्वयमपि तत्कालोचितमित्थमचिन्तयत् ।

अनेन रात्रिशेषेण यदि नाश्वास्यते मया ।
सर्वथा नात्र सन्देहः परित्यक्ष्यति जीवितम् ॥

अनेन स्वामिकार्यहानिप्रसक्तौ तत्कालोचितं कर्म कर्तव्यमिति सूचितम् । तथा च हरिवंशे कृष्णं प्रति नारदप्रेषणावसरे इन्द्रः—'यथा यथा वा तत्कार्यं न विपद्येत कर्हिचित् । तथा तथा त्वया कार्यं मनसः प्रीतिमिच्छता ॥' इति । तत्रैव स्थलान्तरे दूतान् हंसान्प्रति इन्द्रः— 'एतत्सर्वं च कर्तव्यमन्यच्च स्वयमेव हि । प्राप्तकालं विधातव्यमस्माकं हितकाम्यया ॥' इति ॥

सीतासन्देशरहितं मामितस्त्वरया गतम् ।
निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा ॥

अनेन यस्मिन्कार्ये नियुक्तस्तत्कार्यं न कृतं चेत्प्रभोः कोपो भविष्यतीत्युक्तम् । तथा च हरिवंशे दूतान्प्रति शक्रवचनम्— 'अकुर्वतां दैवताज्ञामुग्रो दण्डः पतेदथ ।' इति ॥

चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता ।
गूढेन चरता तावदवेक्षितमिदं मया ॥
राक्षसाधिपतेरस्य प्रभावो रावणस्य च ।

अनेन शत्रोः स्थितिः तद्बलं च सुयुक्तेन गूढचारेण विचारणीयमिति सूचितम् । तथा च कामन्दके— 'सारवत्तां च राष्ट्रस्य दुष्कृतं दाप्तिमेव च । छिद्रं शत्रोर्विजानीयात्कोशभिन्नबलानि च ॥' इति ॥

अनेन श्रीमन्तमुपजीविनः स्वत एव समायान्तीत्युक्तम् । तथा च कामन्दके?— 'लक्ष्मीरेवान्वयो लोके न लक्ष्म्याः परतोऽन्वयः । यस्मिन्कोशो बलं चैव तस्मिन्लोकोऽनुगच्छति ॥' इति ॥

तस्याः शुभं वामरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम् ।
प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम् ॥

अत्र उत्तमनायिकायाः सीताया नेत्रे वक्रघनपक्ष्मराजियुक्तत्वकनीनिकामात्र कृष्णत्वतद्व्यतिरिक्तभागविशालशुक्लत्वादिलक्षणप्रतिपादनात् एतादृशलक्षणयुक्ता उत्तमस्त्री इति सूचितम् । तथा च काशीखण्डे— 'पक्ष्मभिः सुघनैः स्निग्धैः कृष्णैः सूक्ष्मैः सुभाग्यभाक् । ललनालोचने शस्ते रक्तान्ते कृष्णतारके ॥ गोक्षीरवर्णविशदे सुस्निग्धे कृष्णपक्ष्मणी ।' इति । वाहटेऽपि— 'नेत्रे व्यक्तासितसिते सुबद्धे घनपक्ष्मणी' इति । नयनयोः प्रान्तरक्तत्वात् जात्या पद्मिनीत्यपि सूचितम् , 'प्रान्तारक्तकुरङ्गशावनयना' इति लक्षणात् इति ॥

भुजश्च चार्वञ्चितपीनवृत्तः परार्घ्यकालागरुचन्दनार्हः ।
अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ॥

अनेन भुजस्य वृत्तपीनत्वादिकमुत्तमस्त्रीणां लक्षणं सूचितम् । तथा च काशीखण्डे— 'स्यातां दोषौ सुनिर्दोषौ गूढास्थिग्रंथिकोमलौ । विसिरौ च विरोमाणौ सरलौ हरिणीदृशाम् ॥' इति ॥

गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोः सुजातः ।
अस्पन्दमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ॥

अनेन उत्तमस्त्रीणामूर्वोर्वृत्तपीनस्निग्धत्वादिकं लक्षणं सूचितम् । तथा च **काशीखण्डे**— 'विसिरैः करभाकारैरूरुभिर्मसृणैर्घनैः । सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः ॥' इति ॥

शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तामिवामलाक्ष्याः ।
वासः स्थितायाः शिखराग्रदत्याः किंचित्परिस्रंसत चारुगात्र्याः॥

अनेन स्त्रीणां सूक्ष्माग्रदन्ताः शुभफलप्रदा इति सूचितम् । तथा च **सामुद्रिके**— 'यस्याः शिखरिणो दंता दीर्घं जीवति तत्पतिः' इति । 'स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वम् ॥' **अनङ्गरङ्गेऽपि**— 'रागस्पृशः स्निग्धतराः समाना घनाश्च सूक्ष्माः सशिखाः सुभासः । दन्ताः प्रशस्ता अतिखर्वरूक्षाः करालबाह्या मलिनाश्च निन्द्याः ॥' इति ॥

तस्याः पुनर्बिम्बफलाधरोष्ठं स्वक्षिभ्रुकेशान्तमराळपक्ष्म ।
वक्त्रं बभासे स्मितशुक्लदंष्ट्रं राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥

अनेन बिम्बफलसन्निभाधरवत्त्वं स्निग्धासंहतभ्रूमत्त्वं नीलस्निग्धकुटिलकेशवत्त्वं नीरन्ध्रशुक्लदन्तवत्त्वं च उत्तमस्त्रीलक्षणमुक्तम् । तथा च **काशीखण्डे**— 'पाटलो वर्तुलस्निग्धरेखाभूषितमध्यभूः । सीमन्तिनीनामधरो धराजानिप्रियो भवेत् ॥ भ्रुवौ सुवर्तुले तन्व्यौ स्निग्धे कृष्णे असंगते ।

प्रशस्ते मृदुरोमाणौ सुभ्रुवः कार्मुकाकृती ॥ केशा अलिकुल-च्छायाः सूक्ष्माः स्निग्धाः सुकोमलाः । किंचिदाकुंचिताग्राश्च कुटिलाश्चातिशोभनाः ॥ गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाः शुभाः । अधस्तादुपरिष्टाच्च समाः स्तोकसमुन्नताः ॥' इति ॥

एवं त्रयस्त्रिंशे सर्गे सीतां प्रति हनूमद्वाक्ये उत्तमस्त्रीलक्ष-णान्युक्तानि ॥ 'व्यञ्जनानि च ते यानि लक्षणानि च लक्षये । महिषी भूमिपालस्य राजकन्यासि मे मता ॥' इति ॥

तान्येव लक्षणानि युद्धकाण्डे सीतावाक्ये—

इमानि खलु पद्मानि पादयोर्यैः कुलस्त्रियः ।
अधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ इति ॥

अनेन स्त्रीणां पादयोः पद्मादिरेखा राजमहिषी-त्वज्ञापिका इत्युक्तम् । तथा च स्कान्दे— 'चक्रस्वस्तिकशङ्ख-खाब्जध्वजमीनातपत्रवत् । यस्याः पादतले रेखाः सा भवेत् क्षितिपाङ्गना ॥' इति ॥

केशाः सूक्ष्माः समा नीला भ्रुवौ चासंगते मम ।
वृत्ते चारोमशे जंघे दन्ताश्चाविरला मम ॥

अत्र सूक्ष्मसमनीलकेशत्वमसंगतभ्रूमत्त्वं वृत्तारोमशजं-घत्वमविरलदन्तत्वं चोत्तमस्त्रीणां लक्षणमित्युक्तम् । तत्र वृत्तारोमशजंघत्वविषये स्कान्दे— 'रोमहीने समे स्निग्धे यज्जंघे क्रमवर्तुले । सा राजपत्नी भवति विसिरे सुमनोहरे ॥' इति । केशादीनां समत्वे च प्रागुक्तम् ॥

शंखे नेत्रे करौ पादौ गुल्फावूरू च मेचितौ ।
अनुवृत्तनखाः स्निग्धाः समाश्चांगुळ्यो मम ॥

अत्र ललाटास्थिनेत्रकरचरणगुल्फोरूणां मांसलत्वं च नखानां स्निग्धत्वं वृत्तत्वं चांगुळीनां समत्वं चोत्तमस्त्रीणां लक्षणमुक्तम् । तथा च **स्कान्दे**— 'फालः सिराविरहितो निर्लोमार्धेन्दुसन्निभः । अनिम्नस्त्र्यंगुळो नार्याः सौभाग्यारोग्यकारणम् ॥' इति । **वाहटेऽपि**— 'ललाटमुन्नतं श्लिष्टशंखमर्धेन्दुसन्निभम् ।' इति । नेत्रलक्षणं च प्रागुक्तम् । करादीनां मांसलत्वं **स्कान्दे**— 'अम्भोजमुकुलाकारं स्वंगुष्ठांगुळि सन्नखम् । हस्तद्वयं मृगाक्षीणां बहुभोगाय जायते ॥ विरोम विसिरं शस्तं पाणिपृष्ठं समुन्नतम् । स्त्रीणां पादतलं स्निग्धं मांसलं मृदुलं समम् । अस्वेदमुष्णमरुणं बहुभोगोचितं स्मृतम् । गूढौ गुल्फौ शुभायोक्तावसिरालौ सुवर्तुलौ ॥ विसिरैः करभाकारैरूरुभिर्मसृणैर्घनैः । सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः ।' इति । 'स्निग्धाः समुन्नतास्ताम्रा वृत्ताः पादनखाः शुभाः । शुभदः सरलॊंगुष्ठो वृत्तो वृत्तनखो मृदुः ॥ अंगुळ्यश्च सुपर्वाणो दीर्घा वृत्ताः क्रमात्कृशाः ॥' इति च ॥

स्तनौ चाविरळौ पीनौ ममेमौ मग्नचूचुकौ ।
मग्ना चोत्संगिनी नाभिः पार्श्वोरस्काश्च मे चिताः ॥

अत्र स्तनयोरविरळपीनमग्नचूचुकत्वं नाभेः प्रान्तोन्नतमध्यनिम्नत्वं उरःपार्श्वयोर्मांसलत्वं च उत्तमस्त्रीलक्षणमुक्तम् । **तथा च स्कान्दे**– 'घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ ।

अत्र स्वप्ने वानरदर्शनमनिष्टसूचकमित्युक्तम् । तथा च ऐतरेयके—'न चिरमिव जीविष्यति' इत्युपक्रम्य 'इति प्रत्यक्षदर्शनानि । अथ स्वप्नः—पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हान्ति, वराह एनं हान्ति, मर्कट एनमास्कन्दयति' इति। स्वप्नाध्यायेऽपि 'अभिधावन्ति यं स्वप्ने शृंगिणो दंष्ट्रिणोऽपि वा । वानरो वा वराहो वा भवेद्राजकुलाद्भयम् ॥ इति ॥

स्वप्नो न चायं न हि मेऽस्ति निद्रा
शोकेन दुःखेन च पीडितायाः ।
सुखं हि मे नास्ति यतोऽस्मि हीना
तेनेन्दुपूर्णप्रतिमाननेन ॥

अनेन दुःखहेतौ सति निद्रा न भवतीति सूचितम् । तथा च उद्योगे विदुरः—'अभियुक्तं बलवता दुर्बलं हीनसाधनम् । हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः ॥' इति ॥

रामेति रामेति विचिन्त्य बुद्ध्या
सदैव वाचा ब्रुवती तमेव ।
तस्यानुरूपां च कथां तमर्थे
तमेव पश्यामि तथा शृणोमि ॥

अनेन वस्तुनो निरन्तरचिन्तासन्ततिरूपं परिभावनं तत्साक्षात्कारहेतुरित्युक्तम् । तच्च (विष्णुकृत)कामिनीपरिभावनेन कामिनीसाक्षात्कारस्य, निदिध्यासनात्मकस्वरूपानुसन्धानेनात्मसाक्षात्कारस्य, गान्धर्वशास्त्रपरिभावनेन षड्जादिसाक्षात्कारस्य च दर्शनात्सिद्धम् ॥

मनोरथः स्यादिति चिन्तयामि
तथैव बुद्ध्या च वितर्कयामि ।
किं कारणं तस्य हि नास्ति रूपं
सुव्यक्तरूपश्च वदत्ययं माम् ॥

नमोऽस्तु वाचस्पतये सवज्रिणे
स्वयंभुवे चैव हुताशनाय च ।
अनेन चोक्तं यदिदं ममाग्रतो
वनौकसा तत्तु तथास्तु नान्यथा ॥

अनेन दुर्भाषणवर्जनपूर्वकं सर्वदा शुभमेव भाषेतेति सूचितम्। तथा च गौतमः—'अधेनुं धेनुभव्येति ब्रूयात् अभद्रं भद्रमिति' इति । आनुशासनिकेऽपि— 'परिवादं न च ब्रूयात्परेषामात्मनस्तथा । अकुत्सयन्स्वमात्मानं प्रार्थयेच्छुभमन्वहम् ॥' इति॥

इति एकत्रिंशद्द्वात्रिंशौ सर्गौ ।

अथ त्रयस्त्रिंशः सर्गः ॥

त्रयस्त्रिंशे—इति वहुधा चिन्तयन्तीं सीतां मारुतिस्तरुशिखरादवतीर्य इत्थमपृच्छत्—

का नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि ।
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् ॥

रोदनादतिनिःश्वासाद्भूमिसंस्पर्शनादपि ।
न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥

अनेनामर्त्यानां भूस्पर्शादिकं नास्तीत्युक्तम् । तथा च वनपर्वणि—'साऽपश्यद्विबुधान्सर्वानस्वेदांस्तब्धलोचनान् । हृषित-स्रग्रजोहीनान् स्थितानस्पृशतः क्षितिम् ॥' इति ॥

पृष्टवन्तं हनूमन्तं स्ववृत्तान्तमभिधाय—

दद्यान्न प्रतिगृह्णीयान्न ब्रूयात्किंचिदप्रियम् ।
अपि जीवितहेतोर्वा रामः सत्यपराक्रमः ॥

अनेन महापुरुषाणामापद्यपि दानप्रियवचनादिकं स्वभाव इत्युक्तम् । तथा चोद्योगे विदुरः—'स्वर्गच्युतानामिह जीवलोके चत्वारि चिह्नानि भवन्ति राजन् । दानप्रसंगो मधुरा च वाणी देवार्चनं ब्राह्मणतर्पणं च ॥' इति । तादृशस्य रामभद्रस्य भार्यां मां दुरात्मा रावणो हृतवान् ॥

इति त्रयस्त्रिंशः सर्गः ।

अथ चतुस्त्रिंशः सर्गः ॥

चतुस्त्रिंशे—ततो हनुमान् रामनिदेशान् समागतं दूतं मां विद्धि ।

यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ।
स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥

तदनु च सुमित्रापुत्रोऽपि शिरसा प्रणम्य तवाभिवादन-मकरोदित्यब्रवीत् । इत्थं कुशलं वदतो हनुमतो निशम्य वचन-मानन्दकंदळतरंगीतापांगी प्रीतिसंहृष्टसर्वांगी इत्थमचिन्तयत्—

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥

अनेन बह्वीष्वप्यापत्सु आत्मानं संरक्ष्य स्थितस्य सुखं पुण्यं च कदाचिद्भविष्यतीति सूचितम् । तथा चापद्धर्मे विश्वामित्रः— 'सर्वोपायैरुपायज्ञो दीनमात्मानमुद्धरेत् । एतां बुद्धिं समास्थाय जीवितव्यं सदा भवेत् । जीवन्पुण्यमवाप्नोति पुरुषो भद्रमश्नुते ॥' इति ॥

ततः संभाषणाय समीपमुपसर्पन्तं हनूमन्तं रावणं निश्चित्य जनस्थाने कपटकाषायपटवेषेण मामभिभूतवतो भूयोऽपि मम मनसः सन्तापोत्पादनं न शोभनमिति वदन्तीं भयमोहितां सीताम्-

अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् ।
अथ, कृतप्रणामे मारुतौ किमिदानीमुद्भूतं चित्ते—

किन्नु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ।
उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥

अयं वानरकथितः प्रियतमकथावगमः चित्तमोहप्रयुक्तः वातवैषम्यप्रयुक्तो वा चित्तोन्मादजनितविकार एव वा देशकालविशेषकृतमरुमरीच्यादिभ्रमतुल्यो वा । तत्र चित्तमोहो गान्धार्यादिमदकरद्रव्यभक्षणाद्भवति । तथा च बाहटे—'गान्धारी कफवातघ्नी स्वादुतिक्तकषायका । दीपिनी गुल्मशूलघ्नी चित्तविभ्रमकारिणी ॥' इति । वातगतेर्भ्रमहेतुत्वं बाहटे — 'वृद्धस्तु कुरुतेऽनिलः । कार्श्यकार्ष्ण्योष्णकामित्वकंपानाहशकृद्ग्रहान् । बल-

गुणवत्त्वेन मांसलत्वेन च। तदाहुः **संहिताकाराः**— 'बन्धुजीव-कुसुमारुणाधरो मांसलो रुचिरबिम्बरूपधृक्। पूर्णमांसलहनुस्तु भूमिपस्तुंगतुण्डरुचिराकृतिस्तथा ॥' इति। तुण्डमिति [अत्र] नासिकोच्यते। नासिकाकृतिविशेषफलं **स्कान्दे**— 'समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा।' इति। पञ्चस्निग्धः— पञ्चसु स्निग्धः पञ्चस्निग्धः। तानि पञ्च स्निग्धानि उदाहृतानि **स्कान्दे**— 'स्निग्धानि पञ्च वाग्वक्त्रत्वङ्लोमनखराणि च।' इति। **वररुचिस्तु**—'नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम्। त्वचः स्नेहेन शयनं पादस्नेहेन वाहनम् ॥' इति। 'स्निग्धनीलमृदुकुंचितास्तथा मूर्धजाः सुखकराः' इति **संहितायाम्**। **सामुद्रिके** तु—'स्निग्धेक्षण-त्वङ्नखदन्तकेशाः' इति। अष्टवंशवान्—अष्टौ वंशा आयता यस्य सन्ति स अष्टवंशवान्। आयता अष्टावयवा इत्यर्थः। आयता अष्टा-वयवा उक्ताः **सामुद्रिके**—'पृष्ठवंशः शरीरं च हस्तपादांगुली करौ। नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः ॥' इति। अत्र प्रजननस्यायतत्वमार्जवं न तु दैर्घ्यमिति। **ब्राह्मे** तु—'बाहू च नलिकावूरू जंघे चेत्यष्टवंशवान्।' नलिकावंगुली। अंगुली-नामच्छिद्रत्वमपि लक्षणं **सामुद्रिके**— 'श्लिष्टान्यंगुलिमध्यानि द्रव्यसंचयहेतवे। तानि चेच्छिद्रयुक्तानि त्यागशीलकराणि च ॥' इति ॥

दशपद्मः—दश पद्माकारा अवयवा यस्य सः दशपद्मः। तानि दशपद्मान्युदाहृतानि **ब्राह्मे**—'मुखनेत्रास्यजिह्वोष्ठतालुस्त-ननखाः करौ। पादौ च दश पद्मानि पद्माकाराणि यस्य च ॥' इति। दशबृहत्—तदपि **सामुद्रिके**—'उरः शिरो ललाटं च

ग्रीवाबाहूंसनाभयः। पार्श्वपृष्ठस्वराश्चेति विशालास्ते सुखप्रदाः॥' इति। ब्राह्मे तु—'शिरो ललाटश्रवणे ग्रीवा वक्षश्च हृत्तथा। उदरं पाणिपादौ च पृष्ठं दश बृहन्ति च॥' इति। त्रिभिर्व्याप्तः-तत्त्रयं ब्राह्मे—'त्रिभिर्व्याप्तिश्च यस्य स्यात्तेजसा यशसा श्रिया।' इति। द्विशुक्लवान्—द्वौ शुक्लौ शुद्धौ मातृपितृवंशौ यस्य सः द्विशुक्लवान्। त्रिशुक्लवानिति पाठे तु क्रमतः पितृतो मातृतश्चेति॥

षडुन्नतः—षट्सु अङ्गेषून्नतः। तानि चांगानि उक्तानि वररुचिना—'कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धललाटिकाः। सर्वभूतेषु निर्दिष्टा उन्नताङ्गाः शुभप्रदाः॥' इति। सामुद्रिके तु-'वक्षोऽथ कक्षद्वयनासिकास्यं कृकाटिका चेति षडुन्नतानि।' इति। नवतनुः—नवसु स्थानेषु तनुः सूक्ष्मः। तानि स्थानानि अंगुळिपर्वकेशरोमनखत्वक्छेफश्मश्रुदृक्बुद्धयात्मकानि। तथा च सामुद्रिके—'सूक्ष्माण्यंगुळिपर्वाणि केशरोमनखत्वचः। शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः॥' इति। अन्यत्रापि—'अस्फुटिताग्रं सूक्ष्मं श्मश्रु शुभं मृदु च सन्ततं स्निग्धम्। सूक्ष्मदृक् सूक्ष्मबुद्धिश्च यो नरः स सुखी भवेत्॥' इति। अन्यत्र तु—'सूक्ष्माणि पञ्च दशनांगुळिपर्वकेशाः साकं त्वचा कररुहाश्च न दुःखितानाम्।' इति। त्रिभिर्व्याप्नोति धर्मार्थकामैः प्रातर्मध्याह्नसायंकालान् व्याप्नोति। यथाकालं त्रिवर्गानुष्ठातेत्यर्थः। त्रयाणां कालभेदेनानुष्ठानं ब्राह्मे—'धर्मार्थकामाः कालेषु त्रिषु यस्य स्वनुष्ठिताः'। इति। एतदभिप्रायेणैव गौतमसूत्रमपि—'न पूर्वाह्नमध्यन्दिनापराह्णानफलान् कुर्यात्' इति॥

कानिचिल्लक्षणानि स्त्रीपुरुषसाधारणान्युक्तानि सामुद्रिके- 'नेत्रान्तपादकरतालवधरोष्ठजिह्वा रक्ता नखाश्च खलु सप्त सुखावहाः स्युः। मध्यांगुळौ या मणिवन्धमध्याद्रेखा गता पाणितले- ऽङ्गनानाम्। ऊर्ध्वं गता पाणितलेऽथ वामे पुंसोऽथवा राज्यसुखाय सा स्यात्॥ अंगुष्ठमूले प्रसवस्य रेखाः पुत्रा बृहत्यः प्रमदाश्च तन्व्यः। अच्छिन्नदीर्घाश्च चिरायुषश्च स्वल्पायुषश्छिन्नलघु- प्रमाणाः॥ कलत्रकान्तयोः सौख्यं जीविताख्यकनिष्ठयोः। मध्ये विचिन्तयेद्दक्षे वामहस्ते नरः स्त्रियः। अरेखं बहुरेखं वा येषां पाणितलं नृणाम्॥ ते स्युरल्पायुषो निःस्वा दुःखिता नात्र संशयः।' इति॥

इत्थं विशालवक्षस्त्वादिभिर्लक्षणैः रामः कफप्रकृतिरित्यपि सूचितम्। तथाहि—पुरुषास्त्रिविधाः, वातप्रकृतिकाः पित्त- प्रकृतिकाः श्लेष्मप्रकृतिकाश्चेति। तत्र वातप्रकृतिर्बाहटे—'प्रायोऽत एव पवनाध्युषिता मनुष्या दोषात्मकाः स्फुटितधूसरकेश- गात्राः। शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टाः सौहार्ददृष्टिगतयोऽति- बहुप्रलापाः॥ अल्पवित्तकफजीवितनिद्राः सन्नसक्तचलझर्झरवाचः। नास्तिका बहुभुजः सविलासा गीतहास्यमृगयाकलिलोलाः॥ मधुराम्लकटुरसात्मिकाः कृशदीर्घाकृतयः सशब्दयाताः। न दृढा न जितेन्द्रिया न चार्या न च कान्तादयिता बहुप्रजा वा॥ नेत्राणि चैषां खरधूसराणि वृत्तान्यचारूणि मृतोपमानि। उन्मीलितानीव भवन्ति सुप्तौ शैलद्रुमांस्ते गगनं च यान्ति॥ अधन्या मत्सराध्माताः स्तेनाः प्रोद्बन्धपिण्डिकाः। श्वसृगालोष्ट्र- गृध्राखुकाकोलूकाश्च (?) वातकाः॥' इति॥

पित्तप्रकृतिश्च–'पित्तं वह्निर्वह्निजं वा यदि स्यात्पित्तोद्रिक्तस्तीव्रतृष्णाबुभुक्षः। गौरोष्णांगस्ताम्रहस्तांघ्रिवक्त्रः शूरो मानी पिंगकेशोऽल्परोमा ॥ दयितमाल्यविलेपनमण्डनः सुचरितश्रुतिराश्रितवत्सलः। विभवसाहसबुद्धिबलान्वितो भवति भीमगतिर्द्विषतामपि। मेधावी प्रशिथिलसन्धिबन्धमांसो नारीणामनभिमतोऽल्पशुक्लकामः। आवासः पलिततरंगनीलिकानां भुङ्क्तेऽन्नं मधुरकषायतिक्तशीतम् ॥ घर्मद्वेषी स्वेदनः पूतिगन्धी भूर्युच्चारक्रोधपानाशनेर्ष्यः। सुप्तः पश्येत्कर्णिकारान्पलाशान् दिग्दाहोल्काविद्युदर्कानलांश्च ॥ तनूनि पिंगानि चलानि चैषां तन्वल्पपक्ष्माणि हिमप्रियाणि। क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि ॥ मध्यायुषो मध्यफलाः पण्डिताः क्लेशभीरवः। व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः ॥' इति ॥

अथ श्लेष्मप्रकृतिलक्षणम् —'श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो गूढश्लिष्टः श्लिष्टसंध्यास्थिमांसः। क्षुत्तृड्दुःखक्लेशघर्मैरतप्तो बुद्ध्या युक्तः सात्त्विकः सत्यसन्धः ॥ प्रियंगुदूर्वाशरकांडशस्त्रगोरोचनापद्मसमानवर्णः। प्रलंबबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः ॥ मृद्वंगः समसुविभक्तचारुवर्ष्मा बह्वोजोरतिरसशुक्लपुत्रभृत्यः। धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥ समदद्विरदेन्द्रतुल्ययानो जलदाम्भोधिमृदंगतुल्यघोषः। स्मृतिमानभियोगवान्विनीतो न च बाल्येऽप्यतिरोदनो न लोलः ॥ तिक्तं कषायं कटुकोष्णरूक्षमल्पं स भुङ्क्ते बलवांस्तथापि। रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः ॥ अल्पव्याहारक्रोधपानाशनेर्ष्यः प्राज्यायु-

चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुस्समः ॥

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः ।
महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान् ॥

दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ।
षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥

सत्यधर्मरतः श्रीमान् संग्रहानुग्रहे रतः ।
देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥

अस्यार्थः— त्रिस्थिरः । [त्रयः] उरोमणिबन्धमुष्टयः । तथा च सामुद्रे— 'उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः ।' इति । त्रिप्रलम्बः–[त्रीणि] भ्रूबाहुमुष्काणि । तदपि तत्रैव— 'दीर्घभ्रूबाहुमुष्कस्तु चिरजीवी धनी नरः ।' इति । ब्रह्मपुराणेऽपि— 'त्रयश्च यस्य स धनी लम्बा भ्रूमुष्कबाहवः ।' इति । त्रिषु समः— [तानि] केशाग्रवृषणजानूनि । तदपि तत्रैव— 'केशाग्रं वृषणं जानु समं यस्य स भूपतिः ।' इति । त्रिषु चोन्नतः । तानि च कुक्षिनाभिपरिमण्डलवक्षांसि । तदुक्तम्— 'नाभ्यन्तकुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेत् ।' इति । वराहमिहिराचार्यास्तु 'उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभिः क्षितिपः । हृदयं न वेपनं पृथु समुन्नतं मांसलं च नृपतीनाम् ॥' इति । अन्यत्र तु— 'उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम् ।' इति ॥

त्रिताम्रः–'नेत्रान्तनखपाण्यग्रतलैस्ताम्रैस्त्रिभिः सुखी ।' इति ।

यद्वा, हस्तनखाः पादनखा हस्तपादतलरेखाश्च । तदुक्तं सामुद्रिके—'श्लिष्टांगुळी ताम्रनखौ पार्ष्णी पादौ करावपि। सुरक्ते नखरेखे च प्रशस्येते हि भूभुजः ॥' इति । रेखाश्च सामुद्रिके— 'यवोऽगुंष्ठोदरे यस्य स यशस्वी नरो भवेत् । अनामिक्यां मूलजाता रेखा यस्य स पुण्यवान् ॥ शंखपद्मयवच्छत्रमालामत्स्य-ध्वजादयः । पादे पाणौ भवन्त्येव राज्ञां तद्योषितां तथा ॥ कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तराळम् । करोति रेखा परमायुषं तं प्रमाणहीनार्थत ऊह्यमायुः ॥ मत्स्यः करतले यस्य स नरो बहुकोशवान् । भाग्यरेखा सुतीक्ष्णाग्रा शुभा छत्राकृतिस्तथा ॥ सरोजश्रीवृक्षध्वजगजतिमिस्तंभकलशस्रगादर्श-च्छत्रांकुशकुलिशभृंगारगिरिभिः । रथाश्वश्रीवत्सव्यजनयवयूपप्रभृ-तिभिर्नरा नार्यो राज्यं दधति पदपाणिप्रणयिभिः ॥' इति । त्रिषु स्निग्धः— [त्रयः] पादरेखालिंगमणिकेशाः । तदाहुः— 'स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिंगमणि-स्तेषां महाभाग्यं विनिर्दिशेत् ॥' इति । त्रिषु गम्भीरः— स्वर-सत्वनाभिषु । तथा च वररुचिः— 'स्वरे सत्वे च नाभौ च गम्भीरस्त्रिषु शस्यते ।' इति । सामुद्रिकेऽपि— 'नाभिः स्वरस्स-त्वमिति प्रशस्तं गम्भीरमेतत्त्रितयं नराणाम् ।' इति ॥

त्रिवळीवान्—उदरे वळित्रयवान्, कण्ठे वलित्रयवान् वा। कण्ठे वलित्रयवानित्यत्र स्कान्दे— 'शस्ता ग्रीवा त्रिरेखांका त्वव्यक्तास्थिसुसंहता ।' इति । त्र्यवनतः । स्तनचूचुकपादरेखाः । तथा च वराहसंहितायाम्—'पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः । स्निग्धनिमग्ना रेखा धनिनां तद्व्यत्ययेन निःस्वा-

नाम् ॥' इति । चतुर्व्यंगः—चत्वारि व्यंगानि ह्रस्वानि यस्य सः चतुर्व्यंगः । तदाह वररुचिः—'ग्रीवा प्रजननं पृष्ठं ह्रस्वा जंघा च पूजिता ।' इति । अत्र ह्रस्वप्रजननादिकथनात् रामः शशमृगवृषहयाख्यपुरुषजातिषु उत्कृष्टशशजातिरिति सूचितम् । तल्लक्षणमुक्तं स्मरदीपिकायाम् —'शशो मृगो वृषश्चैव चतुर्थस्तु हयस्तथा । कथयामि क्रमात्पुंसामेतज्जातिचतुष्टयम् ॥ स्त्र्यजितो गायनश्चैव नारीसक्तिपरः सुखी । षडंगुळशरीरश्च श्रीमांस्तु शशको मतः । अल्पायुर्धार्मिकश्चैव सत्यवादी प्रियंवदः । अष्टांगुळशरीरस्तु रूपयुक्तो मृगो मतः । उपकारपरो नित्यं स्त्रीवशः श्लेष्मलस्तथा । स्वदशांगुळमेढ्रस्तु मेदस्वी वृषभो मतः । लुब्धश्च कृपणश्चैव मिथ्यावादी च निर्भयः । द्वादशांगुळमेढ्रस्तु कुशलस्तु हयो मतः ॥' इति । त्रिशीर्षवान् —त्र्यावर्तयुक्तशीर्षवान् । आवर्तत्रयशीर्षवत्त्वं च राजचिह्नम् । तथा चोक्तम्—'आवर्तत्रयरुचिरं यस्य शिरः क्षितिभृतां भवेन्नाथः ।' इति । शरीरे आवर्तरोमवत्त्वमपि प्रशस्तम् । तदुक्तं सामुद्रिके—'प्रदक्षिणावर्तशरीररोमा वृषस्वनः फेनिलमूत्रपातः । नात्यल्पपार्ष्णिर्मनसा गभीरो धीरोद्धतारंभरुचिर्यशस्वी ॥' इति ॥

चतुष्कलः— चतस्रः कळाः चतुर्णां वेदानां व्यंजिकाः अंगुष्ठमूलगता रेखा यस्य स चतुष्कलः । अंगुष्ठमूलरेखानां वेदव्यंजकत्वमाह नन्दिकेश्वरः—'मूलेऽङ्गुष्ठस्य वेदानां चतस्रास्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनाम् ॥' इति । चतुर्लेखः— ललाटे पादयोः पाण्योर्लेखाश्चतस्रो यस्य सः चतुर्लेखः । ललाटे रेखासंख्यानुगुण्येन आयुस्तारतम्यमाह

कात्यायनः—'ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः। शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा ॥' इति। पादगतरेखाविशेषेण फलविशेषमाह नारदः—'यस्य पादतले वज्रध्वजशंखाङ्कुशोपमाः। रेखाः सम्यक् प्रकाशन्ते मनुजेन्द्रं तमादिशेत् ॥' इति। चतुष्किष्कुः—[चत्वारः किष्कवः यस्य स चतुष्किष्कुः। चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः।] षण्णवत्यंगुलोत्सेध [इत्यर्थः। तदुक्तं ब्राह्मे—'षण्णवत्यङ्गुलोत्सेधो यः पुमान् स दिवौकसः' इति। चतुःसमः—चत्वारः समा यस्य स चतुःसमः। ते च बाहुजानूरुगण्डाः।] तदुक्तं ब्रह्माण्डे—'बाहुजानूरुगंडाश्च चत्वार्याहुः समानि च।' इति ॥

चतुर्दशसमद्वंद्वः— समद्वंद्वानि चोक्तानि सामुद्रिके—'भ्रुवौ नासापुटौ नेत्रे कर्णावोष्ठौ च चूचुके। कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिचौ यस्य समा ज्ञेयस्स भूपतिः।' इति। प्रकारान्तरमपि ब्राह्मे—'कर्णाक्षिगण्डभ्रूनासं दन्तोष्ठं स्कन्धजत्रुणी। पादौ करौ स्तनावूरू स्फिचौ द्वंद्वाश्चतुर्दश। समाश्च यस्य विद्यन्ते क्रमेणोपचितिस्तथा ॥' इति। चतुर्दंष्ट्रः—दन्तपङ्क्तिद्वयेऽपि मध्यदन्तचतुष्कपार्श्वद्वयवर्तिदन्तचतुष्टयं दंष्ट्राशब्दार्थः। तत्प्रशंसा च वराहमिहिरसंहितायाम्—'स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभदाः।' इति। चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभानां गतिरिव गतिर्यस्य सः। तथा च बालकाण्डे—'गजसिंहगती वीरौ शार्दूलवृषभोपमौ।' इति ॥

महोष्ठहनुनासश्च— अत्र ओष्ठादीनां महत्त्वं आरुष्यादि-

निद्रेन्द्रियभ्रंशप्रलापभ्रमदीनताः ॥' इति । विकृतो वायुः कार्श्यादिकं करोति । उष्णकामित्वमुष्णे प्रीतिकारित्वम् । शकृद्ग्रहो मलबन्धः । आनाहः आध्मानम् । उन्मादो धातुवैषम्यकृतो मनसो विकारः । तदुक्तम्—'उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः । शारीरमानसैर्दुष्टैरहितादन्नपानतः । विकृतासात्म्य(?)समलाद्विषमादुपयोगतः ॥ विषण्णस्याल्पसत्त्वस्य व्याधिवेगसमुद्भवात् । क्षीणस्य चेष्टावैषम्यात्पूज्यपूजाव्यतिक्रमात् । आधिभिश्चित्तविभ्रंशाद्विषेणोपविषेण च । एभिर्विहीनसत्वस्य हृदि दोषाः प्रदूषिताः । धियो विधाय कालुष्यं हत्वा मार्गान्मनोवहान् ॥ उन्मादं कुर्वते तेन धीविज्ञानस्मृतिभ्रमात् । देही दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः ॥ भ्रमत्यचिन्तितारम्भः' इति । देशकालकरणविषयदोषप्रयुक्ता मरुमरीच्यादिभ्रमाः लोकप्रसिद्धाः ॥

अथवा नायमुन्मादो मोहोऽप्युन्मादलक्षणः ।
संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥

मोहोन्मादयोर्विवेकहानिकरत्वात् स्वपरविवेकस्य विद्यमानत्वात् स्वपरविवेकहानिकरो मोह उन्मादो वा न भवत्येव । इत्थमतर्कितरामसन्देशश्रवणेऽपि विचार्य निश्चयकरणादतर्कितोपनते इष्टतमेऽपि पदार्थे लोभात् झटिति न प्रवर्तितव्यम्, किं तु विचारयितव्यमिति सूचितम् । तच्च प्रागुक्तम ॥

नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ।
न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥

अथवा नैतदेवं हि यन्मया परिशङ्कितम् ।
मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ।

अनेन महतां संशयितेऽर्थे मनःप्रसाद एव प्रमाणमिति सूचितम् । तथा च कालिदासः—'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । ' इति ॥

सर्वथा कामरूपी निशाचर एवायमसंभाष्य इति मत्वा तूष्णींभूतां सीतामभिज्ञाय तां हर्षयन् हनूमानेवमुवाच—

अहं सुग्रीवसचिवो हनूमान्नाम वानरः ।
प्रविष्टो नगरीं लंकां लंघयित्वा महोदधिम् ॥

कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ।
त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥

नाहमस्मि तथा देवि यथा मामवगच्छसि ।
विशंका त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥

अत्र च हनूमता सीतासन्दर्शनानन्तरं रामवंशसंकीर्तनपूर्वकं सीतां समाश्वास्यैव रामदूतोऽहमागत इति कथनादपरिचितेन हठात् कार्यं न निवेदनीयम्, किं तु आख्यानकथनादिभिः स्वस्मिन्विश्वासमुत्पाद्य स्वागमनकार्यं निवेदनीयमिति सूचितम् । अत एव हरिवंशे इन्द्रेण प्रेषिता हंसी वज्रनाभसुतां प्रभावतीं विस्रंभयित्वैवागमनकार्यं निवेदयामासेति प्रतिपादितम्— 'विस्रम्भयित्वा तां सूक्तैराख्यानकशतैर्वराम् । त्रैलोक्यसुन्दरी वोश्चे त्वामहं हि प्रभावति ॥ रूपशीलगुणैर्देवि किंचित्त्वां वक्तुमुत्सहे । ' इति ॥

इति चतुस्त्रिंशः सर्गः ।

अथ पंचत्रिंशः सर्गः ॥

पञ्चत्रिंशे—तदनु सीता—

क्क ते रामेण संसर्गः कथं जानासि लक्ष्मणम् ।
वानराणां नराणां च कथमासीत्समागमः ॥

यानि रामस्य लिंगानि लक्ष्मणस्य च वानर ।
तानि भूयस्समाचक्ष्व न मां शोकस्समाविशेत् ॥

कीदृशं तस्य सस्थानं रूपं रामस्य कीदृशम् ॥

इत्यपृच्छत् । अनेन संशयिते विषये सम्यक् पराभिप्रायं निश्चित्यैव स्वाभिप्रायो निवेदनीय इति सूचितम् । अत एव नलोपाख्याने दमयन्ती केशिनीमुखेन स्वयं च नलं सम्यग्विचार्यैव स्वाभिप्राय-मुक्तवतीति प्रतिपादितम् ॥ दमयन्ती—'गच्छ केशिनि भूयस्त्वं परीक्षां कुरु बाहुके । अब्रुवाणा समीपस्था चरितान्यस्य लक्षय ॥ दमयन्त्यैवमुक्ता सा जगामाशु सुकेशिनी । निशाम्य च यथान्यायं दमयन्त्यै न्यवेदयत् ॥ दमयन्त्यपि तच्छ्रुत्वा पुण्यश्लोकस्य चेष्टितम् । अमन्यत नलं प्राप्तं कर्मचेष्टाभिसूचितम् ॥ सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ । नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥ इति ॥

ततो हनूमान्—

यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै ।
लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥

रामः कमलपत्राक्षः सर्वभूतमनोहरः ।
रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥

तेजसादित्यसंकाशः क्षमया पृथिवीसमः ।
रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता ।
रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥

रामो भामिनि लोकेऽस्मिन् चातुर्वर्ण्यस्य रक्षिता ।
मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥

अर्चिष्मानर्चितो नित्यं ब्रह्मचर्यव्रते स्थितः ।
साधूनामुपकारज्ञः प्रकारज्ञश्चैव कर्मणाम् ॥

राजविद्याविनीतश्च ब्राह्मणानामुपासिता ।
श्रुतवान् शीलसंपन्नो विनीतश्च परंतपः ॥

यजुर्वेदविनीतश्च वेदविद्भिस्सुपूजितः ।
धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः ॥

विपुलांसो महाबाहुः कंबुग्रीवः शुभाननः ।
गूढजत्रुः सुताम्राक्षो देवि रामो जनैः श्रुतः ॥

दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ।
समस्समविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥

त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः ।
त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः ॥

त्रिवलीमांस्त्र्यवनतश्चतुर्व्यंगास्त्रिशीर्षवान् ।

वित्तो दीर्घदर्शी वदान्यः ॥ श्राद्धो गंभीरः स्थूललक्षः क्षमावानार्यो-ऽनिद्रालुर्दीर्घदर्शी कृतज्ञः । ऋजुर्विपश्चित्सुभगः सुलज्जो भक्तो गुरूणामिह सौहृदीयः । स्वप्ने सपत्नान् सविहंगमालान् तोयाशयान्पश्यति तोयदांश्च ॥ ब्रह्मरुद्रेन्द्रवरुणताक्ष्र्यहंसगजाधिपैः । श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः ॥ ' इति ॥

इत्थं कफप्रकृतेरुदाहृतानि सर्वाणि लक्षणानि रामे तिष्ठन्तीति रामायण एव तत्र तत्रावगम्यते । तथाहि—सौम्यत्वं बालकाण्डे –' सर्वलोकप्रियः साधुः ' इति । अयोध्याकाण्डे— ' क्षान्तः सान्त्वयिता श्लक्ष्णः ', ' स तु नित्यं प्रशान्तात्मा मृदुपूर्वं प्रभाषते ' इति च । ' गूढश्लिष्टः श्लिष्टसन्ध्यस्थिमांसः ' इत्येतदपि बाल-काण्डे— ' गूढजत्रुररिन्दमः ' इति । सुन्दरकाण्डेऽपि—'गूढजत्रुः सुताम्राक्षो देवि रामो जनैः श्रुतः ।' इति । 'क्षुत्तृड्दुःखक्लेशघर्मैरतप्तः ' इत्येतच्च बालकाण्डे—' न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः । न क्षुत्पिपासे ते राम भविष्येते नरोत्तम ॥ ' इति । युद्धकाण्डेऽपि—' निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा । अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टः ॥ ' इति । बुद्ध्या युक्तत्वं च बालकाण्डे–' बुद्धिमान्नीतिमान् वाग्मी ' इति । अयोध्याकाण्डेऽपि— ' बुद्धिमान्मधुराभाषी ' इति । सात्विकत्वं च किष्किन्धाकाण्डे–' कुलीनः सत्वसंपन्नस्तेजस्वी चरितव्रतः । ' इति । सत्यसन्धत्वं च अयोध्याकाण्डे— ' धर्मज्ञः सत्यसन्धश्च ' ' सत्यवादी च राघवः ' इति । आरण्यकाण्डेऽपि– 'अनृतं न हि रामस्य कदाचिदपि संमतम् ।' 'सत्यसन्धं महाबाहुमहं राममनुव्रता ।' इति ॥

D. 32

'प्रियंगुदूर्वाशरकाण्डशङ्खगोरोचनापद्मसमानवर्णः' इत्येतच्चायोध्याकाण्डे— 'राममिन्दीवरश्यामम्' इति। सुन्दरकाण्डेऽपि — 'समः समविभक्ताङ्गो वर्णं श्यामं समाश्रितः।' इति। प्रलम्बबाहुत्वं च बालकाण्डे—'आजानुबाहुः सुशिराः' इति। अयोध्याकाण्डेऽपि—'सिंहस्कन्धो महाभुजः' इति। आरण्यकाण्डेऽपि—'आजानुबाहुं दीप्तास्यम्' इति। 'दीर्घबाहुर्विशालाक्षो दैवतं हि पतिर्मम।' इति च। तत्रैवान्यत्र—'रामो नाम वृषस्कन्धो वृत्तायतमहाभुजः।' इति। पृथुपीनवक्षस्त्वं च बालकाण्डे—'महोरस्को महेष्वासः' 'पीनवक्षा विशालाक्षः' इति। महाललाटत्वं च बालकाण्डे — 'सुललाटः सुविक्रमः' इति। घननीलकेशत्वं चारण्यकाण्डे— 'सुकेशं ताम्रमूर्धजा' इति। मृद्वङ्गत्वं चारण्यकाण्डे—'सुकुमारं महासत्वं पार्थिवव्यंजनान्वितम्।' इति। समसुविभक्तचारुवर्ष्मत्वं च बालकाण्डे— 'समः समविभक्तांगः' इति। बह्वोजस्त्वं च आरण्यकाण्डे— 'रामो नाम महातेजाः' इति। 'रवितेजाः प्रतापवान्' इति च। 'रामश्च हि महातेजा महासत्वो महाबलः।' इति च। बहुरतिरसत्वं च युद्धकाण्डे 'कदा नु खलु बिंबोष्ठं तस्याः पद्ममिवाननम्। ईषदुन्नम्य पास्यामि रसायनमिवातुरः॥' इति। सुन्दरकाण्डेऽपि— 'नान्यच्चिन्तयते देवि स तु कामवशं गतः।' इति। उत्तरकाण्डेऽपि— 'कुशास्तरणसंवीते रामः सन्निषसाद ह। सीतां संगृह्य बाहुभ्यां मधु मैरेयमुत्तमम्॥ पाययामास काकुत्स्थः शचीमिन्द्रो यथामृतम्। एवं रामो मुदा युक्तः सीतां सुरुचिराननाम्॥ रमयामास वैदेहीमहन्यहनि देववत्।' इति। अनिष्ठुरभाषित्वं च

अयोध्याकाण्डे — 'मृदुपूर्वं च भाषते । उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ।' इति च । धर्मात्मत्वं चायोध्याकाण्डे— 'सत्यधर्मपरायणः' 'साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ।' इति । 'ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः ।' 'धर्मात्मा सत्यसन्धश्च' 'रामो विग्रहवान् धर्मः' इति च । दृढच्छन्नवैरवत्त्वं चायोध्याकाण्डे—'हन्त्येष नियमाद्वध्यान् यद्येष खलु कुप्यति ।' इति ॥

मत्तगजगतिश्चायोध्याकाण्डे — 'दीर्घबाहुं महासत्त्वं मत्तमातंगगामिनम् ।' इति । आरण्यकाण्डेऽपि—'गजविक्रान्तगमनं जटामण्डलधारिणम् ।' इति । जलदाम्भोधिमृदङ्गतुल्यघोषत्वं च सुन्दरकाण्डे — 'दुन्दुभिस्वननिर्घोषः' इति । आरण्यकाण्डेऽपि—'सुस्वरं भैरवस्वरा' इति । स्मृतिमत्त्वं च बालकाण्डे—'स्मृतिमान् प्रतिभानवान्' इति । अभियोगवानिति । अभियोगोऽनुग्रहः सर्वजनरक्षणम्, 'विग्रहस्तु विरोधः स्यादभियोगस्त्वनुग्रहः' इत्यमरकोशात् । तद्वत्त्वं च बालकाण्डे — 'रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता । रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥' इति । विनीतत्वं च अयोध्याकाण्डे— 'वृद्धैरभिविनीतश्च' 'श्रुतवान् शीलसंपन्नो विनीतश्च परन्तपः ।' इति । स्वल्पभोजनेऽपि बलवत्त्वं च सीतावियोगसमये स्वल्पाहारस्यापि रावणादिहननादिषु महाबलप्रतिपादनादवगम्यते । तत्र स्वल्पाहारत्वं सुन्दरकाण्डे—'वन्यं सुविहितं नित्यं भक्तमश्नाति पंचमम् ।' 'तापसं नियताहारम्' इत्यादि । तदानीमपि महा-

बलवत्त्वं च—'पिशाचान् दानवान्यक्षान् पृथिव्यां ये च राक्षसाः। अंगुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर ॥' इति ॥

युद्धकाण्डे — 'गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लंकाम्। आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्थः ॥' इति। 'स ददर्श ततो रामः शक्त्या भिन्नं महाहवे। लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥ तामपि प्रहितां शक्तिं रावणेन बलीयसा। यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥ तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम्। बभञ्ज समरे क्रुद्धो बलवान्विचकर्ष च ॥' इति च ॥

विशालदीर्घनेत्रत्वं चायोध्याकाण्डे—'सुभ्रूरायतताम्राक्षः' 'पुण्डरीकविशालाक्षः', 'रक्ताक्षः प्रियदर्शनः' इत्यादि। प्राज्यायुश्च—'राज्यं दशसहस्राणि प्राप्य वर्षाणि राघवः' 'दश वर्षसहस्राणि दश वर्षशतानि च। भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत् ॥' इत्यादि। प्राज्यवित्तत्वं च—'असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः। राजवंशान् शतगुणान् स्थापयिष्यति राघवः ॥' इति। दीर्घदर्शित्वं च बालकाण्डे—'सर्वज्ञो दीर्घदर्शनः' इति। वदान्यत्वं च—'वदान्यो वल्गुवागपि' इत्यमरकोशात् मनोहरवाग्युक्तता। तदप्ययोध्याकाण्डे—'प्रियवादी च भूतानाम्' 'पूर्वभाषी प्रियंवदः' 'सर्वलोकप्रियंवदः' इति। श्रद्धा दृढभक्तिः, तद्वान् श्राद्धः। तद्वत्त्वं च अयोध्याकाण्डे—'दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचाः।' इति। गम्भीरत्वं च बालकाण्डे—'समुद्र इव गाम्भीर्ये' 'गम्भीर-

मर्हसि । काममेषामिदं कार्यं विदितं मम तत्वतः ॥ तथापि तु यथातत्वमाज्ञापयितुमर्हसि ।' इति ॥

कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः ।
कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते ॥

अनेन महाकार्यं साधयता पुरुषयत्नदेवताप्रार्थने कर्तव्ये इति सूचितम । तथा चोद्योगे धर्मं प्रति भगवान्—'क्षेत्रं हि रसवच्छुद्धं कर्षकेणोपपादितम । ऋते वर्षं न कौन्तेय जातु निर्वर्णयेत्फलम् ॥ तदिदं निश्चितं बुद्ध्या पूर्वैरपि महात्मभिः । दैवे च मानुषे चैव संयुक्तं लोककारणम् ॥' इति ॥

कच्चिन्न विगतस्नेहो विवासान्मयि राघवः ।
कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति वानर ॥

सुखानामुचितो नित्यमसुखानामनूचितः ।
दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥

कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥

कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः ।
ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥

वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति ।
मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥

कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः ।
अस्त्रविच्छरजालेन राक्षसान् विधमिष्यति ॥

कच्चिन्न तद्धेमसमानवर्णं तस्याननं पद्मसमानगन्धि ।
मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥

अत्र श्यामवर्णे रामे हेमसमानवर्णमुखत्वप्रतिपादनं नागसुवर्णस्य श्यामरूपत्वात्तदभिप्रायेण [इति] बोध्यम । तथा च विष्णुधर्मे — 'जाम्बूनदं तु देवानामिन्द्रकोपेन सन्निभम् । पितॄणां चन्द्ररश्म्याभं दैत्यानां शबलोपमम् । नागानां तच्छुकाभं स्यान्नराणां पीतमुच्यते ॥' इति ॥

धर्मोपदेशात्त्यजतश्च राज्यं
मां चाप्यरण्यं नयतः पदातिम् ।
नासीद्व्यथा यस्य न भीर्न शोकः
कच्चित्स धैर्यं हृदये करोति ॥

न चास्य माता न पिता न चान्यः
स्नेहाद्विशिष्टोऽस्ति मया समो वा ।
तावत्त्वहं दूत जिजीविषेयं
यावत्प्रवृत्तिं शृणुयां प्रियस्य ॥

इति वदन्तीं सीतामाञ्जनेय एवमुवाच—

न त्वामिहस्थां जानीते रामः कमललोचने ।
तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥

श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ।
चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥

विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् ।
करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम् ॥

तत्र यद्यन्तरा मृत्युर्युधि देवाः सहासुराः ।
स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ।

तवादर्शनजेनार्ये शोकेन स परिप्लुतः ।
न शर्म लभते रामः सिंहार्दित इव द्विपः ॥

दर्दुरेण च ते देवि शपे मूलफलेन च ।
मलयेन च विन्ध्येन मेरुणा मन्दरेण च ॥

अत्र हनूमता स्वेष्टकन्दमूलफलादिभिः दर्दुरादिपर्वतैश्च स्वावासभूतैः शपथकरणात् सर्वैरपि शपथकरणे प्राप्ते विश्वासोत्पादनाय स्वेष्टवस्तुभिरेव शपथः कर्तव्य इति सूचितम । तथा च कर्णपर्वणि धर्मं प्रत्यर्जुनः— 'सत्येन मे शपे राजन् त्वत्पादेन तथैव च । भीमेन च नरव्याघ्र यमाभ्यां च महीपते ॥ अहमेनं नरश्रेष्ठ सामात्यं च महीपते । यद्यहं समरे कर्णं हनिष्यामि हतोऽपि वा ॥ महीतले पतिष्यामि सत्येनैव च ते शपे ।' इति ॥

अयोध्याकाण्डेऽपि कैकेयीं प्रति दशरथः— 'अवलिप्ते न जानीषे त्वत्तः प्रियतरो मम । मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ तेन चारित्रमुख्येन राघवेण महात्मना । शपे ते जीवनार्हेण ब्रूहि यन्मनसेच्छसि ॥ यं मुहूर्तमपश्यंस्तु न जीवेयमहं ध्रुवम् । तेन रामेण कैकेयि शपे ते वचनाक्रियाम ॥ आत्मना चात्मजैश्चापि वृणे यं मनुजर्षभम् ।' इति ॥

क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ।
शतक्रतुमिवासीनं नागराजस्य मूर्धनि॥

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते।
वन्यं सुविहितं नित्यं भक्तमश्नाति पंचमम्॥

नैव दंशान्न मशकान्न कीटान्न सरीसृपान्।
राघवोऽपनयेद्गात्रात्त्वद्गतेनान्तरात्मना॥

नित्यं ध्यानपरो रामो नित्यं शोकपरायणः।
नान्यच्चिन्तयते देवि स तु कामवशंगतः॥

अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः।
सीतेति मधुरां वाणीं व्याहरन् प्रतिबुध्यते॥

दृष्ट्वा फलं वा पुष्पं वा यच्चान्यत्सुमनोहरम्।
बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते॥

स देवि नित्यं परितप्यमान-
स्त्वामेव सीतेत्यभिभाषमाणः।
दृढव्रतो राजसुतो महात्मा
तवैव लाभाय कृतप्रयत्नः॥

अत्र दंशमशकाद्यनिवारणेन मितेनाहारेण जागरणेन च दृढव्रततया रामभद्रस्यावस्थानप्रतिपादनं महाकार्यस्य प्रबलतर-शत्रुवधस्य सीताप्राप्तेश्चानियतेन साधयितुमशक्यत्वादवश्यकर्तव्य-

राजा च पिता च वृद्धः क्रोधात्प्रहर्षाद्यदि वापि कामात् ।
यद्यथादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ॥' इति ॥

युद्धकाण्डेऽपि—'अवश्यं त्रिषु लोकेषु न सीता पापमर्हति । दीर्घकालोषिता चेयं रावणान्तःपुरे शुभा ॥ बालिशः खलु कामात्मा रामो दशरथात्मजः । इति वक्ष्यन्ति मां सन्तो जानकीमविशोध्य हि ॥ अनन्यहृदयां भक्तां मच्चित्तपरिवर्तिनीम् । अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः । उपप्रेक्षे स्म वैदेहीं प्रविशन्तीं हुताशनम् ॥' इति । 'नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ।' 'अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् ॥ पलायन्तं प्रमत्तं वा नैव हन्तुं त्वमर्हसि ॥' 'नैव लोभान्न मोहाद्वा न ह्यज्ञानात्तमोऽन्वितः । सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥ क्षात्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् । क्षुद्रैर्नृशंसैर्लुब्धैश्च संहितं पापकर्मभिः ॥' इति ॥

अर्चिता वाक्, उन्नतं च मनः, अपराङ्मुखी मतिश्चोक्ता युद्धकाण्डे । भग्नकिरीटं रावणमभिवीक्ष्य रामः—'तं निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रकाशम् । गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेन्द्रम् ॥ कृतं त्वया कर्म महत्सुभीमं हतप्रवीरश्च कृतस्त्वयाहम् । तस्मात्परिश्रान्त इति व्यवस्ये न त्वां शरैर्मृत्युवशं नयामि ॥ गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लङ्काम् । आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्थः ॥'

इत्थं रामभद्रस्य सकलगुणविशिष्टवचनादिमत्त्वात्सामुद्रिकोक्ता अर्चितवचनादयः चत्वारोऽपि गुणा अत्युत्कृष्टास्तिष्ठन्तीति सकलकल्याणगुणपरिपूर्णः श्रीरामभद्रः पुरुषोत्तम इति सिद्धम् ॥

भ्रातापि तस्य द्वैमात्रः सौमित्रिरपराजितः ।
अनुरागेण रूपेण गुणैरपि तथाविधः ॥

तौ च धनुर्धरौ रामलक्ष्मणौ त्वदन्वेषणाय ऋश्यमूकप्रदेशमुपगतौ भ्रातृनिराकृतेन सुग्रीवेण सख्यमकुरुताम् । ततो वालिनं निहत्य राज्याभिषिक्तः सुग्रीवः त्वदन्वेषणाय महाबलान् वानरान् सर्वतः प्रेषितवान् । तेषु वानरयूथेषु अहमेको महोदधिमुत्तीर्य त्वदवलोकनेन परिपूर्णमनोरथोऽस्मि ॥

इति पञ्चत्रिंशः सर्गः ।

अथ षट्त्रिंशः सर्गः ॥

षट्त्रिंशे—तदनु भूयो विश्वासमुपजनयितुं रामनामाङ्कितमङ्गुलीयकं प्रदर्शितवति हनूमति प्रियकरभूषणावलोकनमात्रेण प्रियमेव सम्प्राप्तं मन्यमाना हर्षनिर्भरमानसा तमेवं प्रशशंस—

विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ।
येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥

शतयोजनविस्तीर्णः सागरो मकरालयः ।
विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥

न हि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ।
यस्य ते नास्ति संत्रासो रावणान्नापि संभ्रमः ॥

अर्हसे च कपिश्रेष्ठ मया समभिभाषणम् ।
यद्यसि प्रेषितस्तेन रामेण विदितात्मना ॥

प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् ।
पराक्रममविज्ञाय मत्सकाशे विशेषतः ॥

कच्चिन्न व्यथते रामः कच्चिन्न परितप्यते ।
उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥

कच्चिन्न दीनः संभ्रान्तः कार्येषु च न मुह्यति ।
कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥

द्विविधं त्रिविधोपायमुपायमपि सेवते ।
विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परन्तपः ॥

अत्र त्रिविधोपायं सामदानभेदरूपम, उपायमपि चतुर्थोपायं दण्डरूपमालोच्य द्विविधं कृत्वा उपसेवते किम् ?। मित्रेषु सामदाने, शत्रुषु भेददण्डौ इति यथोचितं विभज्य सेवते किमित्यर्थः। किं सेवत इति सीतोक्त्या इतरैरपि मित्रवशीकरणाय सामदानप्रयोगः, शत्रुजयाय भेदो दण्डश्च प्रयोक्तव्य इति सूचितम। तथा च उद्योगे विदुरः—'यस्य दानार्जितं मित्रममित्रा युधि निर्जिताः। अन्नपानजिता दाराः सफलं तस्य जीवितम् ॥' इति। कामन्दकेऽपि—मित्रपरिग्रहोऽमित्रनिग्रहश्च कर्तव्यः। तत्र मित्रसंग्रहे उपेक्षासामदानानि। अमित्रनिग्रहे च

भेददण्डौ प्रयोक्तव्यौ इति प्रतिपादितम्—'परिग्रहश्च मित्राणामभित्राणां च निग्रहः। उपेक्षा साम दानं च भेदो दण्डश्च साधनम्॥ उपकार्यपकारित्वमेतद्वृत्तं महीपतेः॥' इति॥

कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते।
कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः॥

अनेन स्वयं प्रयत्नेन मित्रसंपादने अन्यैरपि स्वयं बहुमतो भवेत् इति सूचितम्। अत एव रामोऽपि स्वप्रयत्नेन सुग्रीवं मित्रं संपादितवानिति प्रतिपादितं **किष्किन्धाकाण्डे**—'भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ। प्रतिगृह्यार्चयस्वैतौ पूजनीयतमावुभौ॥' इति। अन्येनापि मित्रभावेनासादित इत्येतदपि तत्रैव—'यत्त्वमिच्छसि सौहार्दं वानरेण मया सह। रोचते यदि वा सख्यं बाहुरेष प्रसारितः॥ गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां त्वया॥' इति। **युद्धकाण्डेऽपि** रामः—'मित्रभावेन सम्प्राप्तं न त्यजेयं कथंचन। दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम्॥' इति॥

मित्रे बहुमतिकरणं च **किष्किन्धाकाण्डे**—'त्वत्सनाथः सखे संख्ये जेतास्मि सकलान् रिपून्। त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि॥' इति। 'नाहमस्मि प्रभुः कार्ये वानरेश न लक्ष्मणः॥ त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर। त्वमेवाज्ञापय विभो मम कार्यविनिश्चये॥' इति च। मित्रेण बहुमन्यमानत्वमपि तत्रैव—'त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितु-

त्रिषु नित्यशः' इति। स्थूललक्षत्वं च बालकाण्डे— 'धनदेन समस्त्यागे' इति॥

क्षमावत्त्वं च बालकाण्डे—'क्षमया पृथिवीसमः' इति। 'संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः।' इति च। आर्यत्वं च बालकाण्डे—'आर्यः सर्वसमश्चैव' इति। अनिद्रत्वं च सुन्दरकाण्डे—'अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः।' इति। कृतज्ञत्वं च बालकाण्डे—'धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।' इति। अयोध्याकाण्डेऽपि—'कृतज्ञो विजितेन्द्रियः' 'शास्त्रज्ञश्च कृतज्ञश्च' इति। 'उत्साहः पौरुषं सत्वमानृशंस्यं कृतज्ञता। विक्रमश्च प्रभावश्च सन्ति वानर राघवे॥' इति च। ऋजुः सरळः। तथा च अयोध्याकाण्डे—'अदीनः सत्यवागृजुः' 'ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे।' इति। विपश्चित्त्वं च बालकाण्डे—'सर्वशास्त्रार्थतत्वज्ञः' 'न चानृतकथो विद्वान्' इति। सुभगः बहुश्रीकः। तथा च बालकाण्डे—'श्रीमान् शत्रुनिबर्हणः' इति। अयोध्याकाण्डेऽपि—'अनुरूपः स वो नाथो लक्ष्मीवान् लक्ष्मणाग्रजः।' इति। सुलज्जत्वं च बालकाण्डे—'ह्रीमन्तः कीर्तिमन्तश्च' इति। गुरुभक्तिश्च बालकाण्डे—'गुरूणां गुरुकार्याणि काले कालेऽन्ववैक्षत।' अयोध्याकाण्डे—'सत्यवादी महेष्वासो वृद्धसेवी जितेन्द्रियः।' इति। दृढोत्साहत्वं चायोध्याकाण्डे—'उत्सवेषु च सर्वेषु पितेव परितुष्यति।' इति। इन्द्रादितुल्यत्वं च अयोध्याकाण्डे—'दिव्यैर्गुणैः शक्रसमः', 'लोकपालोपमं नाथमकामयत मेदिनी।' इति च। आरण्यकाण्डेऽपि—'राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः।' इति।

इत्थं सर्वोत्कृष्टकफप्रकृतिपुरुषगतानां गुणानां श्रीरामे प्रतिपादनात् रामः कफप्रकृतिः सर्वपुरुषोत्तम इति सिद्धम् ॥

अत्र हनूमता अनन्तकल्याणगुणाकरेऽपि श्रीरामे सीताविश्वासोत्पादनार्थतया सामुद्रिकशास्त्रसिद्धाः 'त्रिस्थिरस्त्रिप्रलम्बश्च' इत्यादिना कतिपयगुणाः संक्षेपेण प्रतिपादिताः । इतोऽपि सारभूता वाङ्मनःकायबुद्धिगताः चत्वारो गुणाः सामुद्रिकशास्त्रे दृश्यन्ते । तथाहि— 'अर्चितं वचनमुन्नतं मनो निर्विशेषसुखदं दृशां वपुः । अस्ति चेदघपराङ्मुखी मतिर्लक्षणैः किमपरैर्नृयोषिताम् ॥' इति । अत्र वचनस्यार्चितत्वं सत्यप्रियहितमृदुमाधुर्यादिगुणशालित्वेन भवति । मनस औन्नत्यं चोत्कृष्टत्वम् । तच्च धैर्यस्थैर्यगाम्भीर्यौदार्यादिगुणयोगेन । वपुषो निर्विशेषसुखदत्वमपि सुकुमारकान्तिमत्त्वप्रियदर्शनत्वादियोगेन । बुद्धेरघपराङ्मुखत्वमपि परधनपरद्रोहपरदाराभिरतिराहित्येन भवति ॥

रामवचनादेश्च सत्यत्वादिगुणशालित्वं भगवता वाल्मीकिना तत्र तत्र प्रदर्शितम् । तथाहि वचनविषये— 'अदीनः सत्यवागृजुः' 'प्रियवादी च भूतानां सत्यवादी च राघवः ।' 'न चानृतकथो विद्वान्' 'बुद्धिमान् मधुराभाषी पूर्वभाषी प्रियंवदः ।' 'वाचा मधुरया रामः सर्वं संमानयन् जनम् ।' 'पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ।' इति । 'स तु नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते ।' 'ते तमूचुर्महात्मानं पौरजानपदा जनाः । काकुत्स्थमभिजानीमः सम्यग्वदति राघवः ॥' 'धर्मे स्थितो धर्म्यमुवाच वाक्यं यथा स एवार्हति तत्र वक्तुम् ।' इति च ॥

मनोविषये च– 'धैर्येण हिमवानिव' 'मृदुश्च स्थिरचित्तश्च' 'कल्याणाभिजनः साधुरदीनात्मा महामतिः' 'न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्। सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥' 'सर्वो ह्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः। नालक्षयत रामस्य किंचिदाकारमानने ॥ उचितं च महाबाहुर्न जहौ हर्षमात्मनः। शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मजम् ॥' 'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः॥' उत्सवेषु च सर्वेषु पितेव परितुष्यति।' 'न विरुद्धकथारुचिः। 'उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥ कथंचिदुपकारेण कृतेनैकेन तुष्यति। न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥' 'अनुरक्तं च भक्तं च मम चैवोपकारिणम् ॥ एष मे परमः कामो यदीमं रावणानुजम्। लंकायां सौम्य पश्येयमभिषिक्तं विभीषणम् ॥' 'वीर्यवान्न तु वीर्येण महता स्वेन विस्मितः।' 'न चापि महतीं लक्ष्मीं राज्यनाशोऽपकर्षति। लोककान्तस्य कान्तत्वं शीतरश्मेरिव क्षपा ॥' 'दृष्ट एव हि नः शोकमपनेष्यति राघवः।' इति ॥

वपुर्विषयेऽपि– 'सोमवत्प्रियदर्शनः' 'आजानुबाहुं दीप्तास्यमतीव प्रियदर्शनम्।' 'अरोगस्तरुणो वाग्मी वपुष्मान् देशकालवित्।' 'सुकुमारं महासत्वं पार्थिवव्यञ्जनान्वितम्' 'राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम्।' 'कन्दर्पसमरूपश्च रामो दशरथात्मजः।' इति ॥

मतिविषयेऽपि–'पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमागतम्।

किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥ यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् । नाहं तत्प्रतिगृह्णीयां भक्ष्यान् विष-कृतान् यथा ॥' 'न कामये ह्यधर्मेण शक्रत्वमपि लक्ष्मण । 'कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि ॥ भ्राता वा भ्रातरं हन्यात् सौमित्रे प्राणमात्मनः ।' 'विदितश्चास्तु भद्रं ते योऽयं रणपरिश्रमः । स तीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः ॥ रक्षता तु मया वृत्तमपवादं च सर्वशः । प्रख्यातस्यात्मवंशस्य न्यंगं च परिरक्षता ॥ निर्जितासि मया सीते शत्रुं जित्वा महारणे । प्राप्त-चारित्रसन्देहा मम प्रतिमुखे स्थिता । दीपो नेत्रातुरस्येव प्रति-कूलासि मे दृढम् ॥ कः पुमान् हि कुले जातः स्त्रियं परगृहो-षिताम् । तेजस्वी पुनरादद्यात्सुहृल्लेख्येन चेतसा ॥ तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया । नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः ॥ रावणाङ्कपरिभ्रष्टां दृष्टां दुष्टेन चक्षुषा । कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् ॥' 'कथं ह्यहं प्रतिज्ञाय वनवास-मिमं गुरौ । भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ॥' इति ॥

अयोध्याकाण्डे—'यशो ह्यहं केवलराज्यकारणान्न पृष्ठतः कर्तुमलं महोदयम् ।' 'उपधिर्न मया कार्यो वनवासे जुगु-प्सितः ।' 'अधर्मं धर्मवेषेण यदीमं लोकसंकरम् । अभिपत्स्ये शुभं हित्वा क्रियाविधिविवर्जितम् ॥ कश्चेतयानः पुरुषः कार्या-कार्यविचक्षणः । बहुमंस्यति मां लोके दुर्वृत्तं लोकदूषकम् ॥' 'सुसंश्रुत्य पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा । न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ॥ सोऽहं न शक्ष्यामि पितुर्नियोगमति-वर्तितुम् । तदेनां विसृजानार्यां क्षत्रधर्माश्रितां मतिम् ।' 'गुरुश्च

तपश्चरणाभिप्रायकं वेदितव्यम् । महाकार्यसाधनाय तपश्चरणं चावश्यकमित्येतत्प्राक् प्रपंचितम् ॥

इति षट्त्रिंशः सर्गः ।

अथ सप्तत्रिंशः सर्गः ।

सप्तत्रिंशे— अथ सीता तद्वचनमाकर्ण्य धर्मादनपेतमिदमुवाच—

अमृतं विषसंसृष्टं त्वया वानर भाषितम् ।
यच्च नान्यमना रामो यच्च शोकपरायणः ॥

ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥

विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ।
सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥

अनेन सुखं दुःखं वा स्वकर्मफलं दैववशेन बलात्प्राप्नोति इति सूचितम् । तथा च भारते— 'येन यत्र च भोक्तव्यं सुखं वा दुःखमेव वा । स तत्र रज्ज्वा बद्ध्वेव बलाद्दैवेन नीयते ॥' इति । विष्णुपुराणेऽपि— 'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥' इति ॥

स वाच्यः संत्वरस्वेति यावदेव न पूर्यते ।
अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥

वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगम ।
रावणेन नृशंसेन समयो यः कृतो मम ॥

विभीषणेन च भ्रात्रा मम निर्यातनं प्रति ।
अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥

मम प्रतिप्रदानं हि रावणस्य न रोचते ।
रावणं मार्गते संख्ये मृत्युः कालवशंगतम् ॥

ज्येष्ठा कन्यानला नाम विभीषणसुता कपे ।
तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥

आशंसेयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः ।
अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥

उत्साहः पौरुषं सत्वमानृशंस्यं कृतज्ञता ।
विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥

अनेन उत्साहादिगुणवतो महापुरुषस्यारब्धं कार्यं सिध्यतीति सूचितम् । तथा च राजधर्मे— 'न तप्येतार्थकृच्छ्रेषु प्रजाहितमनुस्मरन् । यः प्रियं कुरुते नित्यं गुणतो वसुधाधिपः ॥ तस्य कर्माणि सिध्यन्ति न च संत्यज्यते श्रिया ॥' इति ॥

चतुर्दशसहस्राणि राक्षसानां जघान यः ।
जनस्थाने विना भ्राता शत्रुः कस्तस्य नोद्विजेत् ॥

न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः ।
अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥

ततो महत्या वानरसेनया क्षिप्रमेवागमिष्यति रामभद्रः। अथवा, सनिशाचरां लंकामिमां वोढुं समर्थस्य मम स्कन्धे समारूढां त्वामुत्तीर्य सागरं रामपार्श्वमचिरादेव प्रापयामीति वदन्तं हनूमन्तं सीता प्रत्याह—

हनूमन्दूरमध्वानं कथं मां वोढुमिच्छसि।
तदेव खलु ते मन्ये कपित्वं हरियूथप॥

कथं वाल्पशरीरस्त्वं मामितो नेतुमिच्छसि।
सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ॥

अनेन शौर्यादिगुणयुक्तस्यापि जातिप्रयुक्ता निन्दा भवतीति सूचितम्। अत एव युधिष्ठिरराजसूये श्रीकृष्णस्याग्रपूजायां संक्रुद्धैः शिशुपालादिभिर्जातिनिन्दा प्रतिपादिता सभापर्वणि— 'कथं ह्यराजा दाशार्हो मध्ये सर्वमहीक्षिताम्। अर्हणामर्हति तथा यथा युष्माभिरर्चितः॥' इति। तत्रैव कर्णं प्रति भीमवचनम्— 'न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम्। कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया॥ एवमुक्तस्ततः कर्णः किंचित्प्रस्फुरिताधरः। गगनस्थं विनिश्वस्य दिवाकरमुदैक्षत॥' इति॥

आदिपर्वण्यपि कर्णं प्रति कृपः— 'अयं पृथायास्तनयः कनीयान् पाण्डुनन्दनः। कौरवो भवता सार्धं द्वन्द्वयुद्धं करिष्यति॥ त्वमप्येवं महाबाहो मातरं पितरं तथा। कथयस्व नरेन्द्राणां येषां त्वं कुलभूषणः॥ ततो विदित्वा पार्थस्त्वां प्रतियोत्स्यति वा न वा। वृथाकुलसमाचारैर्न युध्यन्ते नृपात्मजाः॥ वैशंपायनः— एवमुक्तस्य कर्णस्य व्रीडावनतमाननम्। बभौ वर्षाम्बुदक्लिन्नं पद्ममाकुलितं यथा॥' इति॥

ततः—

सीताया वचनं श्रुत्वा हनूमान् मारुतात्मजः ।
चिन्तयामास लक्ष्मीवान्नवं परिभवं कृतम् ॥

अनेन बुद्धिमतो नूतनः परिभवोऽसह्य इति सूचितम् । तथा च कालिदासः—'गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् । गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥' इति ॥

न मे जानाति सत्वं वा प्रभावं वासितेक्षणा ।
तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥

इति संचिन्त्य--

दर्शयामास वैदेह्याः स्वरूपमरिमर्दनः ।
मेरुमन्दरसंकाशो बभौ दीप्तानलप्रभः ॥

ततः सीता मंदरगिरिसन्निभं हनूमन्तमवलोक्य सबहुमानमित्थमाचचक्षे—

तव सत्वं बलं चैव विजानामि महाकपे ।
वायोरिव गतिं चापि तेजश्चाग्नेरिवाद्भुतम् ।
प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति ॥

अयुक्तं तु हरिश्रेष्ठ मम गन्तुं त्वयानघ ।
वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥

प्रपतेयं हि ते पृष्ठाद्भयाद्वेगेन गच्छतः ॥

भवेयमाशु विवशा यादसामन्नमुत्तमम् ॥

रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ।
त्रातुमर्हसि वीर त्वं पाताळादिव कौशिकीम् ॥

इत्यभिधाय वस्त्रगतं चूडामणिं च हनूमते प्रदाय,

असमाद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥

जीवन्तीं मां यथा रामः संभावयति कीर्तिमान् ।
स त्वया हनुमन्वाच्यो वाचा धर्ममवाप्नुहि ॥

अनेन राजकीयानां वाङ्मात्रेण धर्मलाभः उक्तः । तथा चाभियुक्ताः— 'अनायासेन राजेन्द्र वाक्येनैकेन सिद्ध्यति । ब्रह्महत्याश्वमेधाभ्यां फलं राजोपसेविनाम् ॥' इति ॥

बलैस्समग्रैर्यदि मां रावणं जित्य संयुगे ।
विजयी स्वपुरीं यायात्तत्तु मे स्याद्यशस्करम् ॥

शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥

(स्वबाहुबलमाश्रित्य यस्तु जीवति मानवः ।
स्वलोके लभते कीर्तिं परत्र च शुभां गतिम् ॥)

अनेन राज्ञां पराक्रमेण सर्वार्थसाधनमुत्कृष्टतरमिति सूचितम् । तथा चोद्योगे विदुरवचनम्-'वृत्तेः कार्पण्यलब्धाया अप्रतिष्ठैव ज्यायसी । विक्रमोपार्जितान् भोगान् वृणीध्वं जीवितादपि ॥ विक्रमाधिगता ह्यर्थाः क्षत्रधर्मेण जीवतः । मनो मनुष्यस्य सदा प्रीणाति पुरुषोत्तमम् ॥ शूरस्यार्जितसत्वस्य सिंहविक्रान्तचारिणः । दिष्टभावं गतस्यापि मोदन्ते यदिह प्रजाः ॥' इति ॥

इति वदन्तीं सीतां हनुमानिदमाचचक्षे— स्कन्धे समारोप्य रामलक्ष्मणौ सानुचरं सुग्रीवंचादायाचिरादेवाहमागच्छामि ॥

मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥

अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥

अनेन उत्कृष्टा निकृष्टे कार्ये न प्रेषणीया इत्युक्तम् । तथा च उद्योगे विदुरः— 'उत्तमानुत्तमेष्वेव मध्यमेषु च मध्यमान् । जघन्येषु जघन्यांश्च नियोजयसि पार्थिव ॥' इति ॥

तदलमनेन निरर्थकचिन्ताप्रकारेण ।

नास्मिंश्चिरं वत्स्यसि देवि देशे
रक्षोगणैरध्युषितेऽतिरौद्रे ।
न ते चिरादागमनं प्रियस्य
क्षमस्व मत्संगमकालमात्रम् ॥

इति अष्टात्रिंश-एकोनचत्वारिंशौ सर्गौ ।

अथ चत्वारिंशः सर्गः ॥

चत्वारिंशे—ततः—

त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर ।
अर्धसंजातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥

यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः ।
संस्पृशेयं सकामाहं तथा कुरु दयां मयि ॥

काकमात्रशिक्षणाय प्रक्षिप्तामिषीकाम् , गण्डपार्श्वनिवेशितं मनःशिलातिलकं च संस्मार्य वारिसंभवं चूडामणिं च प्रदाय क्षिप्रमेव रामागमनाय संविधत्स्व ॥

एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम् ।
श्रद्धेयं हनुमन् वाक्यं तव वीर भविष्यति ॥

इमं च तीव्रं मम शोकवेगं
रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरिप्रवीर ॥

स राजपुत्र्या प्रतिबोधितार्थः
कपिः कृतार्थः परिहृष्टचेताः ।
अल्पावशेषं प्रसमीक्ष्य कार्यं
दिशं ह्युदीचीं मनसा जगाम ॥

इति चत्वारिंशः सर्गः ।

अथ एकचत्वारिंशः सर्गः ॥

एकचत्वारिंशे—

स च वाग्भिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया ।
तस्माद्देशादपक्रम्य चिन्तयामास वानरः ।

अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ।
त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥

न साम रक्षस्सु गुणाय कल्पते
न दानमर्थोपचितेषु युज्यते ।
न भेदसाध्या बलदर्पिता जनाः
पराक्रमस्त्वेव ममेह रोचते ॥

न चास्य कार्यस्य पराक्रमादृते
विनिश्चयः कश्चिदिहोपपद्यते ।
हतप्रवीरास्तु रणे हि राक्षसाः
कथंचिदीयुर्यदिहाद्य मार्दवम् ॥

अत्र राक्षसेषु सामोपायो न संभवतीत्युक्त्या शान्तबुद्धिषु साम प्रयोक्तव्यम् । अर्थोपचितेषु दानं नावकल्पत इत्युक्त्या दरिद्रेषु लुब्धेषु दानं प्रयोक्तव्यम् । बलगर्वितेषु सर्वतो भीतिविवर्जितेषु भेदो न प्रयोक्तव्य इत्युक्त्या भीतेष्वेव भेदः प्रयोक्तव्यः । उपायत्रयेण असाध्ये दण्डः प्रयोक्तव्य इति सूचितम् । तथा च कामन्दके— 'मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन सन्नयेत् । लुब्धं तीक्ष्णं च दानेन सत्कृत्य वशमानयेत् ॥ भीतः स्वदोषवित्रस्तः कृतवैरोऽभिसान्त्वितः । इति भेद्याः समाख्याता भिन्द्यादेतान् परे स्थितान् ॥ सामादीनामुपायानां त्रयाणां विफले नये । विनयेन्नयसंपन्नो दण्डं दण्ड्येषु दण्डवित् ॥' इति ॥ राजधर्मेऽपि— 'सन्निपातो न मन्तव्यः शक्ये सति कथंचन । सान्त्वभेदप्रदानानां युद्धमुत्तरमुच्यते ॥' इति ॥

ततस्तं वायसं दर्भः सोऽम्बरेऽनुजगाम ह ।
स च पित्रा परित्यक्तः सुरैः सर्वैर्महर्षिभिः ॥

त्रीन् लोकान् संपरिक्रम्य तमेव शरणं गतः ।

अनेन महापुरुषेषु प्रसक्तः अपराधः तत्प्रणिपातादिनैव समाधातव्य इति सूचितम् । तथा च द्रोणपर्वणि शतरुद्रीये-- 'तं दृष्ट्वा तु सुराः सर्वे प्रणिपत्य महेश्वरम् । रुद्रस्य यज्ञभागं च विशिष्टं ते त्वकल्पयन् ॥ भयेन त्रिदशा राजन् शरणं च प्रपेदिरे । तेन चैवातिकोपेन स यज्ञः स्तम्भितस्तदा ॥' इति ॥

आदिपर्वण्यपि और्वतेजसा परिमुषितलोचनानां हैहयानां पुनस्तत्प्रसादेनैव चक्षुःप्राप्तिरुक्ता और्वोपाख्याने-- 'ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः । ददृशुर्ब्राह्मणीं तेऽथ दुद्रुवुस्तामनिन्दिताम् ॥ ततो गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह । मुष्णन्दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः ॥ ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः । ब्राह्मणीं शरणं जग्मुर्दृष्ट्यर्थं तामनिन्दिताम् ॥ सपुत्रा त्वं प्रसादं नः कर्तुमर्हसि शोभने ॥

ब्राह्मणी-- नाहं गृह्णामि वस्तात दृष्टीर्नास्मि रुषान्विता । तमिमं याचत क्रुद्धमौर्वं मम सुतोत्तमम् ॥ एवमुक्तास्ततस्सर्वे राजानस्ते तमूरुजम् । ऊचुः प्रसीदेति तदा प्रसादं च चकार सः । चक्षूंषि प्रतिलभ्ध्वा च प्रतिजग्मुस्ततो नृपाः ॥' इति ॥

त्रिपुरदाहे--'पुराणि दग्धवन्तं तं देवा याताः प्रवीक्षितुम् । बालमङ्कगतं कृत्वा स्वयं पञ्चशिखं पुनः । असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः ॥ बाहुं सवज्रं तं तस्य क्रुद्धस्यास्तम्भयत्प्रभुः ।

प्रहस्य भगवांस्तूर्णं सर्वलोकेश्वरः प्रभुः ॥ ततः संस्ताम्भितभुजः शक्रो देवगणैर्वृतः । जगाम ससुरस्तूर्णं ब्रह्माणं प्रभुमव्ययम् ॥ ते तं प्रणम्य शिरसा प्रोचुः प्राञ्जलयस्तदा । बालरूपधरं दृष्ट्वा नास्माभिरभिवादितः ॥ तस्मात्त्वां प्रष्टुमिच्छामो निर्जिता येन वै वयम् । अयुध्यता हि बालेन लीलया सपुरन्दराः ॥ तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदां वरः । उवाच भगवान् ब्रह्मा शक्रादींश्च सुरोत्तमान् । न संबुबुधिरे चैनं देवास्तं भुवनेश्वरम् ॥ ते मया सहिता यूयं प्रपद्यध्वं तमेव हि । अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा च स महेश्वरम ॥ अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तं पितामहः ॥'

ब्रह्मोवाच—'भगवन् भूतभव्येश लोकनाथ जगत्पते । प्रसादं कुरु शक्रस्य त्वया क्रोधार्दितस्य वै ॥ पद्मयोनेर्वचः श्रुत्वा ततः प्रीतो महेश्वरः । अभवच्च पुनर्बाहुः प्रकृतिस्थो हि वज्रिणः । तेषां प्रसन्नो भगवान् सपत्नीको वृषध्वजः ॥' इति ॥

स तं निपतितं भूमौ शरण्यः शरणागतम् ॥
वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ।

अनेन वध्योऽपि शरणागतः संरक्षणीय इत्युक्तम् । तथा च श्रुतिः—'तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति' इति । ततो रामो विषण्णवदनमन्तिके निपतितं जयन्तमवलोक्य,

मोघं कर्तुं न शक्यं हि ब्राह्ममस्त्रं तदुच्यताम् ।

इत्यभिधाय,

ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ।
तदाप्रभृति काकानामेकमक्षि विधीयते ॥

अनेन एकस्यापराधात्काकजातिमात्रस्य एकाक्षत्वप्रतिपादनादन्येनापि महत्स्वपराधः कृतश्चेत्तज्जातिमात्रस्यानिष्टं भवतीति सूचितम् । अत एव युधिष्ठिरः एकस्याः कुन्त्या अपराधेन स्त्रीजातिमात्रं शशापेत्युक्तं शान्तिपर्वणि– 'भवत्या गूढमन्त्रत्वात्पीडिताः स्म यदा भृशम् । शशाप च महातेजाः सर्वलोकेषु योषितः ॥ न गुह्यं धारयिष्यन्ति अतिदुःखसमन्विताः ।' इति ॥

मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम् ।
कस्माद्यो मां हरेत्त्वत्तः क्षमसे तं महीपते ॥

जानामि त्वां महावीर्यं महाबलपराक्रमम् ।
अपारपारमक्षोभ्यं गाम्भीर्यात्सागरोपमम्
भर्तारं ससमुद्राया धरण्या वासवोपमम् ।
एवमस्त्रविदां श्रेष्ठः सत्यवान् बलवानपि ।
किमर्थमस्त्रं रक्षःसु न योजयसि राघव ॥

इति रहस्यमभिज्ञानं भाषमाणां सीतां बहुशः प्रशस्य सर्वथा दाशरथी रामलक्ष्मणौ अचिरादेव लंकामिमां प्रविश्य सगणं रावणमभिहत्य स्वां पुरीं त्वां प्रतिनेष्यतः । तदनुजानीहि प्रस्थातुमिमं जनं इत्याञ्जनेयेनाञ्जसाभिहिता सीता तमेवमवादीत्—

कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ।
तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥

स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ।
ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् ॥

पितरं मातरं चैव संमान्याभिप्रसाद्य च ।
अनुप्रव्राजितो रामं सुमित्रा येन सुप्रजाः ॥

आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम् ।
अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ॥

सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ।
पितृवद्वर्तते रामे मातृवन्मां समाचरन् ॥

अनेन ज्येष्ठभ्रातरि पितृवद्वर्तितव्यम् । तद्भार्यायां च मातृवद्वर्तितव्यमिति सूचितम् । तच्चायोध्याकाण्डे प्रतिपादितम् ॥

ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ।
वृद्धोपसेवी लक्ष्मीवान् शक्तो न बहुभाषिता ॥

राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ।
मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ॥

नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ।
यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरेत् ॥

स ममार्थाय कुशलं वक्तव्यो वचनान्मम ।
इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ॥

त्वमस्मिन् कार्यनियोगे प्रमाणं हरिसत्तम ।
राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ॥

जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥

न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन ।
कळत्रवति संदेहस्त्वय्यपि स्यादसंशयः ॥

ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः ।
अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥

सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः ।
कथं शक्ष्यसि संयातुं मां चैव परिरक्षितुम् ॥

युध्यमानस्य रक्षोभिस्तव तैः क्रूरकर्मभिः ।
प्रपतेयं हि ते पृष्ठाद्भयार्ता कपिसत्तम ॥

कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ।
पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥

मां वा हरेयुस्त्वद्धस्ताद्विशसेयुरथापि वा ।
अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥

अहं वापि विपद्येय रक्षोभिरभितर्जिता ।
त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥

कामं त्वमसि पर्याप्तो निहन्तुं सर्वराक्षसान् ।
राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥

अथवादाय रक्षांसि न्यसेयुः संवृते हि माम् ।
यत्र ते नाभिजानीयुर्हरयो नापि राघवौ ॥

आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ।
त्वया हि सह रामस्य महानागमने गुणः ॥

मयि जीवितमायत्तं राघवस्य महात्मनः ।
भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥

तौ निराशौ मदर्थे तु शोकसन्तापकर्शितौ ।
सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥

भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर ।
न स्पृशामि शरीरं तु पुंसो वानरपुंगव ॥

(नाहं स्प्रष्टुं तदा गात्रमिच्छेयं वानरोत्तम ।)
यदहं गात्रसंस्पर्शं रावणस्य बलाद्गता ॥

अनीशा किं करिष्यामि विनाथा विवशा सती ।

अनेन पतिव्रतायाः परपुरुषस्पर्शोऽयुक्त इत्युक्तम् । तच्च प्रागुक्तम् ॥

यदि रामो दशग्रीवमिह हत्वा सबान्धवम् ॥
मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ।

अनेन महान्तो विपत्कालेऽपि क्षुद्रमार्गे न प्रवर्तन्त इति सूचितम् ।

तथा च प्राचीनाः— 'क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशामापन्नोऽपि विपन्नदीधिति[धीधृति]-रपि प्राणेषु नश्यत्स्वपि । मत्तेभेन्द्रविभिन्नकुंभपिशितग्रासैकबद्ध-स्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥' इति ॥

स मे हरिश्रेष्ठ सलक्ष्मणं पतिं
सयूथपं क्षिप्रमिहोपपादय ।

चिराय रामं प्रति शोककर्शितां
कुरुष्व मां वानरमुख्य हर्षिताम् ॥

इति सप्तत्रिंशः सर्गः ।

अथ अष्टत्रिंशैकोनचत्वारिंशौ सर्गौ ।

ततः सीतावचनसंश्रवणसंजातहर्षो हनूमान्,

युक्तरूपं त्वया देवि भाषितं शुभदर्शने ।
सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥

रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ।
एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः ॥

का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ।

इत्यभिधाय, अभिज्ञानमसाधारणं प्रार्थितवान् । ततः सीता दीर्घमुष्णं विनिश्वस्य मन्दं मन्दमिदमाह— पुरा किल मन्दाकिन्याः परिसरे सुचिरं विहृत्य समुपविष्टां मां मदङ्कसंसुप्तं रामं चावलोक्य शक्रपुत्रो धराधरा[जयन्ता]भिधो वायसवेषं परिगृह्य खरतरेण नखाग्रेण पयोधरप्रान्ते भृशं विरराद ॥

ततः समुत्थितो रामो मुक्तैः शोणितबिन्दुभिः ।
वायसेन ततस्तेन बलवत्क्लिश्यमानया ॥

स मया बोधितः श्रीमान्सुखसुप्तः परंतपः ।

अत्र 'बलवत् क्लिश्यमानया' इति विशेषणात् सुखसुप्तो न बोधनीयः; सुप्तस्य धर्मलोपप्रसक्तौ तस्यापत्प्रसक्तौ वा सुप्तोऽपि बोधनीय इति सूचितम्। [सुप्तो] न प्रबोधनीय इत्येतत् बृहदारण्यके-- 'तं नायतं बोधयेदित्याहुः दुर्भिषज्यँ हास्मै भवति। यमेष न प्रतिपद्यते' इति। मनुरपि— 'न श्रेयांसं प्रबोधयेत्' इति। आनुशासनिके-- 'दिवा च न स्वपेज्जातु न च सुप्तं प्रबोधयेत्।' इति ॥

धर्मलोपप्रसक्तौ प्रबोधनं आदिपर्वणि जरत्कारूपाख्याने-जरत्कारुमहर्षिः कदाचिच्छ्रमापनोदनाय जरत्कारुनामधेयाया भार्याया उत्संगे शिरो निधाय सुष्वाप। 'तस्मिंश्च सुप्ते विप्रेन्द्रे सविताऽस्तमयाद्गिरिम। उत्थापयिष्ये यद्येनं ध्रुवं कोपं करिष्यति॥ धर्मलोपो भवेदस्य सन्ध्यातिक्रमणे ध्रुवम्। कोपो वा धर्मशीलस्य धर्मलोपोऽथवा पुनः॥ धर्मलोपो गरीयान्वै स्यादत्रेत्यकरोन्मनः। उत्तिष्ठ त्वं महाभाग सूर्योऽस्तमुपगच्छति'॥ इति भर्तृकोपमप्यङ्गीकृत्य प्राबोधयदिति प्रतिपादनादवगम्यते। तथा रामायणे विश्वामित्रेण रामप्रबोधनं कृतमित्युक्तम्— 'उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्।' इत्यादि॥

आपदि सुप्तस्यापि प्रबोधनं च विराटे-- 'अभ्यभाषत पाञ्चाली भीमसेनमनिन्दिता। उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन मृतो यथा॥ बाहुभ्यां परिरभ्यैनं प्राबोधयदनिन्दिता।' इति॥

ततो रामः अपराधिनं वायसमुद्दिश्य संस्तरदर्भमादाय ब्रह्मास्त्रेण संयोज्य क्षिप्तवान्॥

कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ।
पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥

न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः ।
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥

इहैव तावत्कृतनिश्चयो ह्यहं
यदि व्रजेयं प्लवगेश्वरालयम् ।
परात्मसंमर्दविशेषतत्त्ववि-
त्ततः कृतं स्यान्मम भर्तृशासनम् ॥

कथं नु खल्वद्य भवेत्सुखागतं
प्रसह्य युद्धं मम राक्षसैः सह ।
तथैव खल्वात्मबलं च सारव-
त्संमानयेन्मां च रणे दशाननः ॥

ततः समासाद्य रणे दशाननं
समन्त्रिवर्गं सबलप्रयायिनम् ।
हृदि स्थितं तस्य मतं बलं च वै
सुखेन मत्वाहमितः पुनर्व्रजे ॥

अनेन राजनिर्दिष्टे कार्ये बहूपायान् यो वेद, विचार्य च करोति, स एव दूतः कार्यसाधक इति सूचितम् । विचारकेणैव दूतेन कार्यसिद्धिः [इत्युक्तं] कामन्दके— 'स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन् । अन्तपालांस्तु कुर्वीत मित्राण्याटविकांस्तथा ॥ जलस्थानानि मार्गांश्च विद्यात्स्वबलसिद्धये । नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदि ॥ कालमीक्षेत कार्यार्थमनुज्ञातश्च

निष्पतेत् । सारवत्तां च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च ॥ छिद्रं शत्रोर्विजानीयात्कोशमित्रबलानि च । युद्धापसारभूज्ञानं दूतःकर्मेति कथ्यते ॥ दूतेनैव नरेन्द्रस्तु कुर्वीतारिविकर्षणम् ।' इति ॥

[इति] विचिन्त्य दशाननानुचरैः सह युद्धं कर्तुकामो मारुतिस्तरसा जानकीनिवासभूतां शिंशुपामेकां परित्यज्य अशोकवनिकां बभञ्ज ॥

इति एकचत्वारिंशः सर्गः ।

अथ द्विचत्वारिंशः सर्गः ॥

द्विचत्वारिंशे— तदनु भयानकवेषेण मारुतिना प्रभग्नवरपादपं वनमवलोक्य 'कोऽयं कुतो वा अत्र समागतो वानरः, येन कृतसंभाषणासि' इति पृच्छन्ती राक्षसीः सीता समभाषत—

यूयमेवाभिजानीत योऽयं यद्वा करिष्यति ।
अहिरेव ह्यहेः पादान् विजानाति न संशयः ॥

यथा अहेः पादानहिरेव जानाति, तथा मायाविनां मायां मायाविन एव जानत इत्युक्तं भवति । अत एव द्रोणपर्वणि मायाविनोऽलायुधस्य मायां माययैव ज्ञात्वा हैडिम्बिः माययैव तां मायामवधीदित्युक्तम् —'तां प्रेक्ष्य विहितां मायां राक्षसो राक्षसेन तु । ऊर्ध्वमुत्प्लुत्य हैडिम्बिस्तां मायां माययावधीत् ॥' इति ॥

ततो राक्षसीमुखावगतवनभंगवृत्तान्तेन रावणेन प्रेषितान् अशीतिसहस्रसंख्याकान् निशाचरान् उदग्रमुद्गरादिनानाविधायुध-

धरानायसेन परिघेन सलीलमभिहत्य तोरणप्रदेशमाश्रितो मारुति-
रेवमचिन्तयत् ॥

इति द्विचत्वारिंशः सर्गः ।

अथ त्रिचत्वारिंशः सर्गः ॥

त्रिचत्वारिंशे—

वनं भग्नं मया चैत्यप्रासादो न विनाशितः ॥

तस्मात्प्रासादमप्येवमिमं विध्वंसयाम्यहम् ।

इति संचिन्त्य सहर्षमेवमब्रवादीत्—

अस्त्रविजयतां रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः ॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ।
हनुमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ।
शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥

अर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीम् ।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥

अनेन दूतेन प्रभुस्तुतिः कर्तव्येति सूचितम् । तथा च कामन्दके— 'संतापं कुलमैश्वर्यं त्यागमुत्थानसौष्ठवम् । अक्षुद्रतां भद्रतां च भर्तुर्भेद्येषु दर्शयेत् ॥' इति । 'पृच्छयमानोऽपि न ब्रूयात्स्वस्वामिप्रकृतिच्युतिम् ।' इति च ॥

ततः—

माद्दशानां सहस्राणि विसृष्टानि महात्मनाम् ॥

बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ।
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥

दशनागबलाः केचित्केचिद्दशगुणोत्तराः ।
केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥

सन्ति चौघबलाः केचित्केचिद्वायुबलोपमाः ।
अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपाः ॥

ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः ।
शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥

आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ।
नेयमस्ति पुरी लंका न यूयं न च रावणः ॥

यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥

इति गर्जनेन दश दिशः कंपयन् तत्रत्यगुरुतरस्तम्भेना-[न]न्तचैत्यपालान् महाबलान् निजघान ॥

इति त्रिचत्वारिंशः सर्गः ।

अथ चतुश्चत्वारिंश-पंचचत्वारिंशषट्चत्वारिंशाः सर्गाः ॥

चतुश्चत्वारिंशप्रभृति षट्चत्वारिंशपर्यन्तम्—

ततो विदितैतद्वृत्तान्तेन रावणेन प्रहितं जम्बुमालिनं परिवेन,

अनेन एकवारं प्रयुक्तस्य महास्त्रस्य पुनः प्रयोगोऽनर्थाधायक इति उचितम् । तथा च द्रोणपर्वणि अश्वत्थामानं प्रति दुर्योधनः—'अश्वत्थामन् पुनः शीघ्रमस्त्रमेतत्प्रयोजय । व्यवस्थिता हि पाञ्चालाः पुनरेव जयैषिणः ॥ अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष । सुदीनमतिनिःश्वस्य राजानमिदमब्रवीत् ॥ नैतदावर्तते राजन्नस्त्रं द्विर्नोपपद्यते । आवर्तयेद्धि हन्त्येतत्प्रयोक्तारमसंशयम् ॥' इति ॥

अथेन्द्रजित्तं प्रसमीक्ष्य मुक्त-
मस्त्रेण बद्धं द्रुमचीरसूत्रैः ।
व्यदर्शयत्तत्र महाबलं तं
हरिप्रवीरं सगणाय राज्ञे ॥

इति अष्टचत्वारिंशः सर्गः ।

अथ एकोनपञ्चाशः सर्गः ॥

एकोनपंचाशे—

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः ।
हनूमान् रोषताम्राक्षो रक्षोऽधिपमवैक्षत ॥

भ्राजमानं महार्हेण काञ्चनेन विराजता ।
मुक्ताजालावृतेनाथ मकुटेन महाद्युतिम् ॥

वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः ।
हैमैराभरणैश्चित्रैर्मनसेव प्रकल्पितैः ॥

महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् ।
स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥

विपुलैर्दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः ।
दीप्ततीक्ष्णमहादंष्ट्रैः प्रलम्बदशनच्छदैः ॥

शिरोभिर्दशभिर्वीरं भ्राजमानं महौजसम् ।
नानाव्याळसमाकीर्णैः शिखरैरिव मन्दरम् ॥

नीलाञ्जनचयप्रख्यं हारेणोरसि राजता ।
पूर्णचन्द्राभवक्त्रेण सबलाकमिवाम्बुदम् ॥

बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः ।
भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षैरिवोरगैः ।
महति स्फाटिके चित्रे रत्नसंयोगसंस्कृते ।
उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥

अलंकृताभिरत्यर्थं प्रमदाभिस्समन्ततः ।
वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥

दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा ।
मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥

उपोपविष्टं सचिवैश्चतुर्भिर्बलदर्पितैः ।
कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥

मन्त्रिभिर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः ।
अन्वास्यमानं सचिवैः सुरैरिव सुरेश्वरम् ॥

अपश्यद्राक्षसपतिं हनूमानतितेजसम् ।
निविष्टं मेरुशिखरे सतोयमिव तोयदम् ॥

स तैः संपीड्यमानोऽपि रक्षोभिर्भीमविक्रमैः ।
विस्मयं परमं गत्वा रक्षोऽधिपमवैक्षत ॥

भ्राजमानं तदा दृष्ट्वा हनूमान् राक्षसेश्वरम् ।
मनसा चिन्तयामास तेजसा तस्य मोहितः ॥

अहो रूपमहो धैर्यमहो सत्वमहो धृतिः ।
अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥

यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः ।
स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥

अनेन सक दृष्टसामग्रीसंपन्नमपि अधर्मिष्ठं श्रीः परित्यजतीति सूचितम । तथा च भारते— 'पापयुक्तो हि पुरुषः समृद्धार्थोऽपि नश्यति ।' इति । मोक्षधर्मे श्रीवचनमपि— 'सत्ये स्थितास्मि दाने च व्रते तपसि चैव हि । पराक्रमे च धर्मे च पराचीनस्ततो बलिः ॥ प्रोवाच लोकान्मूढात्मा मामेव भजतेत्ययम् । अपाक्रान्ता ततः शक्र त्वयि वत्स्यामि वासव ॥ अप्रमत्तेन धार्यास्मि तपसा विक्रमेण च ॥' इति ॥

इति एकोनपञ्चाशः सर्गः ।

अथ पञ्चाशः सर्गः ॥

पञ्चाशे—अथ पिङ्गाक्षमुदीक्ष्य रोषारुणाक्षेण रावणेन कैलासमंचलनसमयसंप्रदत्तशापो नन्दीश्वर एवायमागतो वानरमूर्तिः, किंस्विद्बाणासुरो वा इति शंकाकलंकितान्तःकरणेन,

कोऽयमागतः, कस्य वा दूतो दुरात्मा, किन्निमित्तं च प्रमद-वनभञ्जनमित्यखिलेन विचार्यतामिति प्रचोदितः प्रहस्तो वानर-मेवमुवाच —

समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥

तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ।
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥

अनेन पराभिप्रायः समाश्वास्य विपक्षबाधकोपन्यासपूर्वकं ज्ञातव्य इति सूचितम् ॥

इन्द्रोपेन्द्रादिषु केन वा प्रेषितोऽसि इति प्रहस्तेन विहित-विविधानुयोगप्रपंचो मारुतिर्दशवदनमेवमवदत् ॥

इति पञ्चाशः सर्गः ।

अथ एकपञ्चाशः सर्गः ॥

एकपञ्चाशे—

अहं सुग्रीवसन्देशादिह प्राप्तस्त्वदन्तिकम् ।
राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥

भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ।
धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥

अत्र इह चामुत्र च क्षममित्युक्त्या ऐहिकामुष्मिकहितो-पदेष्टा जनः सन्मित्रम्, अतः तद्वचनमवश्यं ग्राह्यमिति सूचितम् । तथा चोद्योगे विदुरः— 'व्यसने क्लिश्यमानं च यो

बलावमर्दस्त्वयि सन्निकृष्टे
यथा गते शाम्यति शान्तशत्रौ ।
तथा समीक्ष्यात्मबलं परं च
समारभस्वास्त्रविदां वरिष्ठ ॥

अत्र शान्तशत्रौ त्वयि इतो निर्गते हनूमत्समीपं च गते सति बलावमर्दः सेनानाशो यथा [न] भवति, तथा समारभस्वेत्युक्त्या सेनोपद्रवपरिहारपूर्वकं युद्धावगमात् महारथलक्षणं सूचितम् । तथा च भारते—'आत्मानं सारथिं चाश्वान्पालयित्वा स्वकां चमूम् । परान् हिनस्ति यो राजा स महारथ उच्यते ॥' इति ॥

न वीर सेना गणशोच्यवन्ति
न वज्रमादाय विशालसारम् ।
न मारुतस्यास्ति गतिप्रमाणं
न चाग्निकल्पः करणेन हन्तुम् ॥

गणशोचि सकलसेनाहन्तरि शत्रौ सति तस्माच्छत्रोः स्वसेनाः स्वं न रक्षन्ति । कुण्ठितसारमायुधमादाय न प्रविश । मरुतोऽपत्यस्य हनूमतो गतेः प्रमाणं परिच्छेदो नास्ति । अप्रमेयशक्तिश्चायं वायुसूनुः हस्तपादादिभिः करणैः हन्तुमशक्यः । अतो हनूमान् सेनया वा आयुधेन वा हस्तपादादिभिः करणैर्वा [न]हनिष्यते । किं मादृशस्य अत्र इयान् संभ्रम इत्यवज्ञा न कर्तव्या इत्युक्त्या स्वल्पेऽपि शत्रौ अवज्ञा न प्रयोक्तव्येति सूचितम् । तथा चोद्योगे विदुरः— 'नावज्ञेयो रिपुः कश्चिद्दुर्बलोऽपि बलीयसा ।' इति ॥

तमेवमर्थं प्रसमीक्ष्य सम्यक्
स्वकर्मसाम्याच्च समाहितात्मा ।
स्मरंश्च दिव्यं धनुषोऽस्त्रवीर्यं
व्रजाक्षतं कर्म समारभस्व ॥

दिव्यास्त्रमात्रसाध्यो हनूमानिति भावः ॥

न खल्वियं मतिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम् ।

अत्र प्रख्यातवीर्यस्य राजपुत्रस्य तव वानरदूतनिग्रहाय प्रेषणमनुचितमित्युक्त्या क्षत्रियेण स्वसदृशैरेव योद्धव्यमिति सूचितम् । तथा चादिपर्वणि कृपः— 'वृथाकुलसमाचारैर्न युध्यन्ते नृपात्मजाः ।' इति ॥

इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥

अत्र क्षत्रियस्य स्वसमेनैव युद्धस्य युक्तत्वेऽपि शत्रोरतिशौर्ये राजधर्मात् क्षत्रियधर्माच्च विजातीयेनापि युद्धं कर्तव्यमिति सूचितम् । तथा चादिपर्वणि— 'आचार्ये त्रिविधा योनी राज्ञां शास्त्रविनिश्चये । तत्कुलीनश्च शूरश्च यश्च सेनां प्रकर्षति ॥ क्षत्रियाणां बलं श्रेष्ठं योद्धव्यं क्षत्रबन्धुना । शूराणां च नदीनां च दुर्विदाः प्रभवाः किल ॥' इति ॥

'न खल्वियं मतिः श्रेष्ठा' इत्यनेन अर्थान्तरमपि सूचितम् । तथा च क्षत्रधर्मवशात् प्रेषयामीत्युक्त्या प्रियस्यापि पुत्रादेः युद्धप्रेषणं क्षत्रियाणां धर्म इति सूचितम् । अत एवातिप्रेमास्पदस्य पुत्रस्य युद्धप्रेषणं क्षत्रधर्म इति प्रतिपादितं द्रोणपर्वणि— 'यो हि भोज्ये पुरस्कार्यो यानेषु शयनेषु च । भूषणेषु च सोऽस्माभिर्बालो युधि पुरस्कृतः ॥' इति ॥

ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः ।
चकार भर्तारमहीनसत्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥

अनेन महाकार्याय गमनसमये गुरुजनं प्रभुं च प्रदक्षिणीकृत्य गन्तव्यमिति सूचितम् । तथा च भीष्मपर्वणि शरतल्पगतस्य भीष्मस्य अप्राकृतजलाभिलाषिणस्तज्जलदानाय प्रवृत्तोऽर्जुनः भीष्मं प्रदक्षिणीकृतवानिति प्रतिपादितम्— 'ततः प्रदक्षिणं कृत्वा रथेन रथिनां वरः । शयानं भरतश्रेष्ठं सर्वशस्त्रभृतां वरम् ॥ अविध्यत्पृथिवीं पार्थः पार्श्वे भीष्मस्य दक्षिणे । उत्पपात ततो धारा वारिणो विमला शुभा । शीतस्यामृतकल्पस्य दिव्यगन्धरसस्य च ॥ अतर्पयत्ततः पार्थः शीतया जलधारया । भीष्मं कुरूणामृषभं दिव्यकर्मपराक्रमम् ॥' इति ॥

आदिपर्वण्यपि भर्त्राज्ञया पुत्रोत्पादनाय प्रस्थिता कुन्ती भर्तारं प्रदक्षिणीकृत्य गतवतीति प्रतिपादितम्— 'सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना । अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमवर्तत ॥' इति ॥

तदनु विविधायुधधरैर्यातुधानबलप्रधानैः सह समागतेन महेन्द्रविजयिना मेघनादेन निरन्तरतयाऽभिवृष्टं शरवर्षमवलोक्य सकलजनविस्मापकमुत्तमं संग्रामं वितन्वन्तं हनूमन्तमुपायान्तरासाध्यं विचिन्त्य पैतामहेनास्त्रप्रवरेण मेघनादः परिजग्राह ॥

स वीर्यमस्त्रस्य कपिर्विचार्य
पितामहानुग्रहमात्मनश्च ।
विमोक्षशक्तिं परिचिन्तयित्वा
पितामहाज्ञामनुवर्तते स्म ॥

अनेन समर्थेनापि महदाज्ञा नोल्लङ्घनीयेति सूचितम्। तथा च कामन्दके— 'महतां शासने तिष्ठेन्नावमन्येत कंचन।' इति। मौसलेऽपि— 'गान्धार्या वचनं यत्तदृषीणां च परंतप। तन्नूनमन्यथा कर्तुं नैच्छत्स जगतः प्रभुः॥' इति॥

ग्रहणे चापि रक्षोभिर्महन्मे गुणदर्शनम्।
राक्षसेन्द्रेण संवादस्तस्माद्गृह्णन्तु मां परे॥

इति विचिन्त्य रक्षःकृतवधबन्धनादिकमखिलमप्यङ्गीचकार॥

अनेन कार्यार्थिना परकृतावमानोऽपि सोढव्य इति सूचितम्। तथा च कामन्दके— 'समाक्रान्तो बलवता कांक्षन्भ्रंशिनीं श्रियम्। कौर्मं संकोचमास्थाय प्रकारमभिमर्षयेत्। काले प्राप्ते तु मतिमानुत्तिष्ठेत्क्रूरसर्पवत्॥' इति। भगवद्धानेऽपि— 'यस्तु निःश्रेयसं कृत्वा प्राप्तमेवाभिपद्यते। आत्मनो मानमुत्सृज्य स लोके सुखमेधते॥' इति॥

ततो यातुधानाः पितामहास्त्रबद्धमपि हनूमन्तम्,

बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः।
स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान्॥

ततो मेघनादः शणवल्कबन्धनेनास्त्रविमुक्तं हनूमन्तमवलोक्यैवमचिन्तयत्—

अहो महत्कर्म कृतं निरर्थकं
न राक्षसैर्मन्त्रगतिर्विमृष्टा।
पुनश्च नास्त्रे विहतेऽस्त्रमन्य-
त्प्रवर्तते संशयिताः स्म सर्वे॥

सप्त मन्त्रिसुतानपि जानूरुकरपादतलमुष्टिप्रहारैः, विरूपाक्षयूपाक्षौ सालेन, प्रघसभासकर्णौ गिरिशृङ्गेण, दुर्धरं उपरि निपतनेन च निहत्य हनुमान् पुनस्तदेव तोरणमाजगाम ॥

इति चतुश्चत्वारिंशपञ्चचत्वारिंशषट्चत्वारिंशाः सर्गाः ।

अथ सप्तचत्वारिंशः सर्गः ॥

सप्तचत्वारिंशे—ततः

निशम्य राजा समरोद्धतोन्मुखं
कुमारमक्षं प्रसमैक्षताग्रतः ॥

स तस्य दृष्ट्यर्पणसंप्रचोदितः
प्रतापवान्काञ्चनचित्रकार्मुकः ।
समुत्पपाताथ सदस्युदीरितो
द्विजातिमुख्यैर्हविषेव पावकः ॥

अनेन इंगिताकारचेष्टाभी राज्ञोऽभिप्रायं ज्ञात्वा तदनुसारेण भृत्यैर्वर्तितव्यमिति सूचितम् । तथा च कामन्दके—'भर्तुरभ्यासने तिष्ठन् दृष्टिं नान्यत्र निक्षिपेत् । ब्रूयात्किसयामित्यस्य तिष्ठेदास्यं विलोकयन् ॥ इङ्गिताकारचेष्टाभ्यामिङ्गिताकारतत्त्ववित् । आज्ञां चावितथां कुर्याद्यथाशक्त्यविलम्बितम ॥' इति ॥

स तस्य वेगं च कपेर्महात्मनः
पराक्रमं चारिषु रावणात्मजः ।
विचारयन् स्वं च बलं महाबलो
युगक्षये सूर्य इवाभिवर्धते ॥

ततः प्रतप्तचामीकरशोभितध्वजपताकादिसमलंकृतं रथवरमास्थाय रुक्मपुंखशिखान् विशिखान् सर्वाङ्गेषु प्रक्षिपन्तं समरोद्धतमक्षयमवलोक्य हनूमानित्थमचिन्तयत्—

न खल्वयं नाभिभवेदुपेक्षितः
पराक्रमो ह्यस्य रणेऽभिवर्धते ।
प्रमापणं त्वेव ममास्य रोचते
न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥

अनेन समरे वर्धमानः शत्रुर्नोपेक्षणीय इति सूचितम् । तथा च **आदिपर्वणि** धृतराष्ट्रं प्रति कणिकः— 'बालवत्कुरुते मूलं बालः शत्रुरुपेक्षितः । गहनेऽग्निरिवोत्सृष्टः क्षिप्रं संजायते महान् ॥ अग्निं स्तोकमिवात्मानं संधुक्षयति यो रिपुः । स वर्धमानो ग्रसते महान्तमपि संचयम् ॥' इति ॥

ततः अशनिनिकाशेन करतलप्रहारेण चूर्णिते रथे,

स तं परित्यज्य महारथो रथं
सकार्मुकः खड्गधरः खमुत्पतन् ।
तपोऽभियोगादृषिरुग्रवीर्यवान्
विहाय देहं मरुतामिवालयम् ॥

अनेन ऋषयस्तपसा स्वर्गं प्राप्नुवन्तीति सूचितम् । तथा च **तैत्तिरीयश्रुतिः**— 'तपसा देवा देवतामग्र आयन् । तपसा ऋषयः सुवरन्वविन्दन् ।' इति । तथा च **वनपर्वणि पुलस्त्यतीर्थयात्रायाम्**— 'तपसा दग्धपाप्मासौ नाकपृष्ठे विराजति । पुण्ये गिरौ सुराष्ट्रेषु मृगपक्षिनिषेविते ॥ उज्जयन्ते स्म तप्ताङ्गो नाकपृष्ठे महीपते ।' इति ॥

ततः पदातिमक्षं पादयोः परिगृह्य महोरगं पतत्रिराडिवास-
कृच्चङ्क्रमणपूर्वकं भूमावताडयत् ॥

इति सप्तचत्वारिंशः सर्गः ।

अथ अष्टचत्वारिंशः सर्गः ॥

अष्टचत्वारिंशे—

ततः स रक्षोधिपतिर्महात्मा
हनूमताक्षे निहते कुमारे ।
मनः समाधाय तदेन्द्रकल्पं
समादिदेशेन्द्रजितं सरोषम् ॥

त्वमस्त्रविच्छस्त्रविदां वरिष्ठः
सुरासुराणामपि शोकदाता ।
सुरेषु सेन्द्रेषु च दृष्टकर्मा
पितामहाराधनसंचितास्त्रः ॥

तवास्त्रबलमासाद्य नासुरा न मरुद्गणाः ।
न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥

न कश्चित्त्रिषु लोकेषु संयुगे नगतश्रमः ।
भुजवीर्याभिगुप्तस्तु तपसा चाभिरक्षितः ॥

देशकालविभागज्ञस्त्वमेव मतिसत्तमः ॥

न तेऽस्त्यशक्यं समरेषु कर्मणा
न तेऽस्त्यकार्यं मतिपूर्वमन्त्रणे ।

न सोऽस्ति कश्चित्त्रिषु संग्रहेषु वै
न वेद यस्तेऽस्त्रबलं बलं च ते ॥

अत्र कर्मणा पुरुषकारेण कर्तव्ये कार्ये अशक्यं ते नास्ति। मतिपूर्वमन्त्रणे अविज्ञेयं च किंचिन्नास्ति। संगृह्यन्ते भोगार्थं कर्मभिरिति संग्रहास्त्रयो लोकाः। तेषु मन्त्रबलं शरीरबलं च तव यो न वेद, तादृशो नास्ति। सर्वलोकप्रसिद्धशस्त्रास्त्रबलस्त्वमिति भावः ॥

ममानुरूपं तपसो बलं च ते
पराक्रमश्चास्त्रबलं च संयुगे।
न त्वां समासाद्य रणावमर्दिनं
मनः श्रमं गच्छति निश्चितार्थम् ॥

अत्र युद्धाय प्रेषणावसरे इन्द्रजितः स्तुतिकरणात् युद्धादिमहाकार्यप्रेषणावसरे पुत्रस्यापि स्तुतिः कर्तव्येति सूचितम्। अत एव द्रोणपर्वणि स्तुतिपूर्वकमेव पुत्रोऽभिमन्युः धर्मपुत्रेण युद्धाय प्रेषित इति प्रतिपादितम्—'अभिमन्यो वरं तात याचे त्वां दातुमर्हसि। पितॄणां मातुलानां च सैन्यानां चैव सर्वशः ॥ भिन्ध्यनीकं युधि श्रेष्ठ द्वारं संजनयस्व नः। धनंजयसमं युद्धे त्वां वयं तात संयुगे ॥ प्रणिधायानुयास्यामः...' इति ॥

इदं हि दृष्ट्वा मतिमान् महाबलं
कपेः प्रभावं च पराक्रमं च।
त्वमात्मनश्चैव समीक्ष्य सारं
कुरुष्व वेगं स्वबलानुरूपम् ॥

मित्रं नाभिपद्यते । अनर्थज्ञो यथाशक्ति तं नृशंसं विदुर्बुधाः ॥ तत्समर्थं शुभं वाक्यं धर्मार्थसहितं हितम् । धार्तराष्ट्र सहामात्यो ग्रहीतुं त्वमिहार्हसि ॥' इति । प्राचीना अपि– 'पापान्निवारयति योजयते हिताय गुह्यं च गूहति गुणान्प्रकटीकरोति । आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥' इति । 'धर्ममर्थं च कामं च मित्रात्तु त्रिविधं फलम् ।' इति च ॥

राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥

ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ।
पितुर्निदेशान्निष्क्रान्तः प्रव्रजितो दण्डकावनम् ॥

लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ।
रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥

तस्य भार्या वने नष्टा सीता पतिमनुव्रता ।
वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥

स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ।
ऋश्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥

तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ।
सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ।
रामेण निहतः संख्ये शरेणैकेन वानरः ॥

स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः ।
हरीन् संप्रेषयामास दिशः सर्वा हरीश्वरः ॥

तां हरीणां सहस्राणि शतानि नियुतानि च ।
दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥
वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ।
असंगगतयः शीघ्रा हरिवीरा महाबलाः ॥
अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ।
सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥
समुद्रं लंघयित्वैव तां दिदृक्षुरिहागतः ।
भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥
तद्भवान् दृष्टधर्मार्थस्तपःकृतपरिग्रहः ।
परदारान्महाप्राज्ञ नोपरोद्‍धुं त्वमर्हसि ॥
न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥
कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ।
शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥
न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ।
राघवस्य व्यलीकं च कृत्वा सुखमवाप्नुयात् ॥
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ।
मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥
दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् ।
उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥
लक्षितेयं मया सीता तथा शोकपरायणा ।
गृह्य यां नाभिजानासि पंचास्यामिव पन्नगीम् ॥

नेयं जरयितुं शक्या सासुरैरमरैरपि ।
विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥

अनेन विषसंसृष्टमन्नं भुक्तं चेज्जीरणाय नागच्छतीत्युक्त्या सर्वविधविषान्नं प्राणहानिकरम्, अतः अप्रमादेन परीक्षितमन्नमेव भोक्तव्यमिति सूचितम् । तथा च **कामन्दके**— 'याने शय्यासने पाने भोज्ये वस्त्रे विभूषणे । सर्वत्रैवाप्रमत्तः स्याद्दुष्येत विषदूषितम ॥ विषघ्नैरुदकैः स्नातो विषघ्नमणिभूषितः । परीक्षितं समश्नीयाज्ज्वाङ्गलीविद्भिषग्वृतः ॥ भृङ्गराजः शुकश्चैव शारिका चेति पक्षिणः । क्रोशन्ति भृशमुद्विग्ना विषपन्नगदर्शनात् ॥ चकोरस्य विरज्येते नयने विषदर्शनात् । सुव्यक्तं माद्यति क्रौञ्चो म्रियते मत्तकोकिलः ॥ जीवंजीवस्य च ग्लानिर्जायते विषदर्शनात् । एषामन्यतमेनापि समश्नीयात्परीक्षितम् ॥ मयूरपृषतोत्सर्गे न भवन्ति भुजङ्गमाः । तस्मान्मयूरपृषतौ भवने नित्यमुत्सृजेत् ॥ भोज्यमन्नं परीक्षार्थं प्रदद्यात्पूर्वमग्नये । वयोभ्यश्च ततो दद्यात्ततो लिङ्गानि लक्षयेत् ॥ धूमार्चिर्नीलता वह्नेः शब्दस्फोटश्च जायते । अन्नेन विषदिग्धेन वयसां मरणं भवेत् ॥ अक्लिन्नता सोदकत्वमाशु शैत्यं विवर्णता । अन्नस्य विषदिग्धस्य तथा स्निग्धत्वमेचके ॥ व्यञ्जनस्याशु शुष्कत्वं क्वथने श्यामफेनता । गन्धस्पर्शरसाश्चैव नश्यन्ति विषदूषणात् ॥ छायातिरिक्ता हीना वा द्रवे च विषदूषिते । दृश्यते राजिरूर्ध्वा च फेनमण्डलमेव च ॥ रसस्य नीला पयसश्च ताम्रा मद्यस्य तोयस्य च कोकिलाभा । श्यामा च दध्नो विषदूषितस्य मध्ये भवत्यूर्ध्वगता च रेखा ॥ आर्द्रस्य सर्वस्य भवेत्तु सद्यः प्रम्लानभावो विषदूषितस्य । उत्पक्वता क्वाथविनी-

लता च प्रश्यामता चेति वदन्ति तज्ज्ञाः ॥ शुष्कस्य सर्वस्य विशेपसंगाद्विशीर्णता चाशु विवर्णता च । खरं मृदु स्यान्मृदुनः खरत्वं तदन्तिके चाल्पकजन्तुघातः ॥ प्रावारास्तरणानां च श्याममण्डलकीर्णता । तन्तूनां पक्ष्मणां रोम्णां स्याद्भ्रंशश्च विषाश्रयात् ॥ लोहानां च मणीनां च मलपङ्कोपदिग्धता । प्रभावस्नेहगुरुतावर्णस्पर्शवधस्तथा ॥ संशुष्कश्यामवक्त्रत्वं वाग्भंगो जृम्भणं मुहुः । स्खलनं वेपथुः स्वेद आवेगो दिग्विलोकनम् ॥ स्वकर्मणि स्वभूमौ स्यादनवस्थानमेव च । लिङ्गान्येतानि निपुणं लक्षयेद्विषदायिनाम् ॥' इति (इति ह स्माहुरात्रेयादयो महर्षयः) ॥

वाहटेऽपि — 'अथातोऽन्नरक्षाध्यायं व्याख्यास्यामः— राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् । सर्वदा स भवत्येवं सर्वत्र प्रतिजागृविः ॥ अन्नपाने विषाद्रक्षेद्विशेषेण महीपतेः । योगक्षेमौ तदायत्तौ धर्माद्या यन्निबन्धनाः ॥ ओदनो विषवान् सान्द्रो यात्यविस्राव्यतामिव । चिरेण पच्यते पक्वो भवेत्पर्युषितोपमः ॥ मयूरकण्ठतुल्योष्मा मोहमूर्छाप्रसेककृत् । हीयते वर्णगन्धाद्यैः क्लिद्यते चन्द्रकाचितः ॥ व्यञ्जनान्याशु शुष्यन्ति श्याव[ध्याम]क्वाथानि तत्र च । हीनातिरिक्ता विकृता छाया दृश्येत नैव वा ॥ फेनोर्ध्वराजीसीमन्ततन्तुबुद्बुदसंभवः । विच्छिन्नविरसा रागाः खाण्डवाः शाकमामिषम् ॥ नीला राजी रसे ताम्रा क्षीरे दधनि दृश्यते । श्यावा पीतासिता तक्रे घृते पानीयसन्निभा ॥ (मस्तुन्यपि कपोताभा राजी कृष्णतुषोदके ?) काळी मद्याम्भसोः क्षौद्रे हरित्तैलेऽरुणोपमा । पाकः फलानामपक्वानां पक्वानां परिकोथनम ॥ द्रव्याणामार्द्रशुष्काणां

तद्दंशे पिटिका श्यावा स्राविणी भूर्युपद्रवा ॥ वातिकः पक्षवातेन स्पर्शाद्दशति पैत्तिकः । मुखेन श्लैष्मिकः कीटः सर्वतः सान्निपातिकः) ॥

' वृश्चिकस्य विषं तीक्ष्णमादौ दहति वह्निवत् । ऊर्ध्वमारोहति क्षिप्रं दंशे पश्चात्तु तिष्ठति ॥ दंशः सद्योऽतिरुक्श्यावस्तुद्यते स्फुटतीव च । ते गवादिशकृत्कोथादिग्ध(काष्ठादिकायतः) [दष्टादिकोथतः] ॥ सर्पकोथाच्च संभूता मन्दमध्यमहाविषाः । मन्दाः पीताः सिताः श्यावा रूक्षकर्बुरमेचकाः ॥ रोमशा बहुपर्वाणो लोहिताः पाण्डुरोदराः । धूम्रोदरास्त्रिपर्वाणो मध्यास्तु कपिलारुणाः ॥ पिंगळाः [पिशङ्गाः] शबलाश्चित्राः शोणिताभा महाविषाः । [अग्न्याभा द्व्येकपर्वाणो रक्तासितसितोदराः] । तैर्दष्टः सूतनयनः [शूनरसनः] स्तब्धगात्रो ज्वरार्दितः ॥ खैर्वमन् शोणितं कृष्णमिन्द्रियार्थानसंविदन् । स्विद्यन् मूर्छन् विशुष्कास्यो विह्वलो वेदनातुरः ॥ विशीर्यमाणमांसश्च प्रायशो विजहात्यसून् । उच्चिटिंगस्तु वक्त्रेण दशत्यभ्यधिकव्यथः ॥ साध्यतो वृश्चिकास्तम्भं शेफसो हृष्टरोमताम् । करोति सेकमंगानां दंशः शीतांबुनेव च ॥ उष्ट्रधूमः स वोक्तारः[एवोक्तो] रात्रिस्वा[चा]राच्च रात्रिकः । वातपित्तोत्तराः कीटाः श्लैष्मिकाः कणभोन्दुराः ॥ [प्रायो वातोल्बणविषा वृश्चिकाः सोष्ट्रधूमकाः ।] यस्य यस्यैव दोषस्य लिंगाधिक्यं प्रतर्कयेत् । तस्य तस्यौषधैः कुर्यात् विपरीतगुणैः क्रियाम् ॥ हृत्पीडोर्ध्वानिलस्तम्भः शिरायामोऽस्थिपर्वरुक् । घूर्णनोद्वेष्टने गात्रश्यावता वातिके विषे ॥ संज्ञानाशोष्णनिश्वासौ हृद्दाहः कटुकास्यता । मांसावदरणं शोफो रक्तपीतश्च पैत्तिके । छर्द्यरोचक-

हृल्लासप्रसेकोत्क्लेशपीनसैः । सशैत्यमुखमाधुर्यैर्विद्यात् श्लेष्माधिकं विषम् ॥ [इत्यादि] ॥

'श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः । निद्रां शीतज्वरं कासं कण्डूं च कुरुते भृशम् ॥ वातिकः परुषः श्यावः पर्वभेदज्वरप्रदः । तद्विभागं यथावस्थं [स्वं च] दोषलिंगैर्विभावयेत् ॥ असाध्यायां तु हृन्मोहश्वासहिध्माशिरोग्रहाः [रुजाः] । श्वेताः पीताः सिता रक्ताः पिटिकाः श्वयथूद्भवाः ॥ वेपथुः श्वयथु-[वमथु]र्दाहस्तृडान्ध्यं वक्रनासता । श्यावोष्ण[ष्ठ]दन्तवक्त्रत्वं पृष्ठग्रीवावभंजनम् ॥ पक्वजंबूसवर्णं च दंशात्स्रवति शोणितम । सर्वापि सर्वजा प्रायो व्यपदेशस्तु भूयसा ॥ तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्त्युपेक्षिता । [इत्यादि] । श्वासदंष्ट्राशकृन्मूत्रशुक्ल[क्र]-लालानखार्तवैः ॥ अष्टाभिरुद्वमत्येषा विषं वक्त्रैर्विशेषतः । लूता नाभेर्दशत्यूर्ध्वमूर्ध्वं चाधश्च कीटकाः ॥ तद्दूषितं च वस्त्रादि देहे पृक्तं विकारकृत ॥ [इत्यादि] । इति तीक्ष्णं विषं मध्यं हीनं च विभजेदतः ॥ एकविंशतिरात्रेण विषं शाम्यति सर्वथा । अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत ॥ [इत्यादि च] ॥

'अथातो मूषिकालर्कादि [विष] प्रतिषेधं व्याख्यास्यामः-लालनश्चपलः पुत्रो हसिरः [चिक्किरोजिरः] किसिरोजितः । कषायदन्तः कुलकः कोलिकः [कोकिलः] कपिलोऽसितः ॥ अरुणः शबलः श्वेतः कपोतः पलितोन्दुरः । दुण्डुदरो रलोश्वाख्यो [छुच्छुन्दरो रसालाख्यो] दशाष्टौ चेति मूषिकाः ॥ शुक्रं पतति यत्रैषां शुक्ल [क्र] दिग्धैः स्पृशन्ति वा । गदंगमंगैस्तत्रास्रे दूषिते पाण्डुतां गते ॥ ग्रन्थयः श्वयथुः कोथो मण्डलानि भ्रमो[भ्रमो]-

ऽरुचिः । शीतज्वरोऽतिरुक्सादो वेपथुः पर्वभेदनम् ॥ रोमहर्षः स्रुतिर्मूर्छा दीर्घकालानुबन्धनम् । श्लेष्मानुविद्धबह्वाखुपोतकच्छर्दनं सतृट् ॥ व्यवाय्याखुविषं कृच्छ्रं भूयो भूयश्च कुप्यति । मूर्छाङ्ग-शोफवैवर्ण्यक्लेदशब्दाधृति [श्रुति] ज्वराः ॥ शिरोगुरुत्वं लालासृक्-छर्दिश्चासाध्यलक्षणम् । शूनबस्तिं विवर्णोष्ठमाखवाभैर्ग्रन्थि-भिश्चितम् ॥ छुच्छुन्दरसगन्धं च वर्जयेदाशु[खु]दूषितम् । शुनः श्लेष्मोल्वणा दोषाः संज्ञां संज्ञावहाश्रिताः ॥ मुष्णन्तः कुर्वते क्षोभं धातूनामतिदारुणम् । लालावानन्धबधिरः सर्वतः सोऽति-[भि]धावति ॥ स्रस्तपुच्छहनुस्कन्धशिरोदुःखी नताननः । दंशस्तेन विदष्टस्य सुप्तः कृष्णं क्षरत्यसृक् ॥ हृच्छिरोरुग्ज्वरस्तम्भस्तृष्णा मूर्छोद्भवोऽनु च । अनेनान्येऽपि बोद्धव्या व्याळा दंष्ट्राप्रहारिणः ॥ (सृगालाश्वतराश्वर्क्षद्वीपिव्याघ्रवृकादयः ।) कंडूनिस्वे[स्तो]दवैवर्ण्य-सुप्तिक्लेदज्वरभ्रमाः ॥ विदाहरागरुक्पाकशोथग्रंधिविकुंचनम् । दंशावदरणं स्फोटाः कर्णिका मंडलानि च ॥ सर्वत्र सविषे लिंगं विपरीतं तु निर्विषे । दष्टो येन तु तच्चेष्टारुतं कुर्वन् विनश्यति ॥ पश्यंस्तमेव चाकस्मादादर्शसलिलादिषु । योऽद्भ्यस्त्रस्येददष्टोऽपि शब्दसंस्पर्शदर्शनैः ॥ जलसंत्रासनामानं दष्टं तमपि वर्जयेत् । आखुना दष्टमात्रस्य दंशं कांडेन दाहयेत् ॥ दर्पणेनाथवा तीव्ररुजा स्यात्कर्णिकान्यथा । दग्ध्वा[ग्धं] विस्रावयेद्दंशं प्रच्छिदं[न्नं] च प्रलेपयेत् ॥' इति च ॥

तपःसन्तापलब्धस्ते योऽयं धर्मपरिग्रहः ।
न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः ॥

अत्र तपस्संपादितस्य धर्मस्य परिग्रहः फलभूतमैश्वर्यम् , आत्मनः

प्राणपरिग्रहो जीवनं च, स्रीतापहाररूपदौरात्म्यात्, न प्रतिप्रदास्य इत्यसद्बुद्ध्या च नाशयितुं न न्याय्यमित्युक्तम् ॥

अनेन दौरात्म्यादसद्बुद्ध्या च जीवितैश्वर्ययोरुभयोर्हानिर्भवतीति सूचितम् । तथा **चोद्योगे भीष्मः**— 'इमां श्रियं प्रज्वलितां भारतीं सर्वराजसु । जीवतो धृतराष्ट्रस्य दौरात्म्याद्भ्रंशयिष्यति ॥ आत्मानं च सहामात्यं समित्रज्ञातिबान्धवम् । सहमित्रमसद्बुद्ध्या जीविताद्भ्रंशयिष्यति ॥' इति ॥

अवध्यतां तपोभिर्या भवान् समनुपश्यति ।
आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥

सुग्रीवो न हि देवोऽयं नासुरो न च दानवः ।
न राक्षसो न गन्धर्वो न यक्षो न च पन्नगः ।
तस्मात्प्राणपरित्राणं कथं राजन् करिष्यसि ॥

न तु धर्मोपसंहारमधर्मफलसंहितम् ।
तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ।
फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥

अस्यार्थः— धर्मः उपसंह्रियते समाप्यतेऽस्मिन्निति धर्मोपसंहारं धर्मफलं सुखम् । तच्च अधर्मफलेन दुःखेन सह नोपभुज्यते । किंतु तदेव फलं धर्मफलमेवान्वेति, दुःखासंभिन्नतया पुरुषं प्राप्नोति । ननु कुत एतदित्यत आह— **धर्मश्चेति** । चकारो ह्यर्थे । यस्मात् धर्मः अधर्मस्य नाशनः अभिभावकः । इदमुपलक्षणम्— अधर्मफलमपि धर्मफलेन सह नोपभुज्यते । अधर्मफलमपि दुःखं

हृतेन्द्रियः ॥ एतैरन्यैश्च बहुभिः क्लिष्टो घोरैरुपद्रवैः । गरार्तो नाशमाप्नोति कश्चित्सद्योऽचिकित्सितः ॥ इत्यादि ॥

'तिलपुष्पफलाघ्राणभूबाष्पघनगर्जनैः । हस्तिमूषिकवादित्रनिस्वनैर्विषसंकटैः ॥ पुरोवातोत्पलामूल[मोद]मदनैर्वर्धते विषम् । वर्षासु चाम्बुयोनित्वात्संक्लेदं गुडवद्गतम् ॥ विसर्पति घनापाये तदगस्त्यो हिनस्ति च । प्रयाति मन्दवीर्यत्वं विषं तस्माद् घनात्यये ॥ इति प्रकृतिसात्म्यर्तुस्थानवेगबलाबलम् । आलोच्य निपुणं बुद्ध्या कर्मानन्तरमाचरेत् ॥ इत्यादि च ॥

'अथातः सर्प[विष]प्रतिषेधं व्याख्यास्यामः— दर्वीकरा मण्डलिनो राजीमंतश्च पन्नगाः । त्रिधा समासतो भौमा भिद्यन्ते ते त्वनेकधा ॥ व्यासतो योनिभेदेन नोच्यन्तेऽनुपयोगतः । विशेषाद्रूक्षकटुकमम्लोष्णं स्वादु शीतलम् ॥ विषं दर्वीकरादीनां क्रमाद्वातादिकोपनम् । तारुण्यमध्यवृद्धत्ववृष्टिशीतातपेषु च ॥ विषोल्बणा भवन्त्येते व्यन्तरा ऋतुसंधिषु । रथाङ्गलांगलच्छत्रस्वस्तिकांकुशधारिणः ॥ फणिनः शीघ्रगतयः सर्पा दर्वीकराः स्मृताः । ज्ञेया मण्डलिनोऽभोगा ? मण्डलैर्विविधैश्चिताः ॥ प्रांशवो मन्दगमना राजीमन्तस्तु राजिभिः । स्निग्धा विचित्रवर्णाभिस्तिर्यगूर्ध्वं च चित्रिताः ॥ गोधाजातस्तु गांधेरो विषे दर्वीकरैः समः । चतुष्पाद्व्यंतरान् विद्यात्तेषामेव तु संकरात् ॥ व्यामिश्रलक्षणास्ते हि सन्निपातप्रकोपनाः । आहारार्थं भयात्पादस्पर्शादतिविषात्क्रुधः ॥ पापवृत्तितया वैराद्देवर्षियमचोदनात् । दशन्ति सर्पास्तेषूक्तं विषाधिक्यं यथोत्तरम् ॥ आदिष्टात्कारणं ज्ञात्वा प्रतिकुर्याद्यथायथम् । व्यन्तरः पापशीलत्वान्मार्गमावृत्य[श्रित्य]

तिष्ठति ॥ यत्र लालापरिक्लेदमात्रं गात्रे प्रदृश्यते। न तु दंष्ट्राकृतं दंशं तत्तुण्डाहतमादिशेत ॥ एकं दंष्ट्रापदं द्वे वा व्यालीढाख्यमशोणितम । दंष्ट्रापदे सरक्ते द्वे व्यालुप्तं त्रीणि तानि तु ॥ मांसच्छेदादविच्छिन्नरक्तवाहीनि दंष्ट्रकम् । दंष्ट्रापदानि चत्वारि तद्वद्दष्टनिपीडितम ॥ निर्विषं द्वयमत्राद्यमसाध्यं पश्चिमं वदेत् । विषं नाहेयमप्राप्य रक्तं दूषयते वपुः ॥ रक्तमण्वपि तत्प्राप्तं वर्धते तैलमम्बुवत् । भीरोस्तु सर्पसंस्पर्शोद्भयेन कुपितोऽनिलः ॥ कदाचित्कुरुते शोफं सर्पाङ्गाभिहतं तु वत् । दुरन्धकारे विद्धस्य केनचिद्दष्टशंकया ॥ विषोद्रेको ज्वरश्छर्दिर्मूर्छा दाहोऽपि वा भवेत् । ग्लानिर्मोहोऽतिसारो वा तच्छंकाविषमुच्यते ॥ बुध्यते सविषो दंशः कंडूशोफरुजान्वितः । दह्यते ग्रथितः किंचिद्विपरीतस्तु निर्विषः ॥ पूर्वे दर्वीकृतां वेगे दुष्टं स्रावीभवत्यसृक् । श्यावता तेन वक्त्रादौ सर्पन्तीव च कीटकाः ॥ द्वितीये ग्रंथयो वेगे तृतीये मूर्ध्नि गौरवम । दृग्रोधो [दुर्गन्धो] दंशविक्लेदश्चतुर्थे ष्ठीवनं वमिः ॥ संधिविश्लेषणं तन्द्रा पंचमे पर्वभेदनम । दाहो हिध्मा च षष्ठे तु हृत्पीडा गात्रगौरवम् ॥ मूर्छा विपाकोऽतीसारः प्राप्य शुक्रं [कं] तु सप्तमे । स्कन्धपृष्ठकटीभंगः सर्वचेष्टानिवर्तनम् ॥

'अथ मण्डलिदष्टस्य दुष्टं पीतीभवत्यसृक् । तेन पीताङ्गता दाहो द्वितीये श्वयथूद्भवः ॥ तृतीये दंशविक्लेदः स्वेदस्तृष्णा च जायते । चतुर्थे ज्वर्यते दाहः पञ्चमे सर्वगात्रगः ॥ दष्टस्य राजिलैर्दुष्टं पाण्डुतां याति शोणितम् । पाण्डुता तेन गात्राणां द्वितीये गुरुताति च ॥ तृतीये दंशविक्लेदो नासिकाक्षिमुखस्रवाः।

चतुर्थे गरिमा मूर्च्छा मन्यास्तंभश्च पंचमे ॥ वाक्यसंगो[गात्रभङ्गो] ज्वरः शीतः शेषयोः पूर्ववद्भवेत् [द्वदेत्] । कुर्यात्पंचसु वेगेषु चिकित्सां न ततः परम् ॥ जलाप्लुता रतिक्षीणा भीता नकुलनिर्जिताः । शीतवातातपव्याधिक्षुत्तृष्णाश्रमपीडिताः ॥ तूर्णं देशान्तरायाता विमुक्तविषकंचुकाः । कुशौषधीकंटकवद्ये चरन्ति च काननम् ॥ देशं च दिव्याध्युषितं सर्पास्तेऽल्पविषाः स्मृताः । स्मशानचितिचैत्यादौ पंचमीपक्षसंधिषु अष्टमीनवमीसंध्यामध्यरात्रदिनेषु च । याम्याग्नेयमखाश्लेषाविशाखापूर्वनैर्ऋते । नैर्ऋताख्ये मुहूर्ते च दष्टं मर्मसु च त्यजेत् । दष्टमात्रः सितास्याक्षः शीर्यमाणतनू [शिरो]रुहः ॥ स्तब्धजिह्वो मुहुर्मूर्छन् शीतोच्छ्वासो न जीवति । (वेपथुर्वेदना तीव्रा ग्रीवाभंगोऽक्षिरक्तता ॥ मूर्च्छा गलग्रहश्छर्दिः प्रेतराजस्य किंकरः ।) [हिध्मा श्वासो वमिः कासो दष्टमात्रस्य देहिनः । जायन्ते युगपद्यस्य स हृच्छूली न जीवति ।] फेनं वमति निःसंज्ञः श्यावपादकराननः ।। कासा[नासा]वसादो भंगोऽङ्गे विक्लेदः श्लथसंधिता । विषपीतस्य दष्टस्य दिग्धेनाहि[भि]हतस्य च ॥ भवन्त्येतानि रूपाणि संप्राप्ते जीवितक्षये । न नस्यैश्चेतना तीक्ष्णैर्न क्षतात्क्षतजागमः ॥ दंण्डाहतस्य नो राजी प्रयाति स [प्रयातस्य] यमान्तिकम् । अतोऽन्यथा तु त्वरया प्रदीप्तागारवद्भिषक् । रक्षन् कण्ठगतान् प्राणान् विषमाशु शमं नयेत् । मात्राशतं विषं स्थित्वा दंशे दष्टस्य देहिनः ॥ देहं प्रक्रमते धातून् रुधिरादीन्प्रदूषयन् । एतस्मिन्नन्तरे कर्म दंशस्योत्कर्तनादिकम् ॥ कुर्याच्छीघ्रं यथा दोषं [देहे] विषवल्ली न रोहति । दष्टमात्रे दशेदाशु तमेव पवना-

शनम् ।। लो[ह]ष्टं महीं वा दशनैश्छित्वा चानु ससंभ्रमम् ।। निष्ठीवेन समालिंपेद्दंशं कर्णमलेन वा ।। दंशस्योपरि बध्नीयादरिष्टां चतुरंगुळे । क्षौमादिभिर्वेणिकया सिद्धैर्मन्त्रैश्च मन्त्रवित् ।। अंबुवत्सेतुबन्धेन बन्धेन स्तभ्यते विषम् । न वहन्ति सिरास्तस्य विषं बन्धाभिपीडिताः ।। निष्पीड्यानूद्धरेद्दंशं मर्मसंध्यगतं तथा । न जायते विषावेगो बीजनाशादिवांकुरः ।। (मर्मगे प्राप्नुयान्मृत्युं संधिस्थे विकलां गतिम् ।) दंशं मण्डलिनां मुक्त्वा पित्तलत्वादथापरम् । प्रतप्तैर्लोहहेमाद्यैर्दहेदाशूल्मुकेन वा ।। करोति भस्मसात्सद्यो वह्निः किं नाम न क्षणात् । आचूषेत्पूर्णवक्त्रो वा मृद्भस्मागदगोमयैः ।। प्रच्छायान्तरारिष्टायां मांसलं तु विशेषतः । अंगं सहैव दंशेन लेपयेदगदैर्मुहुः ।। [इत्यादि] छत्री झर्झ[जर्ज]रपाणिश्च चरेद्रात्रौ विशेषतः । तच्छायाशब्दवित्रस्ताः प्रणश्यन्ति भुजंगमाः । [इति च] ।।

'अथातः कीटलूतादि[विष]प्रतिषेधं व्याख्यास्यामः—सर्पाणामेव विण्मूत्रशुक्राण्डशवकोथजाः । दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ।। दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्बणः । आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ।। पक्वपीलुफलप्रख्यः खर्जूरसदृशोऽथवा । कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ।। स्रावाढ्यः सर्वलिंगस्तु विवर्ज्यः सान्निपातिकैः । वेगाश्च सर्पवच्छोफो वर्धिष्णुर्विसरक्तता । शिरोऽक्षिगौरवं मूर्छा भ्रमः श्वासोऽतिवेदना । सर्वेषां कर्णिका शोफो ज्वरः कंडूररोचकः ।। (मात्स्यो दंशः सरुग्दाहः प्राग्वेगोक्तो जलौकसाम् । प्रायेण मक्षिका नेत्रे दंशन्ति श्वयथूल्बणाः ।। तद्दंशो दाहकंडूमान् तासां तु स्फाणिकां त्यजेत् ।

स्यातां म्लानिविवर्णते । मृदूनां कठिनानां च भवेत्स्पर्शविपर्ययः ॥
माल्यस्य स्फुटिताग्रत्वं म्लानिर्गन्धान्तरोद्भवः । श्याम[ध्याम]-
मण्डलता वस्त्रे शदनं तन्तुपक्ष्मणाम् ॥ धातुमौक्तिककाष्ठाश्म-
रत्नादिषु मलाक्तता । स्नेहस्पर्शप्रभाहानिः सप्रभत्वं तु मृण्मये ॥
विषदः श्यावशुष्कास्यो विलक्षो वीक्षते दिशः । स्वेदवेपथुमां-
स्तब्धो [स्त्रस्तो] भीतः स्खलति जृम्भते ॥ प्राप्यान्नं सविषं
त्वग्निरेकावर्तः स्फुटत्यपि । शिखिकण्ठाभधूमार्चिरनर्चिर्वोग्रगन्ध-
वान् ॥ म्रियन्ते मक्षिकाः प्राश्य काकः क्षामस्वरो भवेत् ।
उत्क्रोशन्ति च दृष्ट्वैतच्छुकदात्यूहशारिकाः ॥ हंसः प्रस्खलति
ग्लानिर्जीवंजीवस्य जायते । चकोरस्याक्षिवैराग्यं क्रौञ्चस्य स्यान्म-
दोदयः ॥ कपोतपरभृद्दक्षचक्रवाका जहत्यसून् । उद्वेगं याति
मार्जारः शकृन्मुञ्चति वानरः ॥ हृष्येन्मयूरस्तद्दृष्ट्वा मन्दतेजो
भवेद्विषम् । इत्यन्नं सविषं ज्ञात्वा त्यजेदेवं प्रयत्नतः ॥ यथा
तेन विपद्येरन्नपि न क्षुद्रजन्तवः । स्पृष्टे तु कण्डूदाहोषा ज्वरार्ति-
स्फोटसुप्तयः ॥ नखरोमच्युतिः शोफः सेकाद्या विषनाशनाः ।
शस्तास्तत्र प्रलेपाश्च सेव्यचन्दनपद्मकैः ॥ ससोमवल्कताळीस-
पत्रकुष्ठामृतानतैः । लाला जिह्वोष्ठयोर्जाड्यमूषा चिमिचिमायनम् ॥
दन्तहर्षो रसाज्ञत्वं हनुस्तम्भश्च वक्त्रगे । सेव्याद्यैस्तत्र गण्डूषाः
सर्वं च विषजिद्धितम् ॥ आमाशयगते स्वेदमूर्छाध्मानमदभ्रमाः ।
रोमहर्षो वमिर्दाहश्चक्षुर्हृदयरोधनम ॥ बिंदुभिश्चाचयोऽङ्गानां
पकाशयगते पुनः । अनेकवर्णं वमति मूत्रयत्यतिसार्यते ॥ तन्द्रा
कृशत्वं पाण्डुत्वगुदरं बलसंक्षयः । तयोर्वान्तविरिक्तस्य हरिद्रे
कटभीं गुडम ॥ सिन्दुवारितनिष्पाववाष्पिकाशतपर्विकाः ।
तण्डुलीयकमूलानि कुक्कुटाण्डमवल्गुजम् ॥ नावनाञ्जनपानेषु

योजयेद्विषशान्तये । विषपीताय दद्याच्च शुद्धायोर्ध्वमधस्तथा ॥ सूक्ष्मं ताम्ररजः काले सक्षौद्रं हृद्विशोधनम् । शुद्धे हृदि ततः शाणं हेमचूर्णस्य दापयेत् ॥ न सज्जते हेमपांगे पद्मपत्रेऽम्बुवद्विषम् । जायते विपुलं चायुर्गरेऽप्येष विधिः स्मृतः ॥ विरुद्धमपि चाहारं विद्याद्गरविषोपमम् । आनूपमामिषं माषक्षौद्रक्षीरविरूढकैः ॥ विरुद्धथने सह विसैर्मूलकेन गुडेन वा । विशेषात्पयसा मत्स्या मत्स्येष्वपि चिलीचिमः ॥ विरुद्धमम्लं पयसा सह सर्वं फलं तथा । तद्वत्कुलुत्थवरककंगुवल्लमकुष्ठकाः ॥ भक्षयित्वा हरितकं मूलकादि पयस्त्यजेत् । वाराहं श्वाविधानाद्याद्दध्ना पृषतकुक्कुटौ ॥ आममांसानि पित्तेन माषसूपेन मूलकम् । अविं कुसुंभशाकेन बिसैः सह विरूढकम् ॥ माषसूपगुडक्षीरदध्याज्यैर्लिकुचं फलम् । फलं कदल्यास्तक्रेण दध्ना तालफलेन वा ॥ कणोषणाभ्यां मधुना काकमाचीं गुडेन वा । सिद्धां वा मत्स्यपचने पचने नागरस्य वा ॥ सिद्धामन्यत्र वा पात्रे कुर्यात्तामुषितां निशाम् । मत्स्यनिस्तलनस्नेहसाधिताः पिप्पलीस्त्यजेत् ॥ कांस्ये दशाहमु[illegible] सर्पिरुष्णं त्वरुष्करे । भासो विरुध्यते शूल्यः कंपिल्लस्तक्रसाधितः ॥ ऐकध्यं पायसमुराकृशराः परिवर्जयेत् । मधुसर्पिर्वसातैलपानीयानि द्विशस्त्रिशः ॥ एकत्र वा समांशानि विरुध्यन्ते परस्परम् । भिन्नांशे अपि मध्वाज्ये दिव्यवार्यनुपानतः ॥ मधुपुष्करबीजं च मधुमैरेयशार्करम् । मंथानुपानः क्षैरेयो हारिद्रः कटुतैलवान् ॥ उपोदकातिसाराय तिलकल्केन साधिता । बलाका वारुणीयुक्ता कुल्माषैश्च विरुध्यते ॥ भृष्टा वराहवसया सैव सद्यो निहन्त्यसून् । तद्वत्तित्तिरिपत्राढ्यगोधालावकपिञ्जलाः ॥ ऐरण्डेनाग्निना सिद्धास्त-

तैलेन विमूर्छिताः । हारीतमांसं हारिद्रशूलकप्रोतपाचितम् ॥ हारिद्रवह्निना सद्यो व्यापादयति जीवितम् । भस्मपांसुपरिध्वस्तं तदेव च समाक्षिकम् ॥ यत्किंचिद्दोषमुत्क्लेश्य न हरेत्तत्समासतः । विरुद्धं शुद्धिरत्रेष्टा शमो वा तद्विरोधिभिः ॥ द्रव्यैस्तैलेन [रेव] वा पूर्वं शरीरस्याभिसंस्कृतिः । व्यायामस्निग्धदीप्ताग्निवयःस्थ-बलशालिनाम् । विरोध्यपि न पीडायै सात्म्यमल्पं च भोजनम् ॥ ' इति ॥

अथातो [विषप्रतिषेधं] विचिकित्सितं व्याख्यास्यामः— 'मथ्यमाने जलनिधावमृतार्थं सुरासुरैः । जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥ दीप्ततेजाश्चतुर्दंष्ट्रो हरित्केशोऽनलेक्षणः । जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः ॥ हुंकृतो ब्रह्मणा मूर्ती ततः स्थावरजंगमे । सोऽध्यतिष्ठान्निजं रूपमुज्झित्वा वंचनात्मकम् ॥ स्थिरमत्युल्बणं वीर्ये यत्कन्देषु प्रतिष्ठितम् । कालकूटेन्द्रवत्साख्य-शृंगीहालाहलादिकम् ॥ सर्पलूतादिदंष्ट्रासु दारुणं जंगमं विषम् । स्थावरं जंगमं चेति विषं प्रोक्तमकृत्रिमम् ॥ कृत्रिमं गरसंज्ञं तु क्रियते विविधौषधैः । हन्ति योगवशेनाशु चिराच्चिरतराच्च तन् ॥ शोफपाण्डूदरोन्माददुर्नामादीन् करोति च । तीक्ष्णोष्णरूक्षविशदं व्यवाय्याशुकरं लघु ॥ विकाशि सूक्ष्ममव्यक्तरसं विषमपाकि च । ओजसो विपरीतं तत्तीक्ष्णाद्यैरन्वितं गुणैः ॥ वातपित्तोल्बणं [त्तरं] नृणां सद्यो हरति जीवितम् । विषं हि देहं संप्राप्य प्राग्दू-षयति शोणितम् ॥ कफपित्तानिलांश्चानु समं दोषान् सहाशयान् । ततो हृदयमास्थाय देहोच्छेदाय कल्पते ॥ स्थावरस्योपयुक्तस्य वेगे पूर्वे प्रजायते । जिह्वायाः श्यावता स्तम्भो मूर्च्छा त्रासः क्लमो

वमिः ॥ द्वितीये वेपथुः स्वेदो दाहः कण्ठे च वेदना । विषं चामाशयं प्राप्तं कुरुते हृदि वेदनाम् ॥ तालुशोषस्तृतीये तु शूलं चामाशये भृशम् । दुर्बले हरिते शूने जायेते चास्य लोचने ॥ पक्काशयगते तोदहिध्माकासान्त्रकूजनम् । चतुर्थे जायते वेगे शिरसश्चातिगौरवम् । कफप्रसेको वैवर्ण्यं पर्वभेदश्च पञ्चमे । सर्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥ षष्ठे संज्ञाप्रणाशश्च सुभृशं चातिसार्यते । स्कन्धपृष्ठकटीभंगो भवेन्मृत्युश्च सप्तमे ॥ [इत्यादि] ॥

प्राग्वाताजीर्णशीताभ्रदिवास्वप्राहिताशनैः । दुष्टं दूषयते धातूनतो दूषीविषं स्मृतम् ॥ दूषीविषार्तं सुस्विन्नमूर्ध्वं चाधश्च शोधितम् । दूषीविषारिमगदं लेहयेन्मधुनाप्लुतम् ॥ [इत्यादि] सूयते पच्यते सद्यो गत्वा मांसं [च कृष्णताम्] सवेदनम् । प्रक्लिन्नं शीर्यतेऽभीक्ष्णं सपिच्छिलपरिस्रवम् ॥ कुर्यादमर्मविद्धस्य हृदयावरणं द्रुतम् ॥ [इत्यादि] ॥

सौभाग्यार्थं स्त्रियो भर्त्रे राज्ञे वारातिनोदिताः [चोदिताः]। गरमाहारसंपृक्तं यच्छन्त्यासन्नवर्तिनः ॥ नानाप्राण्यंगशमलविरुद्धौषधिभस्मनाम् । विषाणां चाल्पवीर्याणां योगो गर इति स्मृतः ॥ तेन पाण्डुः कृशोऽल्पाग्निः श्वासकासज्वरार्दितः । वायुना प्रतिलोमेन स्वप्नचिन्तापरायणः ॥ महोदरयकृत्प्लीही दीनवाग्दुर्बलोऽलसः । शोफवान् सतताध्मातः शुष्कपादकरः क्षयी॥ स्वप्ने गोमायुमार्जारनकुलव्यालवानरान् । प्रायः पश्यति शुष्कांश्च वनस्पतिजलाशयान् ॥ मन्यते कृष्णमात्मानं गौरो गौरं च कालकः ।। विकर्णनासानयनं [पश्येत्तद्धि] पश्यत्युप-

धर्मफलासंभिन्नमेव भवति, अधर्मस्य धर्माभिभावकत्वादित्यपि द्रष्टव्यम्। तथा च यत्र धर्मफलं प्रथमतः प्रवृत्तम्, तत्र तदेवोपभुज्यते। यत्र त्वधर्मफलं प्रथमतः प्रवृत्तम्, तत्र तदेवोपभुज्यते इति द्रष्टव्यम। तथा च परदारापहरणादिजनितपापस्य पूर्वप्रवृत्तेन धर्मेण निरुद्धत्वादेतावन्तमनेहसं धर्मफलं सुखमेव त्वयानुभूतम्, न तु परदारापहरणादिपापजनितं दुःखम्। सम्प्रति तस्य धर्मस्य उपशमादधर्मफलोपभोगः प्राप्तावसर इति। अत्र 'न तु धर्मोपसंहारमधर्मफलसंहितम्' इत्यनेन धर्माधर्मफलयोर्युगपद्भोगो न संभवति इति सूचितम्। तथा च **मोक्षधर्मे**— 'कदाचित्सुकृतं तात कूटस्थमिव [इ] तिष्ठति। सज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते॥ ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते। सुकृतक्षयाद्दुष्कृतस्य तद्विद्धि मनुजाधिप॥' इति। **स्वर्गारोहणिकेऽपि**— 'अशुभानां शुभानां च द्वौ राशी पुरुषर्षभ। यः पूर्वं सुकृतं भुङ्क्ते पश्चान्नरकमेव सः॥ पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः॥' इति॥

ननु धर्माधर्मफलयोर्यौगपद्याभावे राज्यरोगयोः धर्माधर्मफलयोः कथमेकदोपभोग इति चेत्— न, कर्मवैचित्र्येण सुखदुःखयोर्युगपदनुभवसंभवात्। तथा हि— धर्मानुष्ठानसमये वैगुण्ये सति तत्फलं सुखमुत्पद्यमानं वैगुण्यप्रयुक्तक्लेशसङ्कितमेव जायते। अत एव विगुणया पुत्रकामेष्ट्या कन्या जातेति प्रतिपादितं **विष्णुपुराणे**—'इष्टिं च मित्रावरुणयोर्मनुः पुत्रकामश्चकार। तत्रापह्नुते होतुरपचारादिळा नाम कन्या बभूव।' इति॥

D. 40

अथवा तद्धेतुभूतसुकृतदुष्कृतयोः सहानुष्ठानेन तयोरपि युगपदनुभवसंभवात् । अत एव सहानुष्ठिततीव्रतपश्चरणस्वशरीरमात्रपोषणरूपधर्माधर्मफलयोर्ब्रह्मलोकावाप्तिक्षुत्पिपासाक्लेशयोर्युगपदुपभोगः प्रतिपादित उत्तरकाण्डे श्वेतोपाख्याने रामं प्रति अगस्त्यवचने—

'अथापश्यं शवं तत्र सुपुष्टमजरं क्वचित् । तिष्ठन्तं परया लक्ष्म्या तस्मिंस्तोयाशये नृप ॥ तमर्थं चिन्तयानोऽहं मुहूर्तं तत्र राघव । उषितोऽस्मि सरस्तीरे किन्विदं स्यादिति प्रभो ॥ तदापश्यं मुहूर्तेन दिव्यमद्भुतदर्शनम् । विमानं परमोदारं हंसयुक्तं मनोजवम् ॥ अत्यर्थं स्वर्गिणं तत्र विमाने रघुनन्दन । उपास्तेऽप्सरसां वीर सहस्रं दिव्यभूषणम ॥ गायन्ति दिव्यगेयानि वादयन्ति तथापराः ॥ क्ष्वेळयन्ति तथा चान्या नृत्यन्त्यपि तथापराः ॥ अपराश्चन्द्ररश्म्याभैर्हेमदण्डैश्च चामरैः । दुधुवुर्वदनं तस्य पुण्डरीकनिभेक्षणम् ॥ ततः सिंहासनं त्यक्त्वा मेरुकूटमिवांशुमान् । पश्यतो मे तथा राम विमानादवरुह्य च ॥ तं शवं भक्षयामास स स्वर्गी रघुनन्दन । तथा भुक्त्वा यथाकामं मांसं बहु च सुष्ठु च ॥ अवतीर्य सरः स्वर्गी सम्प्रष्टुमुपचक्रमे । उपस्पृश्य यथान्यायं स स्वर्गी पुरुषर्षभ ॥ आरोढुमुपचक्राम विमानवरमुत्तमम् । तमहं देवसंकाशमारोहन्तमुदीक्ष्य वै ॥ अहं तदाब्रवं वाक्यं स्वर्गिणं पुरुषर्षभ । को भवान् देवसंकाश आहारश्च विगर्हितः ॥ त्वया संभुज्यते सौम्य किमर्थं वक्तुमर्हसि । आश्चर्यमीदृशो भावो भास्वरो देवसंमतः । आहारो गर्हितः सौम्य श्रोतुमिच्छामि

तत्त्वतः ॥ श्रुत्वा तु भाषितं वाक्यं मम राम शुभाक्षरम् ।
प्राञ्जलिः प्रत्युवाचेदं स स्वर्गी रघुनन्दन ॥ पुरा विदर्भको
राजा पिता मम महायशाः । वसुदेव इति ख्यातस्त्रिषु लोकेषु
वीर्यवान् ॥ तस्य पुत्रद्वयं राज्ञो द्वाभ्यां स्त्रीभ्यामजायत । अहं
श्वेत इति ख्यातो यवीयान् सुरथोऽभवत् ॥ सोऽहं निमित्ते
कस्मिंश्चित् विज्ञातायुर्द्विजोत्तम । कालधर्मं हृदि न्यस्य
तपोवनमुपागमम् ॥ सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम् ।
तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे ॥ सोऽहं वर्षसहस्राणि
तपस्त्रीणि महामुने । कृत्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम् ॥
तस्य मे स्वर्गिभूतस्य क्षुत्पिपासे द्विजोत्तम । बाधेते परमोदार
ततोऽहं व्यथितेन्द्रियः । गत्वा त्रिभुवनश्रेष्ठं पितामहमुवाच ह ॥
पितामहस्तु मामाह तवाहारः सदैव च । स्वादूनि स्वानि
मांसानि तानि भक्षय नित्यशः ॥ स्वशरीरं त्वया पुष्टं कुर्वता तप
उत्तमम् । अनुप्तं रोहते श्वेत न कदाचिन्महामते ॥ दत्तं न
त्वस्ति सूक्ष्मोऽपि वने सत्वनिषेविते । तेन स्वर्गगतो वत्स
बाध्यसे क्षुत्पिपासया ॥ स त्वं सुपुष्टमाहारैः स्वशरीरमनुत्तमम् ।
भक्षयस्वामृतरसं तेन तृप्तिर्भविष्यति ॥ यदा तु तद्वनं घोर-
मगस्त्यस्तु महानृषिः । आश्रयिष्यति दुर्धर्षस्तदा कृच्छ्राद्वि-
मोक्ष्यसे ॥ स हि तारयितुं सौम्य शक्तः सुरगणानपि । किं
पुनस्त्वां महाबाहो क्षुत्पिपासावशंगतम् ॥ सोऽहं भगवतः श्रुत्वा
देवदेवस्य निश्चयम् । आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम ॥
बहुवर्षगणं ब्रह्मन् भक्ष्यमाणमिदं मया । क्षयं नाभ्येति- ब्रह्मर्षे
प्रसादं कर्तुमर्हसि ॥' इति ॥

एवं सहानुष्ठितधर्माधर्मफलयो राज्यरोगयोर्युगपदनुभवः संभवत्येव। क्वचित्तु धर्माधर्मयोः सत्यपि सहानुष्ठाने तत्फलयोः स्वर्गनरकयोः 'यन्न दुःखेन संभिन्नम्' इत्याद्यर्थवादेन परस्परासंभिन्नत्वावगमेन क्रमेणैवोपभोगः। अतः 'पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः।' इत्यादिकं न विरुध्यते ॥

प्रकृते च रावणे तीव्रतपश्चरणपरितोषितब्रह्मप्रसादलब्धस्य चिरकालजीवित्वादिफलस्य परदारापहरणाद्यधर्मफलस्यानायुष्यादिरूपस्य च परस्परविरुद्धत्वात्तद्धेतुभूतयोर्धर्माधर्मयोः क्रमेणानुष्ठानाच्च क्रमेणैवोपभोगो युक्त इति 'प्राप्तं धर्मफलं तावद्भवता नात्र संशयः।' इत्येतदुपपन्नमेव ॥

'तदेव फलमन्वेति' इत्यनेन आरब्धफलं कर्म संचितं कर्माभिभूय स्वफलं प्रयच्छतीति प्रतिपादनात् प्रारब्धफलस्य कर्मणः संचितकर्मापेक्षया प्राबल्यं सूचितम्। तात्कालिकमपि उत्कटं कर्म प्रारब्धमपि कर्माभिभूय स्वफलमेव प्रयच्छति। तदुक्तं पराशरपुराणे— 'अत्युत्कटैरिहत्यैस्तु पुण्यपापैः शरीरभृत्। प्रारब्धं कर्म विच्छिद्य भुङ्क्ते तत्फलमेव हि ॥ इहैव फलदं कर्म प्रारब्धं प्रतिबध्य च। फलं ददाति स्वप्ने वा जाग्रत्कालेऽथ वानघे ॥' इति। उत्कटेन विच्छिन्नफलकमपि कर्म न स्वरूपतो नश्यति, किंतु स्वफलशेषं कालान्तरे प्रयच्छति। तथा च पराशरपुराणे— 'प्रारब्धशेषं विच्छिन्नं पुनर्देहान्तरेण तु। युक्तो देही ततो भुङ्क्ते तं लंघयति कः शुक ॥' इति ॥

'धर्मश्चाधर्मनाशनः' इत्यनेन धर्मस्य अधर्मस्वरूपनाशक-

षणेन कथमुक्तमिति चेत् — न, 'नापृष्टः कस्यचिद्ब्रूयात्' इत्यादेः सर्वस्यापि विनोदार्थतया प्रवृत्तराजवचनविषयत्वात् ॥

राज्ञो धर्मलोपप्रसक्तौ आपत्प्रसक्तौ वा अपृष्टेनापि वक्तव्यमेव । तथा च कामन्दके— 'सुखप्रबन्धगोष्ठीषु वादे वा वादिनां मतम् । विजानन्नपि न ब्रूयाद्भर्तुः क्षिप्त्वोत्तरं वचः ॥ आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोऽपि हितान्वेषी ब्रूयात्कल्याणभाषितम् ॥' उद्योगेऽपि—शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् । अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥' इति ॥

किं च, अकार्यप्रवृत्तराजविषयोपेक्षणे राज्ञः स्वस्य चानिष्टं भवति । तथा च कामन्दके— 'राजानं ये ह्युपेक्षन्ते सज्जमानं विकर्मसु । ते गच्छन्त्यकृतात्मानः सह तेन पराभवम् ॥ अकार्यात्प्रतिषेधश्च कार्ये चैवानुवर्तनम् । संक्षेपादिति सद्वृत्तं बन्धुमित्रानुजीविनाम् ॥' इति ॥

तथा च विभीषणः सकलनीतिशास्त्राभिज्ञः उपेक्षणे राज्ञोऽधर्ममपकीर्तिं च स्वस्य प्रत्यवायं च बन्धुत्वं भृत्यत्वमखिलमपि विचिन्त्य दूतहननरूपाधर्मवशेन धर्मलोपपरिहाराय अपृष्टोऽपि 'न कर्तव्योऽयं वधः' इत्युक्तवानिति ॥

इति द्विपञ्चाशः सर्गः ।

अथ त्रिपञ्चाशः सर्गः ॥

त्रिपंचाशे— ततो रावणः—

सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ।
अवश्यं तु वधादन्यत्क्रियतामस्य निग्रहे ॥

इत्यभिधाय—

आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सपत्वरम् ।
लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥

तदाज्ञप्ता राक्षसाश्च,

शंखभेरीनिनादैस्ते घोषयन्तः स्वकर्मभिः ।
राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥

अनेन राजा सम्यक् सारापराधेन दण्डयान् दण्डयित्वा जनानामपि प्रत्ययोत्पादनाय सम्यक् दोषान् ख्यापयेदिति सूचितम् । तथा च मनुः—'तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्वतः । कुर्वीत शासनं राजा सम्यक् सारापराधतः ॥ न हि दण्डादृते शक्यः कर्तुं पापस्य निग्रहः ।' इति ॥

तत इतस्ततो राक्षसैः परिकृष्यमाणो हनूमानित्थमचिन्तयत्—

सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ।
रामस्य किं तु प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥

अनेन प्रभोः कार्यार्थतया प्राप्तोऽप्युपद्रवः सोढव्य इति सूचितम । तथा च राजधर्मे—'काले धुरि नियुक्तानां वहतां भारमाहितम् । सीदतामपि कौन्तेय न कीर्तिरवसीदति ॥' इति ॥

ततो राक्षसीगणसमुदीरितं हनूमत्पीडनमाकर्ण्य दूयमान-मानसा,

वैदेही शोकसंतप्ता हुताशनमुपागमत् ।
मंगळाभिमुखी तस्य सा तदासीन्महाकपेः ॥

उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ।
यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥

यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः ।
यदि कश्चिदनुक्रोशस्तस्य मय्यस्ति धीमतः ॥

यदि वा भाग्यशेषो मे शीतो भव हनूमतः ।
यदि मां वृत्तसंपन्नां तत्समागमलालसाम् ॥

स विजानाति धर्मात्मा शीतो भव हनूमतः ।
यदि मां तारयेदार्यः सुग्रीवः सत्यसंगरः ॥

अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥

अत्र स्वोपकारकस्य हनूमतोऽनिष्टनिवृत्त्यै सीतया अभि-प्रार्थनाद्याचरणादन्यैरपि आपन्नः स्वोपकर्ता रक्षणीयः, अन्यथा प्रत्यवायो भवतीति सूचितम् । तथा च द्रोणपर्वणि भूरिश्रवसं प्रत्यर्जुनवाक्यम्—'यो यस्य युध्यतेऽर्थाय स वै रक्ष्यो नराधिप।' इति । तथा च प्राचीनाः—'वृत्तिच्छेदविधौ द्विजातिमरणे मित्रापदां वारणे सम्प्राप्ते समरे कळत्रहरणे स्वामिग्रहे गोग्रहे । ये शक्ताः पुरुषाः पराङ्मुखतया कुर्वन्त्युदासीनतां तानालोक्य विलोकितुं मृगयते सूर्योऽपि सूर्यान्तरम् ॥' इति ॥

ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः ।
जज्वाल मृगशाबाक्ष्याः शंसन्निव शिवं कपेः ॥

अनेन अग्नेः प्रदक्षिणज्वालावत्त्वं कार्यसिद्धिसूचकमित्युक्तम् । तच्च प्रागेव अयोध्याकाण्डे उक्तम् ॥

हनूमज्जनकश्चापि पुच्छानलयुतोऽनिलः ।
ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥

दह्यमाने च लांगूले चिन्तयामास वानरः ।
प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥

दृश्यते च महाज्वालः करोति च न मे रुजम् ।
शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ॥

अनेन महापुरुषमग्निरपि न दहति इति सूचितम् । अत एव पुत्रवियोगजनितक्लेशेन अग्निं प्रविशन्तं वासिष्ठमग्निर्न ददाहेति प्रतिपादितं आदिपर्वणि— 'तदाग्निमित्थं भगवान् स विवेश महावने । तं तदा सुसमिद्धोऽपि न ददाह हुताशनः ॥ दीप्यमानोऽप्यमित्रघ्नः शीतोऽग्निरभवत्तदा ।' इति ॥

अथवा तदिदं व्यक्तं यद्दृष्टं प्लवता मया ।
रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥

यदि तावत्समुद्रस्य मैनाकस्य च धीमतः ।
रामार्थे संभ्रमस्तादृक् किमग्निर्न करिष्यति ॥

सीतायाश्चानृशंस्येन तेजसा राघवस्य च ।
पितुश्च मम सख्येन न मां दहति पावकः ॥

इन्द्रो महेन्द्रस्सुरनायको वा
त्रातुं न शक्ता युधि रामवध्यम् ॥

अनेन रामवध्यस्य स्वरक्षणमवश्यमित्युक्त्या महापुरुषापराधिनामन्यो रक्षको न भवतीति सूचितम् । तथा च द्रोणपर्वणि जयद्रथवधे अर्जुनः—'असुरसुरमनुष्याः पक्षिणो वोरगा वा पितृरजनिचरा वा ब्रह्मदेवर्षयो वा । चरमचरमपीदं यत्परं चापि तस्मात्तदपि मम रिपुं तं रक्षितुं नैव शक्ताः ॥' इति ॥

अत्र सर्गे प्रथमतः 'राक्षसेन्द्र हरीशस्त्वाम्' इत्यादिना रावणस्तुतिम्, 'राजा दशरथो नाम' इत्यादिना 'त्रातुं न शक्ता युधि रामवध्यम्' इत्यन्तेन राघवस्तुतिं च कृत्वैव कार्यस्य हनूमता निवेदनात् दूतैः पक्षद्वयस्तुत्यैव कार्यं वक्तव्यमिति सूचितम् । तथा च कामन्दके—'कुलेन नाम्ना द्रव्येण कर्मणा च महीयसा । कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ॥' इति ॥

इति एकपञ्चाशः सर्गः ।

अथ द्विपञ्चाशः सर्गः ॥

द्विपंचाशे—ततः कोपेन हनूमद्वधमाज्ञापवन्तं दशाननमवलोक्य विभीषणस्तात्कालिकोचितमिदमवोचत्—

क्षमस्व रोषं त्यज राक्षसेन्द्र
प्रसीद मद्वाक्यमिदं शृणुष्व ।
वधं न कुर्वन्ति परावरज्ञा
दूतस्य सन्तो वसुधाधिपेन्द्राः ॥

राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ।
तव चासदृशं वीर कपेरस्य प्रमापणम् ॥

अनेन शास्त्रमविचार्य कामकारेण दण्डं कुर्वतो नरको भवतीति सूचितम् । तथा च राजधर्मे—'कामकारेण दण्डं तु यः कुर्यादविचक्षणः । स इहाकीर्तिसंयुक्तो मृतो नरकमाप्नुयात् ॥' इति ॥

धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः ।
परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥

गृह्यन्ते यदि रोषेण त्वादृशोऽपि विपश्चितः ।
ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥

तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद ।
युक्तायुक्तं विनिश्चित्य दूते दण्डो विधीयताम् ॥

अनेन विचार्य अपराधानुगुणतया दण्डः कर्तव्य इति सूचितम् । तथा च राजधर्मे—'अपराधानुरूपेण दण्डं पापेषु कारयेत् । विनयेच्चापि दुर्वृत्तान् प्रहारैरपि पार्थिवः ॥' इति ॥

असंशयं शत्रुरयं प्रवृद्धः
कृतं ह्यनेनाप्रियमप्रमेयम् ।
न दूतवध्यां प्रवदन्ति सन्तो
दूतस्य दृष्टा बहवो हि दण्डाः ॥

वैरूप्यमंगेषु कशाभिघातो
मौण्ड्यं तथा लक्षणसन्निपातः ।
एतान् हि दूते प्रवदन्ति दण्डान्
वधश्च दूतस्य न नः श्रुतोऽपि ॥

अत्र अयं प्रवृद्धः शत्रुः, अप्रमेयमप्रियं च तेनाचरितम्, तथापि प्रमापणं न युक्तम्, किन्तु कशाभिघाताङ्कनादिकमेव युक्तमित्युक्तथा दूतकृत्यं परित्यज्य यः स्वमत्या किंचिद्वदति, तस्याङ्कनताडनादिकमेव युक्तमिति [सूचितम्]। तथा च राजधर्मे—'दुष्टानां निग्रहो दण्डो हिरण्यं बाह्यतः क्रिया। व्यंगत्वं च शरीरस्य वधो नाल्पस्य कारणात्॥ शरीरपीडास्तास्ताश्च देहत्यागो विवासनम्।' इति॥

न धर्मवादे न च लोकवृत्ते
न शास्त्रबुद्धिग्रहणेषु चापि।
विद्येत कश्चित्तव वीर तुल्य-
स्त्वं ह्युत्तमः सर्वसुरासुराणाम्॥

न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम्।
तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः॥

साधुर्वा यदि वासाधुः परैरेष समर्पितः।
ब्रुवन् परार्थं परवान् न दूतो वधमर्हति॥

अस्मिन् हते वानरयूथमुख्ये
सर्वेऽपवादं प्रवदन्ति सन्तः।
न हि प्रपश्यामि गुणान् यशो वा
लोकापवादो भवति प्रसिद्धः॥

अनेन यथोक्तवादी दूतो न वध्य इति सूचितम्। तथा च राजधर्मे—'न तु हन्यान्नृपो जातु दूतं कस्यांचिदापदि। दूतस्य हन्ता निरयानाविशेत्सचिवैः सह॥

यथोक्तवादिनं दूतं क्षत्रधर्मरतो नृपः । यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयुः ॥' इति ॥

युद्धकाण्डे शुकवाक्येऽपि—'न दूतान् घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः । यस्तु हित्वा मतं भर्तुः स्वमतं संप्रभाषते । अनुक्तवादी दूतः सन् स दूतो वधमर्हति ॥ लुप्येते मे बलात्पक्षौ भिद्येते च तथाक्षिणी ॥ यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम् । एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम् ॥ सर्वं तदुपपद्येथा विजह्यां यदि जीवितम् ॥' इति । कामन्दकेऽपि— 'उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा । ते वै यथार्थवक्तारो न वध्याः पृथिवीभुजाम् ॥' इति ॥

अत्र वधस्ताडनादिकमेव, 'यां च रात्रिं मरिष्यामि' इत्यादिना प्राणवियोगपर्यन्तव्यापारस्य निन्दितत्वात् ॥

तदलमनेन निरर्थकदूतहननेन, तावेव रामलक्ष्मणौ निग्राह्याविति ॥

अत्र सर्गे रावणेनाज्ञप्तो हनूमद्वधः । विभीषणश्च तदनुज्ञां विनैव तद्विरुद्धतया च पुनः पुनः न स कर्तव्य इति प्रतिषेधति । तदसंगतम्, सभासद्भिः राजानुज्ञयैव वक्तव्यत्वात् । तथा च कामन्दके—'तन्नियोगेन च ब्रूयादर्थं सुपरिनिश्चितम् ।' इति । अपृष्टमपि राज्ञोऽनुमतं चेदेव कर्तव्यम् । तदपि कामन्दके —'समर्थयंश्च तत्पक्षं साधु भाषेत भाषितम् । विजानन्नपि न ब्रूयाद्भर्तुः क्षिप्त्वोत्तरं वचः । विगृह्य कथनं नैव न कुर्यात्स्थायसा सह ॥' इति । तथा च राजाभिप्रायविरुद्धं निषी-

त्वमपि अस्तीति सूचितम् । तथा च **तैत्तिरीयश्रुतिः**— 'धर्मेण पापमपनुदति' इति । **गौतमोऽपि** धर्मस्याधर्मनाशकत्वं पूर्वपक्षसिद्धान्ताभ्यामाह— 'अथ खल्वयं पुरुषो याप्येन कर्मणा लिप्येत । यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति । तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते । न कुर्यादित्याहुः । न हि कर्म क्षीयत इति । कुर्यादित्यपरम् । पुनः सोमेनेष्ट्वा पुनः सवनमायन्तीति विज्ञायते । व्रात्यस्तोमेनेष्ट्वा । तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते । अग्निष्टुताभिशस्यमानं याजयेदिति च' इति ॥

स चाधर्मनाशको धर्मोऽनेकविधः— नित्यकर्मदानप्रायश्चित्तवेदाभ्यासख्यापननामसंकीर्तनब्रह्मज्ञानभेदात् । तत्र नित्यकर्मणः पापनाशकत्वे **तैत्तिरीयश्रुतिः**— 'अग्निहोत्रं सायं प्रातर्गृहाणां निष्कृतिः स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति ।' इति । 'अग्निहोत्रं वै देवा गृहाणां निष्कृतिमपश्यन्' इति च । **मानवेऽपि**— 'सन्ध्यामुपासते ये तु सततं संशितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥' इति । तथा 'यदह्ना कुरुते पापं कर्मणा [कायेन] मनसा गिरा । आसीनः पश्चिमां सन्ध्यां प्राणायामैस्तु हन्ति तत् ॥ यद्रात्र्या कुरुते पापं कायेन मनसा गिरा । पूर्वां सन्ध्यामुपासीनः प्राणायामैस्तु हन्ति तत् ॥' इति ॥

दानस्य पापनिवर्तकत्वं च **आपस्तम्बधर्मे**— 'दानेन निर्दोषो भवति' इति । तथा 'अन्नादे भ्रूणहा मार्ष्टि' इति

च । प्रायश्चित्तस्य पापनिवर्तकत्वं तैत्तिरीयश्रुतौ— 'कूश्माण्डै-र्जुहुयाद्यो ऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिंचति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते' इति । गौतमोऽपि—' रहस्यं प्रायश्चित्तमविज्ञातदोषस्य ' इत्युपक्रम्य 'ब्रह्महत्यासुरापानस्तेयगुरुतल्पेषु प्राणायामैस्तान्तोऽघमर्षणं जपेत् सममश्वमेधावभृथेन । सावित्रीं वा सहस्रकृत्व आवर्तयेत्पुनीते हैवात्मानं सर्वपापेभ्यो ह मुच्यते । ' इति ॥

वेदाभ्यासस्य पापनिवर्तकत्वे मनुः— 'वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा । नाशयत्याशु पापानि महापातक-जान्यपि ॥' इति । ख्यापनस्य पापनिवर्तकत्वं च शान्तौ राजधर्मे अर्जुनं प्रति युधिष्ठिरवाक्ये— 'धनंजय कृतं पापं कल्याणेनो-पहन्यते । ख्यापनेनानुतापेन दानेन तपसापि वा । निष्कृत्या तीर्थगमनात् श्रुतिस्मृतिजपेन वा ॥' इति ॥

नामसंकीर्तनात्पापनिवृत्तिश्च विष्णुपुराणे— 'यस्मिन्न्य-स्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने विघ्नो यत्र निवेशिता-त्ममनसो ब्राह्मोऽपि लोकोऽल्पकः । नित्यं चेतसि संस्थितो जड-धियां पुंसां ददात्यव्ययं किं चित्रं यदघं प्रयाति विलयं यत्राच्युते कीर्तिते ॥' इति । तथा 'अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः। पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥' इति ॥

ज्ञानेन पापनिवृत्तिश्च गीतायां प्रतिपादिता— 'यथै-धांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥' इति । मानवेऽपि— 'यथैधस्तेजसा वह्निः

प्राप्तं निर्दहति क्षणात् । तथा ज्ञानाग्निना पापं कृत्स्नं दहति वेदवित् ॥' इति ॥

तथा च उक्तविधया संचितानामनुत्कटानां कर्मणां तात्कालिकाभिभवेन फलोत्पत्तिप्रतिबन्ध एव । उत्कटेन तु कर्मणा प्रारब्धफलस्यापि कर्मणो विच्छेद इति स्थितिः ॥

जनस्थानवधं बुद्ध्वा बुद्ध्वा वालिवधं तथा ।
रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥

कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ।
लंकां नाशयितुं शक्तस्तस्यैष तु न निश्चयः ॥

रामेण हि प्रतिज्ञातं हर्यृक्षगणसन्निधौ ।
उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥

अनेन समर्थोऽपि दूतः स्वाम्यनभिप्रेतं न कुर्यादिति सूचितम् । तथा च कामन्दके— 'भर्तृचित्तानुवर्तित्वं सद्वृत्तमनुजीविनाम् । रक्षांस्यपि हि गृह्यन्ते नित्यं छन्दानुवर्तनात् ॥' इति ॥

अपकुर्वन् हि रामस्य साक्षादपि पुरन्दरः ।
न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥

यां सीतेत्यभिजानासि येयं तिष्ठति ते वशे ।
काळरात्रीति तां विद्धि सर्वलंकाविनाशिनीम् ॥

तदलं कालपाशेन सीताविग्रहरूपिणा ।
स्वयं स्कन्धावसक्तेन क्षममात्मनि चिन्त्यताम् ॥

सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ।
दह्यमानामिमां पश्य पुरीं साट्टप्रतोळिकाम् ॥

स्वानि मित्राणि मन्त्रींश्च ज्ञातीन् भ्रातॄन् सुतान्हितान् ।
भोगान्दारांश्च लंकां च मा विनाशमुपानय ॥

सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ।
रामदासस्य दूतस्य वानरस्य विशेषतः ॥

सर्वान्लोकान् सुसंहृत्य सभूतान्सचराचरान् ।
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥

देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ।
सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वशः ॥

सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ।
यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ॥

सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥

देवाश्च दैत्याश्च निशाचराश्च
गन्धर्वविद्याधरनागयक्षाः ।
रामस्य लोकत्रयनायकस्य
स्थातुं न शक्ताः समरेषु सर्वे ॥

ब्रह्मा स्वयम्भूश्चतुराननो वा
रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ।

अनेन महापुरुषाश्रयवतां प्राप्ताप्यापदर्किंचित्करी भवतीति सूचितम् । अत एव विष्णुसमाश्रयणात् प्रह्लादस्य सर्वोपद्रवनिवृत्तिरुक्ता विष्णुपुराणे— 'प्रह्लादः परमां भक्तिं य उवाच जनार्दने ॥ दैत्येन्द्रदीपितो वह्निः सर्वाङ्गोपचितो द्विज । न ददाह च यं वह्निः [विप्र] वासुदेवे हृदि स्थिते ॥ महार्णवान्तस्सलिले स्थितस्य चलतो मही । चचाल सकला यस्य पाशबद्धस्य धीमतः ॥ न भिन्नं विविधैः शस्त्रैर्यस्य दैत्यनिपातितैः । शरीरमद्रिकठिनैः सर्वत्राच्युतचेतसः ॥ विषानलोज्ज्वलमुखा यस्य दैत्यप्रचोदिताः । नान्ताय सर्पपतयो बभूवुरुरुतेजसः ॥ शैलैराक्रान्तदेहोऽपि यः स्मरन् पुरुषोत्तमम् । तत्याज नात्मनः प्राणान् विष्णुस्मरणदंशितः ॥ पतन्तमुच्चादवनिर्यमुपेत्य महामतिम् । दधार दैत्यपतिना क्षिप्तं स्वर्गनिवासिना ॥ यस्य संशोषणो वायुर्देहे दैत्येन्द्रचोदितः । अवाप संक्षयं सद्यश्चित्तस्थे मधुसूदने ॥ विषाणभङ्गमुन्मत्ता मदहानिं च दिग्गजाः । यस्य वक्षःस्थले प्राप्ता दैत्येन्द्रपरिणामिताः ॥ यस्य चोत्पादिता कृत्या दैत्यराजपुरोहितैः । बभूव नान्ताय पुरो गोविन्दासक्तचेतसः ॥ शम्बरस्य च मायानां सहस्रमतिमायिनः । यस्मिन प्रयुक्तं चक्रेण कृष्णस्य वितथीकृतम् ॥ दैत्येन्द्रसूदोपहृतं यस्य हालाहलं विषम् । जरयामास मतिमानविकारममत्सरी ॥ समचेता जगत्यस्मिन्यः सर्वेष्वेव जन्तुषु । यथात्मनि तथान्येषां परं मैत्रीगुणान्वितः ॥ धर्मात्मा सत्यशौचादिगुणानामाकरस्तथा । उपमानमशेषाणां साधूनां यः सदाभवत् ॥' इति ॥

[इति] संचिन्त्य विभक्तरक्षोगणसंबाधं पुरद्वारमासाद्य

मारुतिस्तोरणाश्रितं कालायसं कंचित् परिघं परिगृह्य,

स तान्निहत्वा रणचण्डविक्रमः
समीक्षमाणः पुनरेव लंकाम् ।
प्रदीप्तलाङ्गूलकृतार्चिमाली
व्यराजतादित्य इवांशुमाली ॥

इति त्रिपञ्चाशः सर्गः ।

अथ चतुःपञ्चाशः सर्गः ॥

चतुःपंचाशे— तदनु पवनात्मजो रजनीचरहननवन-भङ्गाभ्यामप्यपरिपूर्णमानसः,

दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् ।
अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥

यो ह्ययं मम लांगूले दीप्यते हव्यवाहनः ।
अस्य सन्तर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ।

इत्यचिन्तयत् । अनेन प्रदीप्तस्याग्नेः संतर्पणमवश्यं कर्तव्यमिति सूचितम् । तथा चानुशासनिके देवरहस्ये— 'हव्यवाहस्य दीप्तस्य समिधं ये न जुह्वति । अग्निकार्येषु वै तेषां हव्यं नाभाति पावकः ॥' इति ॥

वर्जयित्वा महातेजा विभीषणगृहं प्रति ।
क्रममाणः क्रमेणैव ददाह हरियूथपः ॥

अनेन शत्रोः पुरे राष्ट्रे च शस्त्राग्न्यादिभिः पीडा कर्तव्येति सूचितम् । तथा च राजधर्मे— 'राष्ट्रं च पीडयेत्तस्य शस्त्राग्निविषपीडनैः ।' इति । मनुरपि-- 'उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ।' इति ॥

अत्र विभीषणगृहं वर्जयित्वा इति विभीषणगृहवर्जनपूर्वकमितरगृहाणां दाहप्रतिपादनेन सुकृतशालिनं पुरुषं तदीयधर्म एव उपद्रवकारिण्यपि पुरुषे समीचीनबुद्ध्युत्पादनेन रक्षतीति सूचितम् । तथा च प्राचीनाः— 'वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥' इति । संसर्गदोषो न भवतीत्यत्रापि प्राचीनाः—'सत्संगाद्भवति हि साधुता खलानां साधूनां न हि खलसंगमात् खलत्वम् । सौगन्ध्यं कुसुमभवं मृदेव धत्ते मृद्गन्धं न हि कुसुमानि धारयन्ति ॥' इति ॥

देवाश्च सर्वे मुनिपुंगवाश्च
गन्धर्वविद्याधरकिंनराश्च ।
भूतानि सर्वाणि महान्ति तत्र
जग्मुः परां प्रीतिमतुल्यरूपाम् ॥

अनेन श्रेयस्करकर्मकर्तरि सर्वभूतानि प्रीयन्त इति सूचितम् । तथा चानुशासनिके— 'अप्यदृष्टश्रवा देवाः पुरुषं धर्मचारिणम् । भूतिकर्माणि कुर्वाणं तं जनाः कुर्वते प्रियम् ॥' इति ॥

इति चतुःपञ्चाशः सर्गः ।

अथ पञ्चपञ्चाशः सर्गः ॥

पञ्चपंचाशे— अथ लंकाप्रदीपनेन संतर्पितं वालाग्रस्थितं पावकं पयोनिधौ शमयित्वा सीतागतमानसो मारुतिरात्मानमेवमगर्हयत्——

लंकां प्रदहता कर्म किंस्वित्कृतमिदं मया ॥

धन्यास्ते पुरुषश्रेष्ठा ये बुद्धया कोपमुत्थितम् ।
निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥

यः समुत्पतितं कोपं क्षमयैव निरस्यति ।
यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥

अनेन बुद्धया कोपं यः प्रशमयति, स एव पुरुषश्रेष्ठ इत्युक्तम् । एतच्च प्राक्प्रपञ्चितम् ॥

यदि दग्धा त्वियं लंका नूनमार्यापि जानकी ।
दग्धा तेन मया भर्तुर्हितं कार्यमजानता ॥

यदर्थमयमारम्भस्तत्कार्यमवसादितम् ।

अनेन अतिकोपिन आरब्धं कार्यं सर्वं नश्यतीति सूचितम् । तथा च वनपर्वणि — 'आत्मानमपि च क्रुद्धः प्रेषयेद्यमसादनम् ।' इति ॥

धिगस्तु राजसं भावमनीशमनवस्थितम् ।
ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥

अत्र सात्विकराजसतामसगुणानां मध्ये राजसगुणः क्रोध इत्युक्तम् । तथा च गीतायाम् — 'सत्वं रजस्तम इति गुणाः

सामाध्येतव्यमित्यर्थः। 'सर्वेषु च शब्दकर्मसु यत्र संसृज्येरन्'॥२१॥ आक्रोशपरिहासादिशब्दा यत्र अध्ययने संसृज्येरन् , तत्र नाध्येतव्यमित्यर्थः। 'छर्दयित्वा स्वप्नान्तम्' ॥ २२ ॥ वमने सति स्वप्नपर्यन्तं नाध्येतव्यमित्यर्थः। 'सर्पिर्वा प्राश्य' ॥ २३ ॥ अध्येतव्यमित्यर्थः। 'भुक्तं[शुक्तं]चात्मसंयुक्तम' ॥ २५ ॥ अजीर्णोद्गारयोर्नाध्येतव्यमित्यर्थः। 'प्रदोषे च भुक्त्वा' ॥ २६ ॥ भोजनानन्तरं पूर्वरात्रे नाध्येतव्यमित्यर्थः। 'प्रोदकयोश्च पाण्योः' ॥ २७ ॥ भोजनानन्तरं यावदार्द्रपाणिस्तावन्नाधीयीतेत्यर्थः। 'प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः' ॥ २८ ॥ सपिण्डीकरणात्पूर्वभाविश्राद्धान्नभोजने सप्रदोषमहरनध्याय इत्यर्थः। 'आ च विपाकात्' ॥ २९ ॥ यदि तावता कालेन तदन्नं न जीर्यते, तदा जरणपर्यन्तं नाधीयीतेत्यर्थः ॥

'काण्डोपाकरणे चामातृकस्य (आप.ध. ख. ११, सू. १)। काण्डसमापने चापितृकस्य' ॥ २ ॥ काण्डारम्भे कृते अमातृकस्य माणवकस्य सप्रदोषमहरनध्याय इत्यर्थः। एवं काण्डसमापनेऽपि अपितृकस्य व्रतसमाप्तावपि सप्रदोषमहरनध्याय इत्यर्थः। 'मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके' ॥ ३ ॥ ये मनुष्याः सन्तः कर्मणा देवभावं प्राप्ताः कुबेर [कुमार] नन्दीश्वरादयः, तत्प्रीत्यर्थे ब्राह्मणभोजने सप्रदोषमहरनध्याय इत्यर्थः। 'पर्युषितैस्तण्डुलैरामभांसेन च नानध्यायः' ॥ ४ ॥ प्रेतसंक्लृप्तमामं प्रतिगृह्य यदि श्वोभूते तदामं पक्त्वा भुङ्क्ते, तदा नानध्याय इत्यर्थः। एवमाममांसेऽपि। 'तथौषधिवनस्पतिमूलफलैः' ॥ ५ ॥ श्राद्धे प्रतिगृहीतैरेतैः तद्दह्भक्षितैरपि नानध्याय इत्यर्थः। 'यत्काण्डमुपाकुर्वीत

यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत' ॥ ६ ॥ श्रावण्यामु-पाकृत्य प्रशस्ते अहरन्तरे यत्काण्डस्यानुवाकमारभते, तत्काण्डं तदहर्नाधीयीतेत्यर्थः। 'उपाकरणसमापनयोश्च पारायणस्य तां विद्याम्' ॥ ७ ॥ त्रैदत्रयवित् यस्य वेदस्य पारायणार्थमुपाकरण-मुत्सर्जनं वा करोति, तं वेदं तस्मिन्नहनि नाधीयीतेत्यर्थः। 'वायु-र्घोषवान् भूमौ वा तृणसंवाहो वर्षति वा यत्र धाराः प्रवहेत्' ॥ ८ ॥ यदा सशब्दो वायुर्वाति, तृणानि वा अपकर्षति, वर्षधारा वा निक्षिपति, तावन्तं कालं नाधीयीतेत्यर्थः। 'ग्रामारण्ययोश्च सन्धौ ॥ ९ ॥ महापथे च ॥ १० ॥ विप्रोष्य च समध्ययनं तदहः' ॥ ११ ॥ यदा कारणवशात् प्रवसेयुः, तेषु केचिदाचार्येण संगताः, अध्ययनदेशे वा संगताः स्युः, तदा तदहरनध्याय इत्यर्थः। 'स्वैरिकर्मसु च ॥ १२ ॥ यथा पादप्रक्षालनोत्सादनानु-लेपनानीति ॥ १३ ॥ तावन्तं कालं नाधीयीत अध्यापयेद्वा ॥ १४ ॥ सन्ध्योः ॥ १५ ॥ तथा वृक्षमारूढः ॥ १६ ॥ अप्सु चावगाढः ॥ १७ ॥ नक्तं चावृते ॥ १८ ॥ दिवा चापि-हिते' ॥ १९ ॥ स्पष्टम्। 'अविहितमनुवाकाध्ययनमाषाढवासन्ति-कयोः' ॥ २० ॥ चैत्रशुद्धत्रयोदश्यां वसन्तोत्सवे आषाढशुद्धत्रयो-दश्यामिन्द्रोत्सवे चानुवाकाध्ययनं न कर्तव्यम्। [अनुवाकग्रह-णात्] न्यूने तु न दोषः। 'नित्यप्रश्नस्य चाविधिना' ॥ २१ ॥ नित्ये ब्रह्मयज्ञाध्ययने वक्ष्यमाणविधानमन्तरा नाध्येतव्यमित्यर्थः। तेन विस्मृत्य कृते प्रातराशे नित्यकर्मलोपप्रायश्चित्तमुपवासादिकमेव; न पुनर्ब्रह्मयज्ञाध्ययनमित्यर्थः। 'मनसा चानध्याये' ॥ २२ ॥ अन-ध्याये ब्रह्मयज्ञाध्ययनमपि मनसैव, न तु वाचा इत्यर्थः। 'विद्युति चाभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतान्ने नीहारे च मानसं

परिषिच्यते ॥ २५ ॥ श्राद्धभोजन एवैके' ॥ २६ ॥ अभ्यग्रा अविरता इत्यर्थः । 'विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र सन्निपतेयुस्त्र्यहमनध्यायः ॥ २७ ॥ यावद्भूमिर्व्युदकेत्येके' ॥ २८ ॥ विद्युत्स्तनयित्न्वादयः सर्वे यत्र समुदिताः, तदा त्र्यहमनध्यायः । यावद्वा भूमेः वर्षोदकं च नश्येदित्यर्थः । 'एकेन द्वाभ्यां वैतेषामाकालम्' ॥ २९ । विद्युदादीनां मध्ये एकं द्वयं वा यदि भवेत्, तदा एकस्मिन् दिने नाधीयीतेत्यर्थः । 'सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वाने उल्कायां अग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम्' ॥ ३० ॥ अपस्वानो निर्घातः । एतेषु निमित्तेषु अष्टादशविद्यास्थानानां ऋतावनृतौ चानध्ययनमाकालिकमित्यर्थः । 'अभ्रं चापर्तौ सूर्याचन्द्रमसोः परिवेष इन्द्रधनुः प्रतिसूर्यमत्स्यश्च वाते पूतिगन्धे नीहारे च सर्वेष्वेतेषु तावत्कालम्' ॥ ३१ ॥ अपर्तौ वर्षाकालादन्यत्र । प्रतिसूर्यः सूर्यसमीपे सूर्याकृतिः । मत्स्यः पुच्छवन्नक्षत्रम् । शेषं स्पष्टम् । 'मुहूर्तं विरते वाते' ॥ ३२ ॥ घोषवति वायौ विरतेऽपि ततः परं मुहूर्तं नाधीयीतेत्यर्थः । 'सलावृक्यामेकसृक इति स्वप्नपर्यान्तम्' ॥ ३३ ॥ पूर्वोक्तस्य तावत्कालमित्यस्यापवादोऽयम् । 'नक्तं चारण्येऽनग्नावहिरण्ये वा' ॥ ३४ ॥ रात्रौ अग्निरहिते, हिरण्यरहिते वा अरण्ये नाध्येतव्यमित्यर्थः । 'अननूक्तं चापर्तौ छन्दसी नाधीयीत' ॥ ३५ ॥ अपर्तौ उत्सर्जनादूर्ध्वं उपाकरणात्प्राक् अपूर्वाध्ययनं न कार्यमित्यर्थः । तत्र धारणाध्ययने न दोषः । 'प्रदोषे च ॥ ३६ ॥ सार्वकालिकमाम्नातम्' ॥ ३७ ॥ अननूक्तं प्रदोषे नाधीयीत । एतच्च सार्वकालिकमित्यर्थः । 'यथोक्तमन्यदतः परिषत्सु' ॥ ३८ ॥ इतोऽप्यन्यदनध्ययननिमित्तं शाखान्तरे द्रष्टव्यमित्यर्थः ॥

बोधायनोऽपि—'[अहोरात्रयोः संध्ययोः] पर्वसु च नाधीयीत। (बोधा. धर्म. १. ११. ३५) न मांसमश्नीयात् न स्त्रियमुपेयात् ॥ ३६ ॥ पर्वसु हि रक्षःपिशाचा व्यति[भि]-चारवन्तो भवन्तीति विज्ञायते ॥ ३७ ॥ अन्येषु चाद्भुतोत्पातेष्व-होरात्रमनध्यायोऽन्यत्र मानसात् ॥ ३८ ॥ मानसेऽपि जननमर-णयोरनध्यायः' ॥ ३९ ॥ अथाप्युदाहरन्ति—'हन्त्यष्टमी ह्युपाध्यायं हन्ति शिष्यं चतुर्दशी। हन्ति पञ्चदशी विद्यां तस्मात्सर्वाणि वर्जयेत्' ॥ ४० ॥ इति ॥

गौतमोऽपि—'नाधीयीत वायौ दिवा पांसुहरे (गौतम, धर्म. अ. १६. सू. ५.) कर्णश्राविणि नक्तम्' ॥ ६ ॥ दिवा पांसुहरे वायौ वाति, नक्तं च महाघोषे वायौ वाति सति नाधी-यीतेत्यर्थः। 'वाणभेरीमृदङ्गगर्तार्तशब्देषु ॥ ७ ॥ श्वसृगालगर्द-भसंह्रादे' ॥ ८ ॥ वाणः शततन्तुवीणाविशेषः। गर्तो रथः। आर्ता दुःखिनः। एतेषां शब्देषु नाधीयीतेत्यर्थः। 'लोहितेन्द्रधनुर्नीहा-रेषु ॥ ९ ॥ अभ्रदर्शने चापर्तौ ॥ १० ॥ मूत्रित उच्चारितः ॥ ११ ॥ निशासंध्योदकेषु' ॥ १२ ॥ लोहिते आकाशे अपर्तौ वर्षाकाला-दन्यत्र सोदकमेघदर्शने नाधीयीतेत्यर्थः। 'वर्षति च' ॥ १३ ॥ वर्षति बिन्दुमात्रवर्षणेऽपि नाधीयीतेत्यर्थः। 'आचार्यपरिवेषणे ॥ १५ ॥ ज्योतिषोश्च' ॥ १६ ॥ आचार्ययोः गुरुशुक्रयोः परिवेषे वा, आचार्यस्य अन्नपरिवेषणवेलायां वा सूर्याचन्द्रमसोः परिवेषे वा नाधीयीतेत्यर्थः। 'भीतो यानस्थः शयानः प्रौढपादः ॥ १७ ॥ श्मशानग्रामान्त(र)महापथाशौचेषु' ॥ १८ ॥ प्रौढपादः पादे पादान्तराभ्याधायी, पीठाद्यासनाध्यारोपितपादो वा। पूतिगन्धा-

अथ अष्टपञ्चाशः सर्गः ॥

अष्टपंचाशे— तमारुह्य समुपविष्टेषु वानरेषु,

जाम्बवान् कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥

कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ।
तस्यां वा स कथंवृत्तः क्रूरकर्मा दशाननः ॥

तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ।
श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥

यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवत् ।
रक्षितव्यं च यत्तत्र तद्भवान् व्याकरोतु नः ॥

अनेन सेवकैर्गोपनीयांशमाच्छाद्यैव ऐकमत्येन प्रभुनिकटे वक्तव्यमिति सूचितम ॥

इति पृच्छन्तं जाम्बवन्तमखिलेनोदन्तमभिधाय हनुमान् स्वगर्वपरिहारायैवमवदत्—

राघवस्य प्रभावेण भवतां चैव तेजसा ।
सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥

एतत्सर्वं मया तत्र यथावदुपपादितम् ।
मया यन्न कृतं कर्म तत्सर्वं कर्तुमर्हथ ॥

अनेन कार्यसाधनानन्तरम्, अहो महाप्रभावा वयम्, यदनन्यसाध्यमपि कार्यमस्माभिः साधितमिति गर्विष्ठा भवन्ति खलाः । समीचीनास्तु विशिष्य विनयान्विता भवन्ति इति सूचितम ॥

इति अष्टपञ्चाशः सर्गः ॥

अथ एकोनषष्टितमः सर्गः ॥

एकोनषष्टितमे—

सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः ।
शीलमासाद्य सीताया मम च प्रवणं मनः ॥

तपसा धारयेल्लोकान् क्रुद्धो वा निर्दहेदपि ।
सर्वथातिप्रवृद्धोऽसौ रावणो लोकरावणः ॥

तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥

न तदग्निशिखा कुर्यात् संस्पृष्टा पाणिना सती ।
जनकस्यात्मजा कुर्याद्यत्क्रोधकलुषीकृता ॥

सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥

अनेन प्रतिपदि अधीतायाः विद्यायाः कार्श्यप्रतिपादनेन प्रतिपदि अध्ययनस्य विद्यानाशकत्वं सूचितम् । तथा च काल-**विधाने**— 'अष्टमी तु गुरुं हन्ति शिष्यं हन्ति चतुर्दशी । पर्व तद्द्वितयं हन्ति प्रतिपत्पाठनाशिनी ॥' इति ॥ **हारीतवचनेऽपि**—'नाधीयीत नरो नित्यमादावन्ते च पक्षयोः । आदौ तु हीयते बुद्धिरन्ते ब्रह्म च हीयते ॥' इति । **गार्ग्यवचनेऽपि**— 'प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः । श्वोऽनध्यायेऽद्य शर्वर्यां नाधीयीत कदाचन ॥' इति । **उशना अपि**— 'पर्वणीतिहासवर्जितानां विद्यानामनध्यायः' इति । 'प्रतिपत्सु न चिन्तयेत्' इति च । **स्मृत्यर्थसारेऽपि**— 'चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु तु । वेदाङ्गन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेत् ॥' इति ॥

अन्येऽप्यनध्ययनकाला धर्मशास्त्रेषु निरूपिताः। तत्राप-स्तम्बः—'श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत (आप. धर्म. ख. ९. सू. १) निगमेष्वध्ययनं वर्जयेत्' ॥ ४ ॥ निगमेषु चत्वरेषु निर्गमनमार्गेषु वा। 'श्मशाने सर्वतः शम्याप्रासात् ॥ ६ ॥ ग्रामेणाध्यवसिते क्षेत्रेण वा नान-ध्यायः' ॥ ७ ॥ श्मशानदेशेऽपि यदि ग्रामो निर्मितः स्यात्, सस्यं वा कृतं स्यात्, तत्र त्वधीयीतेत्यर्थः। 'ज्ञायमाने तु तस्मिन्नेव देशे नाधीयीत' ॥ ८ ॥ तत्रापि अयं श्मशानदेश इति ज्ञाने तत्रैव नाधीयीत, न तु शम्याप्रासनिषेध इत्यर्थः। 'श्मशान-वच्छूद्रपतितौ ॥ ९ ॥ समानागार इत्येके ॥ १० ॥ शूद्रायां तु प्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः ॥ ११ ॥ तथान्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने' ॥ १२ ॥ त्रैवर्णिकस्त्रीष्वपि नीचवर्णादि-चारिषु प्रेक्षणप्रतिप्रेक्षणयोरनध्याय इत्यर्थः। 'अन्तःशवम् ॥ १४ ॥ अन्तश्चाण्डालम्' ॥ १५ ॥ ग्राममध्ये शवश्चण्डालो वा यदि स्यात्, तदा नाधीयीतेत्यर्थः। 'अभिनिर्हृतानां तु सीम्नि अनध्यायः' ॥ १६ ॥ शवनिर्हरणेऽपि तस्मिन् देशे नाधीयीतेत्यर्थः। 'संदर्शने चारण्ये' ॥ १७ ॥ अरण्ये शवश्चण्डालो वा यावति प्रदेशे दृश्यते तावति नाधीयीतेत्यर्थः। 'तदहरागतेषु च ग्रामं बाह्येषु' ॥ १८ ॥ बाह्या उग्रनिषादादयः परिपन्थिनः, तेषु च ग्राममागतेषु तदहरनध्याय इत्यर्थः। 'अपि सत्सु' ॥ १९ ॥ विद्याचारित्रादिभिः ये सन्तस्तेष्वपि ग्राम-मागतेषु तदहरनध्याय इत्यर्थः। 'संधावनुस्तनिते रात्रिम्' ॥ २० ॥ सन्ध्याकाले मेघगर्जने सर्वां रात्रिं नाधीयीतेत्यर्थः। वर्षतोविदम्। 'स्वप्नपर्यान्तं विद्युति' ॥ २१ ॥ संधौ विद्युति सत्यां पूर्वां रात्रिं

नाधीयीतेत्यर्थः । 'उपव्युषं यावता वा कृष्णां रोहिणीमिति शम्याप्रासाद्विजानीयादेतस्मिन्काले विद्योतमाने सप्रदोषमहरनध्यायः' ॥ २२ ॥ यस्मिन् उषःसमीपे काले शम्याप्रासादर्वाक् स्थिताया गोर्वर्णे अमुक इति ज्ञातुं शक्यते, तस्मिन्काले विद्युति सत्यां सप्रदोषमहरनध्याय इत्यर्थः । 'दहेऽपरराले स्तनयित्नुना' । ॥ २३ ॥ रात्रेः पश्चिमे तृतीयांशे मेघगर्जने परस्मिन् दिने सप्रदोषमहरनध्याय इत्यर्थः । 'ऊर्ध्वमर्धरात्रादित्येके ॥ २४ ॥ गवां चावरोधे' ॥ २५ ॥ दस्युप्रभृतिभिः गवां ग्रामाद्बहिर्निर्गमननिरोधे तावन्तं कालं नाधीयीतेत्यर्थः । 'पृष्ठारूढः पशूनां नाधीयीत ॥ २७ ॥ अहोरात्रावमावास्यासु' ॥ २८ ॥ चतुर्दश्याममावास्यायामिति अहोरात्रद्वयं नाधीयीतेत्यर्थः ॥

'चातुर्मासीषु च' (आप. धर्म. ख. १०. सू. १)। फाल्गुन्याषाढी कार्तिकी इत्येतासु पौर्णमासीषु चतुर्दश्यां पौर्णमास्यां च नाधीयीतेत्यर्थः । 'वैरमणे गुरुष्वष्टाक्य औपाकरण इति त्र्यहाः' ॥ २ ॥ तैष्यां अध्यायोत्सर्जने, श्वशुरादिषु गुरुषु प्रेतेषु, तिसृष्वष्टकासु, अध्यायोपाकरणे च त्रिरात्रमनध्याय इत्यर्थः । 'तथा संबन्धेषु ज्ञातिषु' ॥ ३ ॥ सपिण्डेषु निवृत्तेषु ब्रह्मचारिणोऽपि त्रिरात्रमनध्याय इत्यर्थः । 'मातरि पितर्याचार्य इति द्वादशाहाः ॥ ४ ॥ आचार्ये त्रीनहोरात्रानित्येके ॥ १० ॥ श्रोत्रियसंस्थायामपरिसंवत्सरायामेकाम् ॥ ११ ॥ सब्रह्मचारिणीत्येके ॥ १२ ॥ श्वगर्दभनादाः सलावृक्येकसृकोलूकशब्दाः सर्वे वादितशब्दा रोदनगीतसामशब्दाश्च' ॥ १९ ॥ एतेषां श्रवणकाले नाधीयीतेत्यर्थः । 'शाखान्तरे च साम्नामनध्यायः' ॥ २० ॥ वेदान्तरेऽधीयमाने न

प्रकृतिसंभवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ तत्र
सत्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसंगेन बध्नाति ज्ञान-
संगेन चानघ ॥ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनम् ॥ तमस्त्वज्ञानजं विद्धि
मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
सत्वं सुखे संजयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः
प्रमादे संजयत्युत ॥ रजस्तमश्चाभिभूय सत्वं भवति भारत ।
रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥ सर्वद्वारेषु देहेऽस्मि-
न्प्रकाश उपजायते । ज्ञानं यदा तदा विद्यात् प्रवृद्धं सत्वमित्युत ॥
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ॥ रजस्येतानि जायन्ते
विवृद्धे भरतर्षभ ॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ यदा सत्वे प्रवृद्धे तु
प्रलयं याति देहभृत् । तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते । तथा प्रलीनस्तमसि
मूढयोनिषु जायते ॥ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम ॥ सत्वात्संजायते ज्ञानं
रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्ध्वं गच्छन्ति सत्वस्थाः मध्ये तिष्ठन्ति राजसाः । जघन्यगुण-
वृत्तिस्था अधो गच्छन्ति तामसाः ॥ नान्यं गुणेभ्यः कर्तारं यदा
द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥'
इति ॥

मनुस्मृतावपि— 'सत्वं रजस्तमश्चैव त्रीन्विद्यादा-
त्मनो गुणान् । यैर्व्याप्येमांस्थितो भावान्महान्सर्वानशेषतः ॥

यो यदैषां गुणो देहे साकल्येनातिरिच्यते । स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥ सत्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम् । एतद्व्यथाप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥ तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् । प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत् ॥ यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः । तद्रजः प्रतिघं विद्यात्सततं हारि देहिनाम् ॥ यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकम् । अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ त्रयाणामपि चैतेषां गुणानां यः फलोदयः । अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥ वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः । धर्मक्रियात्मचिन्ता च सात्विकं गुणलक्षणम् । आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः । विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥ लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं हीनवृत्तिता । याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥ त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम । इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥ यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जते । तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥ येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् । न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् । यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् । येन तुष्यति चात्मास्य तत्सत्वगुणलक्षणम् ॥ तमसो लक्षणं कामो रजसश्चार्थ उच्यते । सत्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथाक्रमं [यथोत्तरम्] ॥ येन येन गुणेनेमान् संसारान्प्रतिपद्यते । तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥ देवत्वं सात्विका यान्ति मनुष्यत्वं तु राजसाः । तिर्यक्त्वं तामसप्राया

इत्येषा त्रित्रिधा गतिः ॥ त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ॥ स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः। पशवश्च सृगालाश्च जघन्या तामसी गतिः ॥ हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहव्याघ्रवराहाश्च मध्यमा तामसी गतिः ॥ चारणाश्च सुपर्णाश्च पुरुषाश्चैव डाम्भिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ॥ झल्ला मल्ला नटाश्चैव पुरुषाश्च कुवृत्तयः। द्यूतपानप्रसक्ताश्च प्रथमा तामसी गतिः ॥ राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥ गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः। तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्विकी गतिः ॥ यज्वानो ऋषयो वेदा देवा ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया सात्विकी गतिः। ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्विकीमेतां गतिमाहुर्मनीषिणः ॥ एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः॥' इति ॥

इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ।
पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥

अनेन सन्निमित्तं कार्यसिद्धिज्ञापकमिति सूचितम्। तथा च कामन्दकः— 'निमित्तान्येव शंसन्ति शुभाशुभफलोदयम्। तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत् ॥ प्रशस्तेन निमित्तेन विशुद्धेनान्तरात्मना। व्यक्तमारभ्यमाणं हि सिद्धिं याति समीहितम् ॥' इति ॥

ततश्चारणानामपि गिरमेवं शुश्राव—

दग्धेयं नगरी सर्वा साट्टप्राकारतोरणा ।
जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥

स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ।
ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥

इति पञ्चपञ्चाशः सर्गः ।

अथ षट्पञ्चाशसप्तपञ्चाशौ सर्गौ ॥

षट्पंचाशसप्तपंचाशयोः—गत्वा च सीतानिकटम्, प्रणम्य च सानन्दम्, प्रतिगमनाय संप्राप्य सीतानियोगमारुह्य चारिष्टनामानं गिरिमुत्तीर्य च सागरं महेन्द्रशिखरे निपपात । तं च प्रीतमानसा वानरयूथपाः परिवार्य पुनरुपागतमवलोक्य प्रहृष्टवदनाः—

उपायनानि चादाय मूलानि च फलानि च ।
प्रत्यर्चयन् हरिश्रेष्ठं हरयो मारुतात्मजम् ॥

सोऽपि जाम्बवत्प्रमुखान्यथार्हमभिवादनादिना संमान्य तैरनुयुक्तः संक्षेपेण दृष्टा सीतेति समाचख्यौ । तदनु पवनतनयवचनजनितानन्दा वानरयूथपा अत्यानन्दाविर्भावमात्मजातिसमुचितेन चापल्येन प्रकटीकुर्वन्तो विस्तरेण तमुदन्तमाकर्णयितुं महेन्द्रशिखरमारुरुहुः ॥

इति षट्पञ्चाशसप्तपञ्चाशौ सर्गौ ।

न्तःशवदिवाकीर्त्यशूद्रसंनिधाने ॥ १९ ॥ शूद्रके चोद्गारे'॥ २० ॥ अन्तःशवे अन्तश्चण्डाले च ग्रामे नाधीयीतेत्यर्थः । अजीर्णोद्गारे च वर्तमाने नाधीयीतेत्यर्थः । 'ऋग्यजुषां च सामशब्दो यावत् ॥ २१ ॥ आकालिका निर्घातभूमिकंपराहुदर्शनोल्काः ॥ २२ ॥ स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निषु' ॥ २३ ॥ मेघगर्जनादौ सति अहोरात्रं नाधीयीतेत्यर्थः । 'अहर्ऋतौ' ॥ २४ ॥ ऋतौ वर्षाकाले, सन्ध्यायां च । प्रातःसन्ध्यायां गर्जनादिसंभवे अहर्मात्रम्, सायंसन्ध्यायां गर्जनादिसंभवे च सर्वरात्रमनध्याय इत्यर्थः । 'विद्युति नक्तं चापररात्रात्'॥ २५ ॥ यदि नक्तं विद्युत् दृश्यते, तदा रात्रेस्तृतीयभागपर्यन्तमनध्याय इत्यर्थः । 'त्रिभागादिप्रवृत्तौ सर्वम्' ॥ २६ ॥ यद्यह्नः पश्चिमतृतीयभागादारभ्य विद्युत् प्रवर्तते, तदा सर्वरात्रमनध्याय इत्यर्थः । 'उल्का विद्युत्समेत्येकेषाम्'॥ २७ ॥ विद्युन्निमित्तानध्यायाः उल्कायामपि समाना इत्येके । 'स्तनयित्नुरपराह्णे ॥२८॥ अपि प्रदोषे' ॥ २९ ॥ अपराह्णे प्रदोषेऽपि वा भवन् स्तनयित्नुः आ अपररात्रादनध्यायहेतुरित्यर्थः । 'सर्वं नक्तमार्धरात्रात्॥' ३०॥ प्रथमरात्रिभागप्रभृति आ अर्धरात्रात्प्रवृत्तः स्तनयित्नुः सर्वं नक्तमनध्यायहेतुरित्यर्थः । 'अहश्चेत्सज्योतिः' ॥ ३१ ॥ अपराह्णात्प्राक् भवंस्तनयित्नुः आ अस्तमयादनध्यायहेतुरित्यर्थः । 'विषयस्थे च राज्ञि प्रेते' ॥ ३२ ॥ तद्देशस्थितराजमरणे सज्योतिरनध्याय इत्यर्थः । 'विप्रोष्य चान्योन्येन सह' ॥ ३३ ॥ सहाध्यायिनां मध्ये केषांचिद्विप्रवासे आचार्येण संगतानामनध्याय इत्यर्थः । 'संकुलोपाहितवेदसमाप्तिच्छर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रम्' ॥ ३४ ॥ संकुलः चोराद्युपद्रवः । उपाहितः अग्निदाहः । वेदसमाप्तिः शाखासमाप्तिः । छर्दिः

वमनम् । श्राद्धभोजने मनुष्ययज्ञभोजनादौ इत्येतेषु निमित्तेष्व- होरात्रमनध्याय इत्यर्थः । 'अमावास्यायां च ॥ ३५ ॥ व्यहं वा' ॥३६ ॥ अमावास्यायां तत्पूर्वेद्युश्च अहोरात्रमनध्याय इत्यर्थः । 'कार्तिकी फाल्गुन्याषाढी पौर्णमासी' ॥ ३७ ॥ तिसृष्वपि नाध्येतव्यमित्यर्थः । 'तिस्रोऽष्टकास्त्रिरात्रम्' ॥ ३८ ॥ मार्गशी- र्ष्याः पौर्णमास्या उपरि तिस्रः कृष्णाष्टम्य अष्टकाः । तासु पूर्वेद्युः परेद्युश्च नाध्येतव्यमित्यर्थः । 'अन्त्यमेके' ॥ ३९ ॥ स्पष्टम् । 'अभितो वार्षिकम्'॥ ४० ॥ वार्षिकाध्ययनार्थे उपाकरणे उत्सर्जने च त्र्यहमनध्याय इत्यर्थः । 'सर्वे वर्षविद्युत्स्तनयित्नुसंनिपाते' ॥ ४१ ॥ एतेषां सन्निपाते सर्वे आचार्याः त्रिरात्रमनध्याय[इत्याहुः] इत्यर्थः । 'प्रस्यन्दिनि' ॥ ४२ ॥ प्रकृष्टवर्षधारास्रावे तावन्तं कालं नाध्येतव्यमित्यर्थः । 'ऊर्ध्वं भोजनादुत्सवे' ॥ ४३ ॥ विवाहादौ भोजनादूर्ध्वं नाध्येतव्यमित्यर्थः । 'प्राधीतस्य च निशायां चतुर्मुहूर्तम्' ॥ ४४ ॥ उपाकृत्याध्येता प्राधीत इत्युच्यते । तस्य पूर्वरात्रे चतुर्मुहूर्तं नाध्येतव्यमित्यर्थः । 'नित्यमेके नगरे' ॥ ४५ ॥ नगरे नित्यमनध्याय इत्येके । शूद्रभूयिष्ठे नाध्येतव्यम्, ब्राह्मणभूयिष्ठे अध्येतव्यमिति गौतममतम् । 'मानसमप्यशुचिः' ॥ ४६ ॥ अप्रयतः सन् मानसमप्यध्ययनं न कुर्यादित्यर्थः । 'श्राद्धिनामाकालिकम्' ॥ ४७ ॥ कर्तुरयं निषेधः । 'अकृतान्न- श्राद्धिकसंयोगे च' ॥ ४८ ॥ श्राद्धीयामप्रतिग्रहेऽपि नाध्ये- तव्यमित्यर्थः । 'प्रतिविद्यं च यान् स्मरन्ति' ॥ ४९ ॥ अन्येष्वपि धर्मशास्त्रेषु उक्ताननध्यायान् वर्जयेदित्यर्थः ॥

मनुरपि— 'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।

विरमेत्पक्षिणीं रात्रिं तद्वाप्येकमहर्निशम् ॥' इति । तत् वेदाध्ययनम् । 'अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानि च सर्वाणि कृष्णेषु नियतः पठेत् ॥' इति च ॥

एतदुपाकृत्याध्ययनं स्नातकानां ब्रह्मचारिणामपि समानम । 'इमान्नित्यमनध्यायानधीयानो विवर्जयेत् । अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम् ॥' [इति] 'उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥' इति च ॥

'उपाकर्मणि त्रिरात्रम्, उत्सर्गे तु पूर्वोक्तपक्षिण्यहोरात्राभ्यां सह विकल्पः' [इति] विज्ञानेश्वरीये । प्रथमाध्ययने त्र्यहम्, इतरत्र पक्षिणी, अहोरात्रं वा, 'उत्सर्गे प्रथमाध्याये त्वनध्यायस्त्र्यहं भवेत् । धारणाध्यापनादौ तु पक्षिणी दिनमेव वा ॥' इति मनुस्मरणादित्यन्ये ॥

याज्ञवल्क्यः— 'श्वक्रोष्टृगर्दभोलूकसामबाणार्तनिस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥ देशेऽशुचावात्मनि च विद्युत्स्तानितसंप्लवे । भुक्त्वार्द्रपाणिरम्भोन्तरर्धरात्रेऽतिमारुते ॥ पांसुवर्षे दिशादाहे संध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे । सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुः ॥' इति । 'त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु । उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा ॥' तथा प्रेते । 'संध्यागर्जितनिर्घातभूकंपोल्कानिपातिते । समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥' द्युनिश-

महोरात्रमनध्यायः । 'पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके। ऋतुसन्धिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च ॥ पशुमण्डूकनकुलश्वाहिमार्जारमूषिकैः । कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥' इति ॥

यत्पुनर्गौतमेनोक्तम्— 'श्वनकुल[सर्प]मण्डूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्च' इति, तत् प्रथमाध्ययनविषयमिति **विज्ञानेश्वरीये** ॥

मनुरपि— 'कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने। एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥' इति । **स्मृत्यन्तरेऽपि**— 'एतांस्त्वभ्युदितान् विद्याद्यदा प्रादुष्कृताग्निषु । तदा विद्यादनध्यायमनृतावभ्रदर्शने ॥ निर्घाते भूमिचलने ज्योतिषां चोपसर्जने । एतानाकालिकान् विद्यादनध्यायानृतावपि ॥ उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् । प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य भोजनम् [केतनम्] । त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥ रवीन्द्वोर्ग्रहणे चैव नाधीयीत दिवानिशम् । शयानः प्रौढपादश्च बद्ध्वा चैवावसक्थिकाम् । नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥ नीहारे बाणशब्दे च संध्ययोरेव चोभयोः । अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥ पांसुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥ नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजे तथा । वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥ प्राणि वा यदि वाप्राणि यत्किञ्चिच्छ्राद्धिकं भवेत् । तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजोत्तमः ॥ न विवादे न कलहे न सेनायां न

एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ ।
ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥

अनेन स्वभावतो मदकरमैश्वर्यं प्राप्यापि विनीत एव भवेदिति सूचितम् । तथा च कामन्दकः— 'इयं हि लोकोत्तरवर्त्मे [लोकव्यतिरेक] वर्तिनी स्वभावतः पार्थिवता समुद्धता । बलात्तदेनां विनये नियोजयेन्नयस्य सिद्धौ विनयः पुरस्सरः ॥' इति ॥

उद्योगेऽपि विदुरः— 'न राज्यं प्राप्तमित्येव वर्तितव्यमसाम्प्रतम् । श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥' इति । प्राचीना अपि— 'विद्यामदो धनमदस्तृतीयोऽभिजनो मदः । एते मदावलिप्तानामेत एव सतां दमाः ॥' इति ॥

तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् ।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥

अतो विनीतः समस्तमप्यैश्वर्यं प्राप्नोति । अविनीतस्तु प्राप्तमप्यैश्वर्यं नाशयतीति सूचितम् । तदुक्तम् [उद्योगे]— 'अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा । विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥' [कामन्दकेऽपि]— 'भवति हि विनयोपबृंहितो नृपतिपदाय शमाय च क्षमः ॥ अविनयरतमादरादृते वशमवशं हि नयन्ति विद्विषः । श्रुतविनयाविधिं समाश्रितस्तनुरपि नैति पराभवं कचित् ॥ परां विनीतः समुपैति सेव्यतां महीपतीनां विनयो विभूषणम् । प्रवृत्तदानो मृदुसंचरत्करः करीव भद्रो विनयेन शोभते ॥ इति स राजा विनयं नयान्वितो निषे-

वमाणो नरदेवसेवितम् । पदं समाक्रामति भास्वरं श्रियः शिरो महारत्नगिरेरिवोन्नतम् ॥' इति ॥

तदाकर्ण्य समुत्पतन्तमङ्गदमनूत्पेतुः सर्वे हरियूथपाः ॥

तदनु सुग्रीवः स्वसमीपमनागतेषु वानरेषु शोकाकुलहृदयं राममेवमवोचत्—

समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ।
न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ।
युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥

यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ।
भवेत्स दीनवदनो भ्रान्तविप्लुतमानसः ॥

अनेन अकृतकार्या दीनवदनाः सन्तः प्रभोर्निकटं नागच्छन्तीति सूचितम् ॥

जाम्बवान्यत्र नेता स्यादङ्गदश्च बलेश्वरः ।
हनूमानप्यधिष्ठाता न तस्य गतिरन्यथा ॥

अनेन कार्येषु बुद्धिमानेकोऽधिष्ठाता, प्रभुरन्यः, कर्तव्यकर्ता चापर इति त्रयोऽपि नियोक्तव्या इति सूचितम् । तथा च सभापर्वणि जरासन्धवधे—'कृष्णे नयो मयि बलं जयः पार्थे धनंजये । मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः ॥' इति ॥

ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ।
आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः ॥

तदनु सुग्रीवमुपागतेषु वानरयूथपेषु,

हनूमांश्च महाबाहुः प्रणम्य शिरसा सह ।
नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥

इति चतुःषष्टितमः सर्गः ।

अथ पञ्चषष्टितमः सर्गः ॥

पंचषष्टितमे— ततः प्रस्रवणशैलमारुह्य, 'सीतावृत्तान्तमादितः कथ्यताम्' इति वदति रामभद्रे जाम्बवत्प्रमुखैर्हरियूथपैः प्रेरितः पवनतनयः,

प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ।
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥

अत्र रामस्य सन्निधौ रामस्य नमस्कारमुपेक्ष्य सीतानमस्कारकरणमसंगतम् । 'आचार्यप्राचार्यसन्निपाते प्राचार्यायोपसंगृह्य उपसंजिघृक्षेदाचार्यम्' इति धर्मशास्त्रेणाचार्यसन्निधानेऽपि तत्पूज्यप्राचार्यस्यैव नमस्कार्यत्वावगमेन तन्न्यायेनात्रापि [सीता]सान्निधानेऽपि रामनमस्कारस्यैव धर्मत्वेन असान्निहितसीतानमस्कार[स्य] धर्मत्वस्य दूरापेतत्वादिति चेत् —न, धर्मशास्त्रपर्यालोचनया अयुक्तत्वेऽपि सीतायाः पातिप्रत्यातिशयज्ञापनेन वक्ष्यमाणजानकीवृत्तान्तेषु रामस्य प्रत्ययोत्पादनार्थतया प्रवृत्तत्वेन युक्तत्वात् । अतो नोक्तदोषावकाश इति ॥

अत्र 'तां दिशं प्रति' इत्युक्त्या चासन्निहितपूज्यदेवता-नमस्कारोपस्थानादिकं तद्दिगभिमुखतया कुर्यादिति सूचितम् । तथा चापस्तम्बः— 'प्रवसन् काले विहाराभिमुखो याजमानं जपति । प्रवसन् काले विहाराभिमुखोऽग्न्युपस्थानं जपति च' इति ॥

ततः समुद्रतरणलंकाप्रवेशादि निखिलं सीतादर्शनवृत्तान्त-मभिधाय सीतादत्तमभिज्ञानमपि रामाय निवेदयामास ॥

इति पञ्चषष्टितमः सर्गः ।

अथ षट्षष्टितमः सर्गः ॥

षट्षष्टितमे— ततः सीतया विनाकृतं मणिमवलोक्यातितरां संक्लिष्टहृदयेन रामेण पुनः किमाह सीता ? किं वाभाति ? कथं वा तिष्ठति? तदखिलमपि श्रोतुमिच्छामि ॥

एतेन खलु जीविष्ये भेषजेनातुरो यथा ।

इत्युक्तम् ॥

अनेन अत्यास[प]न्नस्यापि औषधसेवनं जीवनारोग्य-प्रदमिति सूचितम् । तथा च बाहटे— 'चतुष्पाद्गुणसंपन्ने सम्यगालोच्य योजिते । मा कृथा व्याधिनिर्घाते विचिकित्सां चिकित्सिते ॥ एतद्धि मृत्युपाशानामकाण्डे छेदनं परम । रोगत्रासितभीतानां रक्षासूत्रमसूत्रकम् ॥' इति ॥

इति षट्षष्टितमः सर्गः ।

